स्वभावः प्रगतिप्राणो वर्धयेल्लोकमङ्गलम् ।।४।।

[५]इन्द्रियाणां तु सर्वेषामीश्वरं मन उच्यते।
मनो हि हेतुः सर्वेषामिन्द्रियाणां प्रवर्तने ।।५।।

स्वभावस्तु मनुष्याणां त्रिगुणात्मक उच्यते।
सुहिते तस्य सिद्धिश्च सात्त्विकी परिलक्ष्यते ।।६।।

[६]यद् यद्धि कुरुते किञ्चित्तत्तत्कामस्य चेष्टितम्।
[७]सङ्कल्पमूलास्ते सर्वे सङ्कल्पो विषयात्मकः ।।७।।

सौहार्दं समता सत्यं स्वातन्त्र्यं सहकारिता।
मानुष्यं मार्दवं मौनमौदार्यमार्जवं क्षमा ।।८।।

करुणा प्रीतिरानन्द उद्रेके सुहिते रतिः।
धैर्यं सहानुभूतिश्च सात्त्विकाः सद्गुणाः स्मृताः[८] ।।९।।

हैं, सभी गुण स्वभाव से प्रेरित हैं तथा सब काम स्वभाव को ही लक्षित, अर्थात् सूचित करते हैं।।२-३।। स्वभाव गतिशील और प्रगतिशील है। प्रगतिशील स्वभाव से ही लोकमंगल बढ़ता है।।४।। मन सब इन्द्रियों का ईश्वर कहा जाता है। इन सबकी प्रवृत्ति का हेतु मन ही है।।५।। मनुष्य जो कुछ करता है, वह सब इच्छा की चेष्टा है। वे सब संकल्पमूलक हैं और संकल्प विषय से बनता है।।६।। मनुष्य का स्वभाव तीन गुणों से बना हुआ है। अच्छे हित में उसकी सिद्धि सात्त्विकी कहलाती है।।७।। सौहार्द, समता, सत्य, स्वतन्त्रता, सहकारिता, मानवता, मृदुता, मनन-चिन्तन, सरलता, क्षमा, करुणा, प्रेम, आनन्द, संवृद्धि और सुहित में अनुराग, धैर्य तथा सहानुभूति सात्त्विक गुण बताये जाते हैं।।८-९।। क्रूरता, भेदबुद्धि, विषमता, वैर, संग्राम, दर्प, द्वेष, बहुत बोलने का

---

१. शान्ति. २२२.२७; शान्ति. २२२.२२ २. शान्ति. २२२.२५ ३. गीता १७.३
४. शान्ति. २२२.३५ ५. शान्ति. ३११.२१ ६. मनु. २.४
७. मनु. २.३ ८. शान्ति.३१३.२७.२०

क्रूरता भेदबुद्धिश्च वैषम्यं वैरविग्रहौ ।
दर्पो द्वेषोऽतिवादश्च कामः क्रोधो मदस्तथा ।।१०।।

परापवादेषु रतिर्विवादानां च सेवनम् ।
आधिपत्यमहङ्कार एते प्रोक्ता रजोगुणाः[१] ।।११।।
अज्ञानं लोभमोहौ च प्रमादो मत्सरस्तथा ।
आलस्यं स्तब्धता भीतिरेते वै तमसो गुणाः[२] ।।१२।।

[३]अन्योऽन्यसम्पर्कवशात् सर्वे संक्रामिका गुणाः ।
सद्गुणैर्भावसंशुद्ध्या वर्धते लोकमङ्गलम् ।।१३।।

गतिः प्रगतिस्तेजश्च शक्तिसाहसपौरुषम् ।
उत्साहस्फूर्तिसामर्थ्यं गुणाः सात्त्विकराजसाः ।।१४।।

अत्याचारो बलात्कारः सन्तापः प्रतिगामिता ।
दमनं शोषणं चैव गुणास्तामसराजसाः ।।१५।।

सर्वकार्यं गृहस्थस्य त्रिगुणं स्यान्न संशयः ।
सङ्घातेन हि तेनैव सर्वसृष्टिसमुद्भवः ।।१६।।

त्रिगुणैश्च समायुक्तः प्राधान्येन गुणस्य च ।
विशिष्टगुणसम्पन्नो मानवः समुदाहृतः ।।१७।।

स्वभाव, काम, क्रोध, मस्ती, दूसरों की बुराई में अनुराग, वाद-विवाद में रुचि, आधिपत्य की भावना और अहंकार ये सब रजोगुण कहे जाते हैं।।१०-११।। अज्ञान, लोभ, मोह, असावधानी, ईर्ष्या, आलस्य, जड़ता, भय ये सब तामसिक गुण हैं।।१२।। एक दूसरे के सम्पर्क के कारण सभी गुण संक्रामक हैं। अच्छे गुणों से तथा स्वभाव की शुद्धि से लोकमंगल बढ़ता है।।१३।। गतिशीलता, प्रगतिशीलता, तेज, शक्ति, साहस, पौरुष, उत्साह, स्फूर्ति और सामर्थ्य सात्त्विक-राजस गुण हैं।।१४।। अत्याचार, बलात्कार, सन्ताप, प्रतिगामिता, दमन और शोषण ये तामस-राजस गुण हैं।।१५।। तीनों गुणों से सम्पन्न मनुष्य गुण की प्रधानता से विशेष गुणसम्पन्न कहा जाता है।।१६।। जो मनुष्य स्वभाव से शुद्ध, सत्य और समता में प्रतिष्ठित एवं हर्ष और आनन्द से सम्पन्न है, वह पुरुष सात्त्विक कहलाता है।।१७।। जो मनुष्य वैरबुद्धि एवं मस्ती और क्रोध से

---

१. शान्ति. ३१३.२२-२४ २. शान्ति. ३१३.२५-२६ ३. कामन्दक ५.७

यो नरो भावसंशुद्धः सत्यसाम्यप्रतिष्ठितः ।
हर्षानन्दसमायुक्तः सात्त्विकः स उदाहृतः ।।१८।।
यो वैरबुद्धिसंयुक्तो मदक्रोधसमावृतः ।
अहङ्कारवशीभूतो राजसः स नरः स्मृतः ।।१९।।
यस्तु संमोहसयुक्तो जडत्वेन समावृतः ।
अज्ञानेन समाविष्टस्तामसः स नरः स्मृतः ।।२०।।
दम्भिनः शोषकाः क्रूराः परश्रमसमाश्रिताः ।
आधिप्यभावसंयुक्ता नरा राजसतामसाः ।।२१।।
सत्पथे शौर्यसम्पन्नस्तेजस्वी क्रान्तिनिष्ठितः ।
न्यायसङ्घर्षसंलग्नो नरो राजससात्त्विकः ।।२२।।

पौरुषम्

[1]पौरुषं न परित्याज्यं कर्म ज्यायो ह्यकर्मणः ।
[2]शुभेन कर्मणा सौख्यं कार्य एव पराक्रमः ।।१।।
[3]कर्मभूमिरयं लोक उद्यमो ह्येव पौरुषम् ।
[4]कर्मणापद्यते क्षेमं कर्मैव गुरुरीश्वरः ।।२।।
[5]दुर्लभः परभावो हि यावन् नो पौरुषं कृतम् ।
[6]सर्वं पुरुषकारेण कृतेनेहोपलभ्यते ।।३।।

लिपटा हुआ है तथा अहंकार के वश में है, वह राजसिक कहा जाता है। जो व्यक्ति, अव्यवस्था और जड़ता में फंसा है और अज्ञान से पराभूत है, वह तामसिक कहलाता है।।१८-१९।। दम्भी, शोषक, क्रूर, दूसरों के श्रम पर जीवन व्यतीत करने वाले तथा आधिपत्य की भावना से युक्त पुरुष राजस-तामस कहलाते हैं। सत्पथ में वीर, तेजस्वी, क्रान्ति में संलग्न तथा न्यायसंघर्ष में संलग्न पुरुष राजस-सात्त्विक हैं।।२०-२२।।

श्रमशील मनुष्य ही मधु, अर्थात् जीवन के माधुर्य को पाता है, वही स्वादिष्ट फल का आस्वादन करता है। पड़े रहने वाले का सौभाग्य (उत्कर्ष, श्रेष्ठता) सोता रहता है, चलने वाले का सौभाग्य चलने लगता है।।१।। यह संसार कर्म भूमि है। उद्यम ही पौरुष है। कर्म ही पुरुष है। कर्म ही सबका गुरु और ईश्वर है।।२।। प्रकृतिजन्य गुणों से सबको बरबस काम करना ही होता है। बिना काम के तो शरीर यात्रा भी सम्भव नहीं है।।३।।

---

१. यो. वा. २. गीता ३.८ ३. शान्ति २३३.९
४. भागवत १०.२४.२७ ५. भर्तृ. नीति. ६. मनु. ६.२३

[1]विदांवरा व्याहरन्ति पुरुषश्चाधिदैवतम् ।
पुरुषेणेह सर्वार्थसाफल्यं लभते नरः ।।४।।

[2]चरन् वै मधु विन्दति चरन् स्वादुमुदम्बरम् ।
[3]शेते निपद्यमानस्य चरति चरतो भगः ।।५।।

[4]लोकार्थं लोकयात्रार्थं जीवनोत्कर्षहेतवे ।
प्रयत्नं कुरुते नित्यं विद्यावृत्तव्रतान्वितः ।।६।।

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
[5]अनासक्तं कर्मफले नैष्कर्म्यं परिकीर्तितम् ।।७।।

उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु ।
[6]उत्साहवन्तः पुरुषा नावसीदन्ति कर्मसु ।।८।।

[7]बुद्धिर्यस्य बलं तस्य निर्बुद्धेश्च कुतो बलम् ।
[8]उपायेन हि यत्कुर्यात् तन्न शक्यं पराक्रमैः ।।९।।

[9]देशकालौ समासाद्य विक्रमेत विचक्षणः ।
[10]नासम्यक्कृतकारी स्यादप्रमत्तः सदा भवेत् ।।१०।।

मनुष्य कर्मों के न करने से, अर्थात् निकम्मे बैठे रहने से नैष्कर्म्य को प्राप्त नहीं करता। कर्मफल से अनाशक्ति ही नैष्कर्म्य कहलाती है।।४।। कर्म से सब कुछ घटित होता है। कर्म ही गति (फल) का साधन है। सब कुछ कर्म से प्राप्त होता है। अकर्मण्य को भाग्य से कुछ नहीं मिलता है।।५।। भाग्य कुछ नहीं करता, यह केवल कल्पना ही है। जो पिछला पौरुष है, वहीं भाग्य शब्द से सम्बोधित किया जाता है।।६।। निराशा में फंसे व्यक्ति मानते हैं कि सब कुछ भाग्य के अधीन है। जो धीर और उन्नति करने वाले हैं, वे भाग्य की कब प्रतीक्षा करते हैं?।।७।। परम पुरुषार्थ का आश्रय लेकर पिछले पौरुष को जीतो। भाग्य इस तरह जीता जा सकता है, जैसे युवक से बच्चा।।८।। प्रभु न तो लोगों के कर्तापन को, न कर्मों को, न कर्मफल के संयोग को रचता है। सबका अपना अपना स्वभाव ही बरत रहा है।।९।। यदि दूसरों के कर्मों का फल देने वाला कोई ईश्वर है, तो वह भी कर्ता को ही भजता है (फल वितरित करता है)। वह अकर्ता (कर्म न

---

१. गीता ८.४		२. ऐत. ब्राह्मण ७.२.५		३. ऐत. ब्राह्मण ७.१५.३
४. गीता ३.४		५. वेदव्यास		६. वा. रा. ५.१.१२३
७. चाणक्य २७.२६		८. पञ्चतन्त्र. श्लो. २२८		९. शान्ति २४०.२८
१०. शान्ति २४०.६०

[1]प्रारम्भं तस्य कुर्याद्धि यत्समाप्तिं सुखं व्रजेत्।
[2]विपन्ने च समारम्भे सन्तापं मा स्म वै कृथाः ।।११।।

[3]सम्प्रधार्य च कुर्वीत न वेगेन समाचरेत्।
[4]चिरेण निश्चयं कृत्वा चिरं न परितप्यते ।।१२।।

कर्तव्यमिति यत्कर्म क्रियते न्यायनिष्ठया।
मानवानां हितार्थे वै तत् सात्त्विकमुदाहृतम् ।।१३।।

[5]सत्कारमानपूजार्थं प्रतिलाभार्थमेव वा।
दम्भरागद्वेषयुक्तं कर्म तद् राजसं स्मृतम् ।।१४।।

[6]मोहादारभ्यते कर्म मूढग्राहेण वा पुनः।
[7]परस्योत्सादनार्थं वा यत् तत्तामसमुच्यते ।।१५।।

कामात्मता न प्रशस्ता न चैवेहास्त्यकामता।
लोकात्मोत्कर्षसिद्ध्यर्थं कार्यं कर्म समाचरेत् ।।१६।।

[8]कर्मैव पुरुषो नूनं पुरुषस्यैव कर्मता।
[9]कर्मभूमौ तथा नास्ति भेदः पुरुषकर्मणोः ।।१७।।

करने वाले) का ईश्वर नहीं है अर्थात् उसे फल नहीं देता।।१०।। जो ईश्वर से प्रेरित हो स्वर्ग या नरक को जाये, वह सदा पशु की तरह पराधीन है, इसमें कोई सन्देह नहीं।।११।। अपने को ही सुख-दुःख का कर्ता मानना चाहिये। पौरुष द्वारा ही नियति का नियमन होता है।।१२।। उठना चाहिये, सजग होना चाहिये, कल्याणकारी कामों में जुट जाना चाहिये, उत्साही पुरुष कर्मों में आलस्य नहीं करते।।१३।। पहले (उद्योग करने पर भी) असमृद्धि होने पर भी अपना अपमान न करे। समझदार लोग आपत्काल तथा कष्ट में भी उत्साह नहीं छोड़ते।।१४।। जो बीत गया, उस पर शोक नहीं करना चाहिये। वर्तमान की ही चिन्ता की जाय। सुधी साहस और विवेक से भविष्य को साधे।।१५।। शुभ चाहने वाला अनागत (भविष्य) का प्रबन्ध करे, निरन्तर सत्प्रयत्नों द्वारा आने वाले दुःख का निवारण करे।।१६।। विद्या, सदाचार तथा दृढ़ प्रतिज्ञा से सम्पन्न पुरुष लोकहित, जीविका तथा जीवन के उत्कर्ष के निमित्त नित्य प्रयत्न करता

---

१. शुक्र ४.३११ २. शान्ति. ५६.१६ ३. विदुर. २.८
४. शान्ति. २६६.७३ ५. गीता. २७.२६ ६. गीता २८.२१; गीता १७.२९
७. मनु. २.२ ८. यो. वा. ६.२.२८.८ ९. यो. वा. ६.२.२८.६

[1]राजसं तामसं त्यक्त्वा सात्त्विकं मार्गमास्थितः ।
[2]उद्धरेदात्मनात्मानं लोकस्य हितमाचरेत् ।।१८।।

[3]कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् ।
सद्गुणैश्च पौरुषेण मन्तव्यं सिद्ध्यति ध्रुवम् ।।१९।।

[4]आपत्काले च कष्टेऽपि नोत्साहस्त्यज्यते बुधैः ।
साहसेन विवेकेन भविष्यं साधयेत् सुधीः ।।२०।।

[5]धीमन्तो वन्द्यचरिता मन्यन्ते पौरुषं महत् ।
दुःसाध्यां सिद्धिमायान्ति'' दृढाभ्यासेन सत्कृतैः।।२१।।

[6]दैवं न किञ्चित् कुरुते केवलं कल्पनेदृशी ।
[7]प्राक्तनं पौरुषं तद्वै दैवशब्देन कथ्यते ।।२२।।

[8]मूढैः प्रकल्पितं दैवं तत्परास्ते क्षयं गताः ।
[9]वीराः सम्भावितात्मानो न दैवं पर्युपासते ।।२३।।

[10]दैवायत्तं हि मन्यन्ते नैराश्येन समावृताः ।
[11]ये धीरा ये च विक्रान्तास्तैः किं दैवं प्रतीक्ष्यते ।।२४।।

है।।१७।। स्वतन्त्रता, जनकल्याण, विद्याशील, परिश्रम, सहकारिता तथा सर्वांगीण विकास पौरुष कहलाता है, अर्थात् यही पौरुष के लक्षण हैं।।१८।। बुद्धिमान् पुरुष देश और काल के अनुरूप पराक्रम करे। किसी कार्य को अच्छी तरह सम्पन्न किये बिना न छोड़े, सदा सावधान रहे।।१९।। उसी कार्य को आरम्भ करे, जिसकी समाप्ति सुख से हो जाय। यदि आरम्भ किए काम में बाधा उपस्थित हो जाय, तो साहस नहीं छोड़ना चाहिये।।२०।। खूब सोच समझकर काम करना चाहिये। जल्दी में कोई काम नहीं करना चाहिये। चिरकाल के बाद किसी निश्चय तक पहुँचने पर दीर्घ काल तक पश्चात्ताप नहीं करना पड़ता।।२१।। बुरा काम न करें, क्योंकि बाद में बुरा काम करने वाले को कष्ट होता है। अच्छा काम निश्चय ही करना चाहिए, इसके करने से कष्ट नहीं होता।।२२।। जिससे अयश या अपकर्ष मिले या जिससे मनुष्य कर्तव्य से भ्रष्ट हो जाय, उसे कभी नहीं करना चाहिए।।२३।। जिसके कारण दूसरों की निन्दा करे, उसे स्वयं कभी न करे।

---

१. शान्ति. ३२६.२८ २. गीता ६.५ ३. वा. रा. २.१०९
४. कथासरित्सागर ५. यो. वा. ६.२.६७.३३ ६. यो. वा. २.९.३
७. यो. वा. २.९.६ ८. यो. वा. २.८.१६ ९. वा. रा. २.२३.२६
१०. यो. वा. २.५.२९ ११. यो. वा. २.७.७

[1]परं पौरुषमाश्रित्य प्राक्तनं पौरुषं जयेत्।
[2]दैवं जेतुं यतो यत्नैर्बालो यूनेव शक्यते।।२५।।
[3]कर्मणा जायते सर्वं कर्मैव गतिसाधनम्।
[4]तस्मात् कर्मैव कर्तव्यं नास्ति सिद्धिरकर्मणः।।२६।।

आत्मनिग्रहः

[5]मनःशुद्ध्यैव शुद्धिः स्याद् देहिनां नात्र संशयः।
समाहितं मनश्चैव लभते श्रेय उत्तमम्।।१।।
[6]मनुष्याणां तु सर्वेषां मनश्चञ्चलमस्थिरम्।
शनैः शनैरभ्यासेन मनः कुर्यात् समाहितम्।।२।।
समाहितं यस्य मनः स शान्तः परिचक्षते।
मुदिताऽभयमक्रोधो मौनं च न्यायनिष्ठता।।३।।
सौम्यत्वं भावसंशुद्धिर्विवेको ह्रीरचापलम्।
आर्जवं मार्दवं चैव शान्तस्य सद्गुणाः स्मृताः।।४।।

विद्याचरण-सम्पन्न सद्गुणों द्वारा हित करे।।२४।। विद्वत्ता और श्रम एक दूसरे पर आश्रित हैं। जहाँ नीति और बल दोनों हैं, वहाँ चारों ओर लक्ष्मी प्राप्त होती है।।२५।। सच्चरित्र का योग बुद्धि और साहस का भूषण है। सुधी ज्ञान, साहस तथा चरित्र से सत्कर्म करता है।।२६।। जो काम सत्कार, मान तथा पूजा प्राप्त करने के लिए, बदले में फल मिलने की आशा से तथा पाखण्ड एवं राग-द्वेष से किया जाता है, वह राजसिक कहलाता है।।२७।। जो काम मोह या हठ से, दूसरे किसी का बुरा करने के उद्देश्य से किया जाता है, वह तामसिक कहा जाता है।।२८।। राजसिक तथा तामसिक मार्ग को छोड़कर सात्त्विक मार्ग का अवलम्बन कर अपने से अपना उद्धार करे तथा लोकहित का आचरण करे।।२९।।

निस्सन्देह मन की शुद्धि से ही मनुष्यों (प्राणियों) की शुद्धि होती है। मन को प्रशान्त करने से उत्तम कल्याण प्राप्त होता है।।१।। नि:सन्देह मन और इन्द्रियाँ एक दूसरे पर आश्रित हैं। मन इन्द्रियों का स्वामी है और इन्द्रियाँ उसकी कार्यवाहक हैं।।२।। अपने तथा समाज के उत्कर्ष के निमित्त प्राणायाम, सदाचार, संयम, व्रत, प्रेम, निष्काम भावना, ज्ञान, न्यायनिष्ठा एवं जनकल्याणकारी सत्कार्यों तथा समत्व के अभ्यास द्वारा

---

१. यो. वा. २.५.९ | २. यो. वा. २.६.२९ | ३. वि. पु. १.१८.३२
४. शान्ति. १०.२६ | ५. ज्ञानार्णव, पृ.२३४ | ६. गीता ६.२६

[१]न पीडयेदिन्द्रियाणि न चैतान्यति लालयेत्।
[२]अतोऽप्रमत्तः सेवेत विषयांस्तु यथोचितान्।।५।।

[३]वासना वै प्रयत्नेन योजनीया शुभे पथि।
दृढव्रतेन यत्नाच्च त्यजेद् दुर्व्यसनं सुधीः।।६।।

[४]कायेन संयता धीरा वाचा वै शुभसंयताः।
मनसा संयता ये च ते वै सम्पूर्णसंयताः।।७।।

दान्तश्च सत्त्वसंशुद्धः शान्तश्च दृढनिश्चयः।
[५]विवेकवानुदारात्मा विजितेन्द्रिय उच्यते।।८।।

[६]मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं परमं तपः।
[७]सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः।।९।।

[८]यत्र नीतिबले चोभे तत्र श्रीः सर्वतोमुखी।
[९]नयस्य विनयो मूलं भद्रो विनयेन शोभते।।१०।।

मन को प्रशान्त करे।।३-४।। जिसका मन समाहित है, वही शान्त कहलाता है। मुदिता, भय और क्रोध का अभाव, चिन्तन-मनन, न्यायनिष्ठा, सौम्य भाव, स्वभाव की शुद्धि, विवेक, विनय, चंचलता का अभाव, सरलता, मृदुता, प्रशान्ति ये सद्गुण कहे जाते हैं।।५-६।। मनुष्य न तो इन्द्रियों को पीड़ा दे और न उनके साथ अधिक दुलार करे। सावधान हो विषयों का ठीक ठीक सेवन करे।।७।। निस्सन्देह वासना को प्रयत्न से शुभ पथ में प्रवृत्त किया जाय। बुद्धिमान् दृढ़ संकल्प और यत्न से दुर्व्यसनों को छोड़ दे।।८।।

जीवन के आदर्श के सम्बन्ध में दीर्घ काल से दो मत चले आ रहे हैं—एक वासना के क्षय का सिद्धान्त और दूसरा वासना के शोधन का सिद्धान्त है। आधुनिक विद्वान् वासना के क्षय के बजाय उसकी शुद्धि पर ही जोर देते हैं। उनके विचार में शुद्ध वासना द्वारा ही विश्व-कल्याण या लोक-कल्याण का सम्पादन किया जा सकता है। उसके द्वारा ही जीवन का समोत्कर्ष सम्भव है। वासना के क्षय का लक्ष्य पारलौकिक हो सकता है। लोकयात्रा और लोकहित से उसका कोई सम्बन्ध नहीं है।

जो धैर्यवान् पुरुष शरीर, वाणी और मन से संयत है, वही पूरी तौर पर संयत है।।९।। नियन्त्रण, धैर्य, गम्भीरता, अभय, क्षमा, कोमलता, विनय उदारता, समता,

---

१. शुक्र. ३.१४ | २. शुक्र. ३.१६ | ३. मुक्तिकोपनिषद् २.५.६
४. धम्मपद, कोधवग्गो २४ | ५. यो. वा. | ६. शान्ति. २५०.४
७. गीता १८.२ | ८. शुक्र. २.२७ | ९. कामन्दक २.१९; २.६५

[1]मनः कर्मेन्द्रियं नूनं स्थिते ह्यन्योन्यमाश्रिते ।
इन्द्रियाणां मनो नाथ इन्द्रियं कार्यवाहनम् ।।११।।

चेतोनिरोधो जनयेदिन्द्रियाणां च निग्रहम् ।
समलस्य गुणैर्युक्तौ वर्धयेतां च मङ्गलम् ।।१२।।

दमस्तु निग्रहं धैर्यं गाम्भीर्यमभयं क्षमा ।
मार्दवं ह्रीरकार्पण्यं समता सत्यमार्जवम् ।।१३।।

निष्ठामयोऽयं पुरुषो निष्ठा लोकस्य धारिणी ।
निष्ठाविरहितं कर्म तामसं परिचक्ष्यते ।।१४।।

निष्ठया परया तप्तं क्रियते यद्गुणान्वितैः ।
अफलकाङ्क्षिभिर्युक्तैः कर्म तत्सात्त्विकं स्मृतम् ।।१५।।

लोकनिष्ठा परा निष्ठा तस्याः समुदयः शुभः ।
मानवानां हितार्थाय वृणुयात् सज्जनः सदा ।।१६।।

सदुद्देश्यसमायुक्तः सत्कार्यं कुरुतेऽनिशम् ।
वृत्तेन निष्ठया तप्तो ध्येयं धारयते दृढम् ।।

सदुद्देश्यसमायुक्तं वृत्तशीलगुणान्वितम् ।
व्रतेन श्रद्धया तप्तं यत्कर्म तत्तपः स्मृतम् ।।१७।।

सत्य और सरलता यम के लक्षण हैं।।१०।। दान्त, शान्त, स्वभाव से शुद्ध, दृढ़ निश्चय वाला, विवेकी, उदारात्मा जितेन्द्रिय कहा जाता है।।११।। पुरुष निष्ठामय है। श्रद्धा लोक को धारण करती है। निष्ठाविहीन कार्य तामसिक है।।१२।। जो कर्मफल की आकांक्षा से निर्मुक्त, गुणों से समन्वित तथा उच्चतम श्रद्धा से समायुक्त है, वही सात्त्विक कर्म है।।१३।। लोकनिष्ठा ही उच्चतम निष्ठा है। उसका उदय शुभ है। मनुष्यों के हित के निमित्त सज्जन सदा उसको अपनाये।।१४।। सदुद्देश्य से सम्पन्न सज्जन निरन्तर शुभ कार्य करते हैं, सदाचार और निष्ठा से तपे वे ध्येय को दृढ़ता से धारण करते हैं।।१५।। अपने तथा समाज के उत्कर्ष की सिद्धि के निमित्त व्रत तथा शील से समन्वित वृत्ति, सिद्धि तथा सदाचार विद्वानों द्वारा तप कहलाता है।।१६।। शिष्टाचार, स्वास्थ्य की रक्षा, सदाचार, शौच, पराक्रम, इन्द्रियों का नियन्त्रण, बल और अहिंसा शारीरिक तप हैं।।१७।। विवेक तथा कल्याण से सम्पन्न सत्य वाक्य, स्वाध्याय, कोमलता और

---

१. शान्ति. २६२.२२

शिष्टाचारः स्वास्थ्यरक्षा वृत्तं शौचं पराक्रमः ।
दमो बलमहिंसा च शारीरं तप उच्यते ।।१८।।

वाक्यं विवेकसंयुक्तं सत्यं हितसमन्वितम् ।
स्वाध्यायो मृदुता मौनं वाङ्मयं तप उच्यते ।।१९।।

लोकार्थो न्यायनित्यत्वं समता मुदिता व्रतम् ।
भावशुद्धिर्मनुष्यत्वं तपो मानसमुच्यते ।।२०।।

दृढविश्वाससंयुक्तः सदुद्देश्यगुणान्वितः ।
आशाविभूषितो भावः श्रद्धा निष्ठा प्रकीर्तिता ।।२१।।

निष्ठया दृढसङ्कल्पैर्मन्तव्यार्थस्य सिद्धये ।
निर्णीतकर्मकरणं व्रतं वै समुदाहृतम् ।।२२।।

कर्मयोगः

[1]सर्वथा कर्मसंन्यासात् कर्मयोगो विशिष्यते ।
[2]तस्माद् योगाय युज्येत समो भूत्वा फलं त्यजन् ।।१।।

[3]कर्मयोगाय युज्येत योगः कर्मसु कौशलम् ।
कर्मयोगसमायुक्तः कार्यसिद्धिं लभेत् शुभाम् ।।२।।

कार्यशक्तिं लोकहितं समत्वं न्यायनिष्ठता ।
निष्कामकर्माभिरतिः कर्मयोगः प्रकीर्तितः ।।३।।

मौन वाणी का तप है।।१८।। लोकहित, सदा न्यायप्रवृत्ति, समता, मुदिता, संकल्प, भावशुद्धि, मानवता मन का तप है।।१९।। दृढ़ विश्वास से सम्पन्न, सदुद्देश्य से समन्वित, आशा से विभूषित भाव श्रद्धा (निष्ठा) कहलाता है।२०।। मन्तव्य की सिद्धि के निमित्त श्रद्धा तथा दृढ़ संकल्प से निश्चित कर्म का अनुष्ठान व्रत कहलाता है।।२१।। श्रद्धा, विवेक तथा संकल्प से अपने और समाज के उत्कर्ष के निमित्त सब शक्तियों का प्रयोग व्रत का ध्येय है।।२२।।

विरक्ति और राग को छोड़कर मध्यम वृत्ति (जीवनचर्या) का आचरण करे। समता के भाव से युक्त हो जनमंगल को बढ़ाये।।१।। संन्यास और भोग को छोड़कर मध्यम मार्ग पर चले। निष्काम भाव से युक्त हो कर्तव्य कर्म को करे।।२।। शास्त्र के विद्वान् और लोक के ज्ञाता दोनों ही निष्कामता को बड़ा बताते हैं। मनुष्य निष्काम कर्मों से

---

१. गीता ५.२ २. गीता २.५० ३. गीता २.५०

दृढनिष्ठाविवेकाभ्यां लोकस्योत्कर्षहेतवे ।
प्रयोगः सर्वशक्तीनां व्रतस्य ध्येयमुच्यते ।।

कार्यकर्माभिरमणं व्यवहारान्वितं व्रतम् ।
ज्ञानं कर्मसु कौशल्यं कार्यशीलं प्रशस्यते ।।४।।

कर्तव्यनिष्ठो नापेक्षस्तुष्ठो निष्कामकर्मणा ।
रतो लोकहिते दान्तः कर्मयोगाय कल्पते ।।५।।

निष्कामकर्माभिरतो निर्द्वन्द्वो दृढनिश्चयः ।
न्यायनिष्ठोऽनहंवादी कर्मयोगाय कल्पते ।।६।।

अभ्यासयोगयुक्तेन यतात्मा दृढनिश्चयः ।
निष्कामकर्मसंसिद्धिं कार्यनिष्ठोऽधिगच्छति ।।७।।

योगयुक्तो विशुद्धात्मा सर्वत्र समदर्शनः ।
कार्यं प्रभावसंयुक्तं सहजं कुरुतेऽनिशम् ।।८।।

[1]विदांवरा व्याहरन्ति कृपणाः फलहेतवः ।
[2]युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।।९।।

विरक्तिं रागमुत्सृज्य मध्यां वृत्तिं समाचरेत् ।
युक्तः समत्वभावेन वर्धयेद् जनमङ्गलम् ।।१०।।

ही शुभ उत्कर्ष प्राप्त करता है।।३।। कर्मसंन्यास से कर्मयोग सर्वथा श्रेष्ठ है। इसलिये सम होकर तथा फल को त्याग कर कर्मयोग के लिये जुट जाना चाहिये।।४।। कर्मयोग के लिये जुट जाय, योग ही कर्मों में कुशलता है। कर्मयोग में संलग्न व्यक्ति उत्तम कार्यसिद्धि प्राप्त करता है।।५।। कार्यों में संलग्न पर व्यक्तिगत स्वार्थ कामनाओं से रहित समत्त्वयोग में परायण ही योगयुक्त कहलाता है।।६।। समता, सत्य, निष्काम निष्ठा तथा मानवता से सम्पन्न, सदा लोकहित में संलग्न पुरुष कर्मयोगी है।।७।। निष्काम भावना से सम्पन्न, श्रेष्ठ श्रद्धा से तप्त तथा कर्तव्य-बुद्धि से किया काम योगयुक्त कहा जाता है।।८।। सदुद्देश्य से सम्पन्न तथा स्वार्थ और अहङ्कार से मुक्त लोकहित में किया गया कर्म ही निष्काम कर्म है।।९।। प्रत्येक मनुष्य लक्ष्य की सिद्धि के निमित्त नित्य काम करता ही रहता है। कर्मफल में चिन्ता और उत्तेजना का अभाव निष्कामत्व कहलाता है, अर्थात् निष्काम कर्म भी किसी लक्ष्य की सिद्धि के लिये ही किया जाता है, पर उसमें दूसरे कामों की तरह कर्मफल की व्यग्रता नहीं होती।।१०।।

---

१. गीता २.४९ २. गीता ५.१२

संन्यासं योगमुत्सृज्य मध्यां वृत्तिं समाचरेत्।
युक्तो निष्कामभावेन कार्यं कर्म समाचरेत्।।११।।

[1]शास्त्रज्ञाता च लोकज्ञो नैष्कर्म्यं विन्दते परम्।
[2]नैष्कर्म्यं लभते सिद्धिं रोचनार्था फलश्रुतिः।।१२।।

क्रियासु युक्तचेष्टो वै साम्ययोगपरायणः।
[3]निस्पृहः सर्वकामेभ्यो योगयुक्तः प्रकीर्तितः।।१३।।

नियन्त्रितमना योगी निस्पृहः सर्वकर्मसु।
समत्वं सेवते नित्यं सङ्क्लेशेनापराजितः।।१४।।

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
सेवते जनकल्याणं वेदपुण्यमनाश्रितः।।१५।।

महात्मा गाँधी ने श्रीमद्भगवद्गीता के इस विचार की पुष्टि करते हुए कहा है कि गीता के अनुसार जो कर्म को छोड़ता है, उसका पतन होता है। जो कर्मफल को छोड़ता है, वह ऊपर उठता है। पर फल के परित्याग का अर्थ परिणाम के प्रति उदासीनता नहीं है। प्रत्येक कार्य के सम्बन्ध में उसके सम्भावित परिणाम, उसके उपाय तथा उसकी क्षमता की जानकारी आवश्यक है। जो व्यक्ति इन सबसे समन्वित हो, उपस्थित कार्य की पूर्ति में पूरी तौर पर संलग्न है, परिणाम की इच्छा से रहित है, उसने ही काम के फल का परित्याग किया है। फल के त्याग का यह अर्थ नहीं कि परित्यागी को फल प्राप्त नहीं होगा।... उसे तो वास्तव में हजार गुना फल मिलता है। गाँधी जी कहते हैं कि जो फल की चिन्ता करता है, वह कर्तव्य के पालन में प्रायः धैर्य छोड़ देता है। वह व्यग्र हो जाता है, क्रोध से भर जाता है और अनुचित कार्य करने लगता है तथा किसी एक कार्य के प्रति निष्ठावान् न रहकर एक कार्य से दूसरे पर कूदता है।

कार्यशीलता, लोकहित, समता, न्यायनिष्ठा, निष्काम कर्म के प्रति रुचि कर्मयोग कहा जाता है, अर्थात् ये सब कर्मयोग के लक्षण हैं।।११।। कर्तव्य कर्म में संलग्नता, व्यावहारिकता, व्रत, कर्मों का ज्ञान और कुशलता कार्यशीलता कही जाती है।।१२।। लोकहित में संलग्न, संयमी, निष्काम कर्म से सन्तुष्ट, कर्तव्यनिष्ठ, इच्छारहित व्यक्ति कर्मयोग के लिये अनुष्ठान करता है, अर्थात् कर्मयोग के लिये कर्तव्यनिष्ठा, निस्पृहता तथा निष्काम कर्म में रुचि आवश्यक है।।१३।। अभ्यास, संयम, व्रत तथा न्याययुक्त कार्यों से कर्मण्य निःसन्देह निष्कामत्व प्राप्त करता है।।१४।। योगी लोग अनासक्त हो आत्मशुद्धि, लोकहित तथा न्याय को प्रतिष्ठित करने के निमित्त कर्म करते हैं।।१५।।

---

१. भागवत ११.३.४२ २. भागवत ११.३.४६ ३. गीता ६.१७

कर्मयोगी यमी वीरो निर्ममो निरहङ्कृतः ।
प्रतिष्ठापयते न्यायं समत्वं जगतो हितम् ।।१६।।

[1]युक्ताचारविहारस्य युक्तचेष्टस्य कर्मसु ।
निष्कामभावयुक्तस्य योगो भवति दुःखहा ।।१७।।

[2]योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये ।
लोकस्य संग्रहार्थं च न्यायस्थापनहेतवे ।।१८।।

योगिनो ज्ञानसम्पन्ना मानवानां हिते रताः ।
समाः सर्वेषु लोकेषु निर्द्वन्द्वा निरहङ्कृताः ।।१९।।

न्यायनिष्ठा मुक्तसङ्गा निर्भीकाः शीलसंयुताः ।
सिद्ध्यसिद्ध्योर्निर्विकाराः सिद्धा निष्कामकर्मसु ।।२०।।

[3]सततं भूतिकर्माणि योगयुक्तः करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ।।२१।।

समभावसमायुक्तः कार्यं कर्म करोति यः ।
[4]अनाश्रितः कर्मफलं स योगी परमो मतः ।।२२।।

कल्याणार्थाय जीवानां साम्यस्थापनहेतवे ।
कुरुते कार्यकर्माणि योगयुक्तो महामनः ।।२३।।

निष्ठया परया तप्तं निष्कामत्वसमन्वितम् ।
कर्तव्येन कृतं कर्म योगयुक्तं प्रकीर्तितम् ।।२४।।

जो व्यक्ति कर्मफल का आश्रय छोड़कर समभाव से समन्वित हो कर्तव्य कर्मों को करता है, वही परम योगी है।।१६।। योगी लोग ज्ञानसम्पन्न, मनुष्यों के हित में संलग्न, सब में समता का अनुभव करने वाले, निर्द्वन्द्व, निरहङ्कारी, न्यायशील, आसक्ति से मुक्त, निर्भीक, शीलवान्, सिद्धि तथा असिद्धि में निर्विकार एवं निष्काम कर्म में सिद्ध होते हैं।।१७-१८।। प्राणियों के कल्याण तथा समत्व की स्थापना के निमित्त कर्मयोग में युक्त महापुरुष कर्तव्य कर्मों को करता है।।१९।। कार्यनिष्ठ कर्मयोग द्वारा लोकहित साधता है तथा न्याय, समता एवं जगत् का हित प्रतिष्ठापित करता है।।२०।। निर्द्वन्द्व, निरहंकारी, संयमी, वीर कर्मयोगी न्याय, समता तथा विश्वकल्याण को प्रतिष्ठित करता

---

१. गीता ६.२७ २. गीता ५.२२ ३. गीता ६.२
४. गीता ६.२

सदुद्देश्यसमायुक्तं सङ्गं त्यक्त्वा फलं तथा।
व्रतेन क्रियते यत्तत् निष्कामं कर्म वै स्मृतम्।।२५।।

पुरुषो लक्ष्यसिद्ध्यर्थं कर्माणि कुरुतेऽनिशम्।
अनुद्वेगः कर्मफले निष्कामत्वमुदाहृतम्।।२६।।

आत्मौपम्येन सर्वत्र समं पश्यति साधकः।
निष्कामकर्माभिरतो भवे चरति नित्यशः।।२७।।

समाजः

समं जना अजन्त्यस्मिन् समाजः प्रतिपद्यते।
सहकार्यं समोत्कर्षो न्यायः शीलं पराक्रमः।।१।।

स्वराज्यं समताराज्यं कर्तव्ये दृढनिष्ठता।
ज्ञानं शिवं मनुष्यत्वं समाजस्य सुलक्षणम्।।२।।

समाजो मानवो नित्यं स्थितावन्योन्यसंश्रयात्।
ततस्तयोः समायोगाद् राष्ट्रोत्कर्षः समृद्ध्यति।।३।।

सहयोगात् समाजस्य पौरुषं सिद्ध्यति स्फुटम्।
पौरुषेणैव सर्वस्य हितं लोकस्य सिद्ध्यति।।४।।

समाजे मानवः शान्तिं सुखं ज्ञानं च विन्दति।
मानवानां पौरुषेण समाजः सम्प्रवर्धते।।५।।

है।। कर्मयोग से लोकहित के निमित्त कार्यनिष्ठा सिद्ध होती है। कल्याण में निष्ठावान् योगी जनमङ्गल को बढ़ाता है।।२१।।

कर्मयोग के ज्ञान के लिये लोकमान्य बाल गंगाधर तिलक की टीका सहित श्रीमद्भगवद्गीता का अध्ययन लाभप्रद है।

जिसमें सब लोग समान रूप से जाने जाते हैं, वह समाज कहलाता है। सहकारिता, सम्यक् उत्कर्ष, न्याय, शील, पराक्रम, स्वतन्त्रता, समता, प्रेम, कर्तव्य में दृढ़ निष्ठा, ज्ञान, कल्याण, मनुष्यता—ये समाज के शुभ लक्षण हैं, अर्थात् अच्छे समाज के ये गुण हैं।।१-२।। समाज और मानव नित्य एक दूसरे पर आश्रित हैं। उन दोनों के संयोग से राष्ट्र का उत्कर्ष सम्यक् रूप से बढ़ता है।।३।। समाज के सहयोग से पुरुषार्थ निश्चय ही सिद्ध होता है। पुरुषार्थ से ही सारे समुदाय का हित सिद्ध होता है।।४।। समाज में मनुष्य शान्ति, सुख तथा ज्ञान को प्राप्त करता है। मनुष्यों के

समाजमानवोत्थानं राष्ट्रोत्थानं प्रकीर्तितम् ।
तस्मात्तयोः समुत्थाने प्रयत्नं कुरुते सुधीः ।।६।।

नैष्ठिको ज्ञानसम्पन्नः सङ्कष्टेनापराजितः ।
विद्यया कर्मणा शीलै राष्ट्रोत्थानं विवर्धयेत् ।।७।।

अन्योऽन्यसहकार्यं तत् सकलं राष्ट्रवर्धनम् ।
सहयोगादभ्युदयो यशः शान्तिश्च वर्धताम् ।।८।।

[१]न विशेषोऽस्ति वर्णानां सर्वं मानुष्यमूलकम् ।
मानुष्यं सर्ववर्णानां मानवानां परो गुणः ।।९।।

भवे वैभिन्यसंयुक्ते साधवः समदर्शिनः ।
मानसत्कारसेवाभिर्मानुष्यं विन्दते सुधीः ।।१०।।

सज्जनः सम्यगाचारो रक्षयेन्नरगौरवम् ।
संवर्धयेद्धि बन्धुत्वमेकत्वं जनमङ्गलम् ।।११।।

[२]कर्मशीलगुणाः पूज्यास्तथा जातिकुले नहि ।
[३]न वर्णतो न जनकाद् ब्रह्मतेजः प्रपद्यते ।।१२।।

[४]न यस्य जन्मकर्मभ्यां न वर्णाश्रमजातिभिः ।
सज्जते हृद्यहंभावः स वै सत्पुरुषः स्मृतः ।।१३।।

पुरुषार्थ से समाज की अभिवृद्धि होती है।।५।। समाज और मानव दोनों का उत्कर्ष राष्ट्र का उत्थान कहलाता है। इसलिये बुद्धिमान् दोनों के ठीक ठीक उत्थान के लिये प्रयत्न करते हैं।।६।। ज्ञानसम्पन्न मानव संकष्टों से बिना पराजित हुए विद्या, कर्म और शील से राष्ट्र के उत्थान को बढ़ायें।।७।। पारस्परिक सहयोग सारे राष्ट्र की अभिवृद्धि करता है। सहयोग से अभ्युदय, यश और शान्ति प्राप्त होती है।।८।। समाज की अच्छी व्यवस्था के बिना किसी को सुख प्राप्त नहीं होता। स्वतन्त्रता और समता का अपहरण कर अच्छी सामाजिक व्यवस्था सिद्ध नहीं होती।।९।। राष्ट्र की सेवा, समोत्कर्ष और आनन्दमय जीवन सबका अधिकार और कर्तव्य हैं।।१०।। संसार में समष्टिवादी और व्यक्तिवादी दो प्रकार के दृष्टिकोण हैं। व्यक्तिभाव अहंकार और मद को पैदा करता है। समष्टिभाव मानव के व्यक्तित्व का अपहरण करता है। इन दोनों के

---

१. शान्ति. २. शुक्र. २.५५ ३. शुक्र. १.३९
४. भागवत ११.२

यस्य कस्य च वर्णस्य ज्ञानं देहे प्रतिष्ठितम् ।
तस्य कीर्तिर्यशो मानं विराजन्ते हि सर्वशः ।।१४।।

यो नरः संयमे सत्ये सत्कार्ये सततोत्थितः ।
स श्रेष्ठत्वमवप्नोति [१]वृत्तेन हि भवेद् द्विजः ।।१५।।

संयोग में ही लोकहित निहित है। निःसन्देह व्यष्टि और समष्टि की मर्यादित भावनाएँ ही संसार का हित, सौहार्द, व्यक्तित्व और लोकमंगल को बढ़ाती हैं।।११-१४।। समष्टि और व्यष्टि (समाज और व्यक्ति) का सामञ्जस्य संवृद्धि और आनन्द का कारण है। समाज के हित में संलग्नता कल्याण और उत्कर्ष का साधन है।।१५।।

व्यक्ति और समष्टि के पारस्परिक सम्बन्ध के प्रश्न पर चिरकाल से कई विचारधाराएँ प्रचलित हैं। कुछ विद्वान् व्यक्ति को समाज का मूल आधार स्वीकार करते हुए व्यक्तिवाद को पुष्ट करते हैं। उनके विचार में समाज व्यक्तियों का समूह है, प्रत्येक मनुष्य स्वतः उद्देश्य स्वरूप है, व्यक्तिगत प्रेरणा और स्वार्थ ही सामाजिक प्रक्रियाओं का मूल स्रोत है, व्यक्तिगत हितों की उपलब्धि में रुकावटों को दूर करना ही सामाजिक व्यवस्था का प्रमुख उद्देश्य है। अन्य विद्वान् व्यक्ति के बजाय समष्टि की प्रधानता स्वीकार करते हुए समष्टिवाद को पुष्ट करते हैं। ये विचारक व्यक्ति को समष्टि का अवयवमात्र समझते हैं। व्यक्तिगत मानस को समष्टि के लोकमानस की कृति मानते हैं, समष्टि के उद्देश्य की सिद्धि ही व्यक्ति की वृत्ति स्वीकार करते हैं। कुछ दूसरे विद्वान् व्यक्ति और समष्टि दोनों के महत्त्व को स्वीकार करते हुए, दोनों को अपनी गति, प्रगति के लिये अन्योन्याश्रित समझते हैं, संसार के समस्त व्यापार को मानस और समाज दोनों की क्रिया-प्रतिक्रिया का परिणाम मानते हैं। इनके विचार में लोकमानस और व्यक्तिगत मानस दोनों के महत्त्व को स्वीकार करते हुए 'व्यक्ति और समष्टि' की मान-मर्यादाओं में सामंजस्य आवश्यक समझते हैं। अतिव्यक्तिवाद और अतिसमष्टिवाद दोनों ही दोषपूर्ण हैं। जहाँ मानव साधन और साध्य दोनों है, व्यक्तित्व के विकास के लिये नैतिक, बौद्धिक और कलात्मक जीवन की अभिव्यक्ति का पूरा और स्वतन्त्र अवसर आवश्यक है, वहाँ 'मनुष्य सामाजिक प्राणी है', समाज मनुष्य के जीवन का अनिवार्य तत्त्व है, मानवीय गुणों की सृष्टि समाज में ही होती है। समग्र की पूर्णता में ही व्यक्ति की पूर्णता है, समाज का अंग होकर ही, अपने संकुचित स्वार्थ का परित्याग करके ही सहयोगयुक्त मानव कल्याण के प्रयासों द्वारा ही, व्यक्ति अपनी पूर्णता प्राप्त कर सकता है। (देखें—"आचार्य नरेन्द्रदेव – युग और नेतृत्व", पृ. ४६२-४६५)

---

१. भागवत ११.७.१०

आदौ कृतयुगे वर्णो नृणां हंस इति स्मृतः ।
[1]मनुष्यास्तु तथा शान्ता निर्वैराः सुहृदः समाः ।।१६।।

सुव्यवस्थां समाजस्य विना सौख्यं न कस्यचित् ।
स्वातन्त्र्यं समतां हित्वा सा व्यवस्था न सिद्ध्यति ।।१७।।

राष्ट्रसेवा समोत्कर्षः सानन्दं जीवनं तथा ।
उदाहरन्ति सर्वेषामधिकारान् कृतानि च ।।१८।।

व्यष्टेश्चैव समष्टेश्च दृष्टी द्वे जगतो मते ।
व्यष्टिभावो ह्यहङ्कारं सृजत्येव मदं तथा ।।१९।।

दृढं समष्टिभावश्च व्यक्तित्वं हरतेऽनिशम् ।
संयोगे हि तयोरेव निहितं लोकमङ्गलम् ।।२०।।

भावौ मर्यादितौ नूनं सेवेते जगतो हितम् ।
वर्धयेते हि सौहार्दं व्यक्तित्वं लोकमङ्गलम् ।।२१।।

वर्णों की कोई विशेषता नहीं, सभी मनुष्यतामूलक हैं। मनुष्यता ही सब वर्णों के मनुष्यों का बड़ा गुण है।।१६।। विभिन्नतासम्पन्न संसार में साधु लोग समदर्शी होते हैं। बुद्धिमान् मान-सत्कार तथा सेवा से मनुष्यता की आराधना करते हैं।।१७।। शुद्ध आचारवान् सज्जन मानव-गौरव की रक्षा करे, बन्धुता, एकता तथा जनकल्याण की वृद्धि करें।।१८।। जिसके हृदय में जन्म, कर्म, वर्ण, आश्रम तथा जाति से अहंकार नहीं होता, वही निस्सन्देह सज्जन है।।१९।। जो व्यक्ति संयम, सत्य तथा सत्कार्य में सदा संलग्न (उत्थित) है, वह श्रेष्ठता को प्राप्त करता है। सदाचार से द्विजत्व (श्रेष्ठता) की प्राप्ति होती है।।२०।। प्रारम्भ में कृतयुग (सत्य युग) में सब व्यक्तियों का हंस वर्ण था। उस समय जब मनुष्य शान्त, निर्वैर, सुहृद् और समान थे।।२१।।

वर्णव्यवस्था के सम्बन्ध में विद्वानों में काफी मतभेद हैं, पर सभी स्वीकार करते हैं कि प्रारम्भ में वर्णों का भेद नहीं था। श्रीमद्भागवत के साथ साथ महाभारत के शान्तिपर्व में भी इसे स्वीकार किया गया है। (देखें शान्तिपर्व) जिन विद्वानों ने चातुर्वर्ण्यव्यवस्था की मान्यता स्वीकार की है, उनमें से ही बहुतों ने ज्ञान, भक्ति तथा सदाचार की श्रेष्ठता स्वीकार करते हुए सब वर्णों के ज्ञानी और भक्तों की श्रेष्ठता को मान्यता दी है। (भागवत ७.९.१०)। ज्ञानी और भक्त के लिये वर्ण और जन्म के

---

१. भागवत ११.५.२२

अहंकार का त्याग आवश्यक बताया है। शान्तिपर्व आदि कतिपय शास्त्रों में आचार को ही द्विजत्व का आधार बताकर नैतिक गुणों के आधार पर विभिन्न वर्णों की व्याख्या की गयी है। शान्तिपर्व में यह स्वीकार करते हुए कि सभी वर्णों के मनुष्य मूलतः 'ब्रह्मज' हैं, क्षमता और व्यवसाय के आधार पर कालान्तर में वर्णों की उत्पत्ति का विश्लेषण किया गया है। (देखें शान्तिपर्व) कतिपय विद्वानों ने गुण, कर्म और स्वभाव को ही वर्णों की विभिन्नता का आधार बताया है। (देखें गीता, शुक्रनीति)। दूसरे विद्वान् इस आधार को स्वीकार करके पुनर्जन्म के सिद्धान्त को मान्यता प्रदान करते हुए कहते हैं कि जीव अपने पूर्वजन्म के संचित कर्म और गुण के आधार पर विभिन्न वर्णों में जन्म लेता है और इस तरह जन्म वर्ण का आधार बन जाता है। पर व्यवहार में जन्म का गुण, कर्म तथा स्वभाव से अनिवार्य सम्बन्ध दिखाई नहीं पड़ता। एक ही परिवार में विभिन्न गुण और स्वभाव के व्यक्ति जन्म लेते हैं, विशिष्ट वर्ण से सम्बन्धित कुलों में बहुत से ऐसे मनुष्य जन्म लेते हैं, जिनके गुण, कर्म और स्वभाव वर्णविशेष के गुणों और लक्षणों के विपरीत होते हैं। इस बात को ध्यान में रखते हुए श्रीमद्भागवत आदि ग्रन्थों में द्विज-परिवारों के गुणविहीन, आचारहीन व्यक्तियों को 'द्विजबन्धु' की संज्ञा प्रदान की गयी है और उन्हें ज्ञान के क्षेत्र में शूद्रवत् बताया है। (देखें श्रीमद्भागवत)। यह भी बताया है कि 'जिस पुरुष के वर्ण का जो लक्षण कहा गया है, वह यदि दूसरे में पाया जाय, तो उसे भी उसी वर्ण का मानना चाहिये (भागवत ७.११.३५)। अत्रिसंहिता में जहाँ 'जन्मना ब्राह्मण' के सिद्धान्त को स्वीकार किया गया है, वहाँ कहा गया है कि संस्कारों से द्विजत्व और विद्या से विप्रत्व प्राप्त होता है (अत्रिसंहिता १४१-१४२) और आचरण के भेद से जन्मना विप्र दस प्रकार के हो सकते हैं (देखें अत्रिसंहिता ३७२-३८२)। इस तरह शास्त्रकारों ने स्वीकार किया है कि आचार की शुद्धि द्वारा साधारण मनुष्य द्विजत्व प्राप्त कर सकता है और विपरीत आचरण, गुण, कर्म और स्वभाव से ब्राह्मण वर्ण में जन्मा व्यक्ति म्लेच्छ तथा चाण्डाल भी बन सकता है। विभिन्न वर्णों की उत्पत्ति से सम्बन्धित एक वेदमन्त्र के आधार पर बहुत से विद्वान् समाज में वर्णों का स्थान तथा उनकी ऊँच-नीच स्थिति को निर्धारित करते हैं। पर आचार्य आनन्दशंकर बापुभाई ध्रुव आदि विद्वानों के विचार में इस मन्त्र का मूल उद्देश्य सब वर्णों को 'ब्रह्मज' बताते हुए अवयवी के आधार पर उनमें और समाज में एकता प्रतिष्ठित करना है। जो भी हो, वैषम्यसम्पन्न श्रेणीबद्ध समाज एक ऐसे सिद्धान्त को मान्यता प्रदान कर सकता है तथा उसकी पुष्टि कर सकता है, जो समाज में जन्म से व्यक्ति का स्थान निर्धारित करता है, ऊँच-नीच के सिद्धान्त को पुष्ट करता है तथा समान सुविधा से बहुत से व्यक्तियों को वर्जित कर देता है। समत्व पर आधारित जनतान्त्रिक समाज तो उसी सिद्धान्त को स्वीकार कर सकता है, जो एकत्व की पुष्टि

समाजोत्कर्षः

सततं पौरुषं कालः स्थिते ह्यन्योन्यसंश्रयात् ।
ततस्तयोः समायोगादुत्थानं सम्प्रवर्धते ।।१।।

संस्कारः करणं चैव स्थितिः कालः प्रकीर्तितः ।
नराणां विविधाश्चेष्टाः पौरुषं परिकीर्तितम् ।।२।।

स्वभावः पौरुषं कालः सर्वमत्र प्रयच्छति ।
परमेतेषु सर्वेषु पौरुषं वै विशिष्यते ।।३।।

स्वभावविजयः शौर्यं संयमेन च सत्कृतैः ।
अभ्यासेन विवेकेन जयं प्राप्नोति मानवः ।।४।।

करे और सबको समान रूप से अपने मनुष्यत्व की अभिव्यक्ति और विकास की सुविधा प्रदान करे तथा लोकहित की वृद्धि करते हुए समत्व की सिद्धि का अवसर दे, जिससे जन्म के बजाय आचरण तथा समाजसेवा के आधार पर समाज में व्यक्ति का पद निर्धारित हो, गुण और स्वभाव के आधार पर मानव का कार्यक्षेत्र निश्चित हो एवं समाजोपयोगी कार्य को सम्मान प्राप्त हो।

पौरुष और काल निरन्तर एक दूसरे पर आश्रित हैं। इन दोनों के संयोग से ही उत्कर्ष होता है।।१।। संस्कार, उपकरण और परिस्थिति **काल** कहलाता है। पुरुषों की विभिन्न चेष्टाएँ **पौरुष** कहलाती हैं।।२।।

प्राचीन भारतीय विद्वानों ने काल शब्द का विभिन्न अर्थों में प्रयोग किया है। इस पुस्तक में ऊपर लिखे अर्थ में ही 'काल' शब्द प्रयुक्त हुआ है।

स्वभाव, पौरुष और काल तीनों ही सब चीजों को नियन्त्रित करते हैं, पर इनमें पौरुष का विशेष स्थान है।।३।। स्वभाव पर विजय शौर्य है। संयम, सत्कार्य, अभ्यास और विवेक द्वारा मानव स्वभाव पर विजयी हो सकता है, अर्थात् निरन्तर अभ्यास से संयमी पुरुष विवेक और सत्कार्य से स्वभाव को बदल सकता है।।४।।

कुछ विद्वानों का ऐसा मत है कि स्वभाव को बदलना असम्भव है और स्वभाव के विपरीत कार्य अप्राकृतिक है। पर बहुत से विद्वानों का विचार है कि जहाँ मानव-स्वभाव मानव क्रियाकलापों को नियन्त्रित करता है, वहाँ सामाजिक परिस्थितियाँ और मानव-प्रयत्न भी मानव-स्वभाव को प्रभावित करते हैं। स्वभाव वास्तव में काल और पौरुष की क्रिया-प्रतिक्रिया की पृष्ठभूमि में सहज प्रवृत्तियों का संघात है।

स्वभावप्रेरितं कर्म बुद्धिः कालानुसारिणी ।
[1]तथापि सुधियश्चार्याः सुविचार्यैव कुर्वते ।।५।।

पुरुषः पौरुषेणैव सर्वार्थमधिगच्छति ।
प्राप्यते कर्मणा सर्वं न कालादकृतात्मनः ।।६।।

यत्नो हि सततं कार्यस्ततः कालेन सिद्ध्यति ।
[2]पौरुषेणैव रूपेण नियतिर्हि नियामिका ।।७।।

समाजलक्ष्यसिद्ध्यर्थं समाजोत्कर्षहेतवे ।
[3]देशकालबलं ज्ञात्वा सर्वकार्याणि साधयेत् ।।८।।

कर्म स्वभावप्रेरित है और बुद्धि परिस्थिति और संस्कार का अनुसरण करती है, फिर भी बुद्धिमान् श्रेष्ठ पुरुष ठीक तौर पर विचार करके ही सब काम करते हैं।।५।।

भर्तृहरि जी ने नीतिशतक में कहा है —

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ।। (नीति. ८९)

मनुष्यों को फलप्राप्ति कर्म के अनुसार होती है और बुद्धि कर्म के अनुसार ही चलती है, फिर भी बुद्धिमान् को विचारपूर्वक काम करने वाला ही होना चाहिये। अर्थात् यद्यपि हमारी बौद्धिक प्रक्रियाएँ स्वभाव, काल और कर्म से बहुत हद तक प्रभावित होती हैं, फिर भी बुद्धिमान् को यथासम्भव विचार से काम लेना चाहिये, अच्छी तौर पर विचार करके निर्णय करना चाहिये।

पुरुष पौरुष से ही सब उद्देश्यों को प्राप्त करता है, कर्म से ही सब कुछ मिलता है, कर्महीन काल से कुछ प्राप्त नहीं करता, अर्थात् यद्यपि मानव जीवन और क्रियाकलाप काल यानी परिस्थितियों और साधनों से प्रभावित होते हैं, पर बिना प्रयत्न के परिस्थितियों और साधनों से काम नहीं चल सकता, उनका सदुपयोग करके ही आगे बढ़ा जा सकता है। संस्कारों को भी कर्म की अपेक्षा होती है। कर्मविहीन संस्कार अर्थहीन है।।६।। सदा प्रयत्न किया जाय, तब काल से सिद्धि होती है। नियति भी पुरुषार्थ के रूप से ही जगत् का नियन्त्रण करती है, अर्थात् नियति को भी पुरुषार्थ की जरूरत होती है। परिस्थिति और उपकरणों को यत्न की अपेक्षा होती है।।७।। समाज के लक्ष्य की सिद्धि तथा उसके उत्कर्ष के निमित्त देश, काल और बल को जानकर सब कामों को साधा जाय। कार्य की सिद्धि के लिये देश, काल और बल का ज्ञान

---

१. चाणक्य १३.१८ २. यो. वा. ३.६२.८७ ३. चाणक्य ६.१७

[१]वार्त्ता प्रजां साधयति वार्त्ता वै लोकसंश्रयः ।
तथा मतिर्यथा वृत्तिरित्येव मुनिनोच्यते ।।९।।

[२]वार्त्तामूलो ह्ययंलोकोऽर्थो हि कालस्य कारणम् ।
अर्थे व्यवस्थितं राज्यं सौख्यं च लोकमङ्गलम् ।।१०।।

अर्थानुरूपो वै राज्यं न्यायस्तदनुगच्छति ।
यथा न्यायस्तथा रक्षाऽधिकारो गौरवं तथा ।।११।।

अर्थव्यवस्था न्यायश्च स्थितावन्योन्यसंश्रयात् ।
धनात् प्रभावितो न्यायो धनं न्याये प्रतिष्ठितम् ।।१२।।

आवश्यक है, अर्थात् परिस्थितियों की कठिनाइयों और सम्भावनाओं तथा व्यक्तिगत और सामाजिक शक्तियों और क्षमताओं को ध्यान में रखे बगैर काम करना उचित नहीं है। उपलब्ध उपकरणों, परिस्थिति की सम्भावनाओं, सामाजिक शक्ति तथा व्यक्तिगत क्षमता का विकास और सदुपयोग ही सफलता की कुंजी है।।८।। वार्ता, अर्थात् व्यवसाय ही प्रजा को साधती है, वार्ता ही लोक को आश्रित करती है। विद्वानों का कहना है कि जैसा व्यवसाय वैसी मति होती है, अर्थात् उद्योग-व्यवसाय लोक का आधार तथा व्यक्ति के जीवन का साधन है। मनुष्य की चिन्तन-धारा उससे प्रभावित होती है। जीवन-निर्वाह से सम्बन्धित क्रियाकलापों की बुद्धि पर छाप पड़ती है। विभिन्न व्यवसायों से सम्बन्धित समुदायों के सोचने का अपना ढंग होता है।।९।। जीविका की व्यवस्था ही इस जगत् का मूल है। आर्थिक व्यवस्था ही काल का कारण है। आर्थिक व्यवस्था पर ही राज्य की व्यवस्था, सुख और लोक-कल्याण आश्रित हैं।।१०।।

बहुत से प्राचीन विद्वानों ने राज्य को काल का कारण बताया है। पर ऐतिहासिक प्रक्रियाओं के वैज्ञानिक विश्लेषण के बाद समाजशास्त्र के आधुनिक विद्वान् इस निष्कर्ष पर पहुँचे हैं कि राजनीतिक व्यवस्था स्वयं आर्थिक व्यवस्था पर आश्रित है, आर्थिक परिस्थिति और उपकरण संस्कारों का निर्माण करते हैं, समाज की गति-विधि और स्वरूप को प्रभावित करते हैं। सांसारिक सुख और कल्याण तो आर्थिक साधनों पर ही निर्भर है।

आर्थिक व्यवस्था के अनुरूप ही राज्य की व्यवस्था होती है, न्याय राज्य के समरूप होता है और जैसी न्यायव्यवस्था होती है, वैसी ही मनुष्य की रक्षा तथा उसके अधिकार और गौरव, अर्थात् मान-मर्यादा होती है।।११।। अर्थव्यवस्था और न्याय

---

१. कामन्दक १३.२७ २. शान्ति. ६८.३५

न्याये चार्थोपकरणे लोकन्यायो विशिष्यते।
न्याये प्रतिष्ठितोऽर्थो हि वर्धते लोकमङ्गलम्।।१३।।

न्यायो वै गतिशीलश्च क्रियाशक्तिसमन्वितः।
सम्पन्नश्चाधिकारेण तत्प्रभावो विशेषतः।।१४।।

सर्वे विकाससम्पन्नाः क्रियागतिसमन्विताः।
प्रभावयन्ति चान्योन्यं विकसन्ति च सर्वशः।।१५।।

सुखदुःखे विषादश्च रागद्वेषौ हिते रतिः।
उल्लासः क्रोधहर्षौ च क्रूरता करुणा क्षमा।।१५।।

एक दूसरे पर आश्रित हैं। धन से न्याय प्रभावित होता है और धन न्याय में प्रतिष्ठित है, अर्थात् आर्थिक-व्यवस्था का न्याय-व्यवस्था पर गहरा प्रभाव है। सामन्तशाही और पूंजीवादी आर्थिक-व्यवस्थाओं की न्याय-व्यवस्था भिन्न हैं, उनमें मौलिक भेद है। प्रत्येक आर्थिक-व्यवस्था को अपनी रक्षा और प्रगति के लिये समरूप न्याय-व्यवस्था की आवश्यकता होती है।।१२।। न्याय और आर्थिक उपकरणों में लोकन्याय प्रमुख है। लोकन्याय पर आश्रित अर्थ-व्यवस्था ही लोकमंगल को बढ़ाती है।।१३।।

एकमात्र ऐतिहासिक दृष्टि से न्याय की प्रमुखता सिद्ध करना कठिन है। पर नैतिक दृष्टि से लोकन्याय अवश्य ही आर्थिक उपकरणों और साधनों से अधिक महत्त्वपूर्ण है। उपकरणों और साधनों का न्यायपूर्ण उपयोग ही लोक के कल्याण की अभिवृद्धि कर सकता है। (लोकन्याय के स्वरूप के सम्बन्ध में पुस्तक के न्याय-प्रकरण को देखें)

न्याय गतिशील तथा क्रिया और शक्ति से सम्पन्न है। अधिकार से सम्पन्न होने के कारण उसका विशेष प्रभाव है।।१४।। सभी विकास-सम्पन्न तथा क्रिया और गति से समन्वित हैं। वे एक दूसरे को प्रभावित करते हैं और सब ओर विकसित होते रहते हैं।।१५।।

आर्थिक प्रक्रियाओं का अन्य सामाजिक प्रक्रियाओं पर गहरा प्रभाव पड़ता है। अन्य प्रक्रियाएँ और संस्थाएँ आर्थिक प्रक्रिया के समरूप होती हैं और आर्थिक व्यवस्था के मौलिक परिवर्तन के साथ साथ बदलती रहती हैं। पर अन्य सामाजिक प्रक्रियाएँ केवल यन्त्रवत् काम नहीं करतीं, उनकी अपनी गति और शक्ति होती है। वे अपनी आन्तरिक शक्ति से भी विकसित होती हैं और एक दूसरे को भी प्रभावित करती हैं। इनमें न्याय का विशिष्ट स्थान है, क्योंकि अन्य संस्थाओं की तुलना में वह अधिक शक्तिसम्पन्न है और उसकी शक्ति अधिक व्यापक है।

समवायश्च सङ्घर्षः प्रीतिलाभौ च मत्सरः ।
उत्कर्षश्चापकर्षश्च ह्युद्भवन्ति भवे सदा ।।१६।।

गतिश्च प्रगतिश्चैव तस्य नैसर्गिकौ गुणौ ।
पौरुषस्य समायोगात् ते ह्युत्कर्षं समृध्नुतः ।।१७।।

कार्यनिष्ठश्च विक्रान्तो विषादेनापराजितः ।
देशकालौ समासाद्य समाजोत्कर्षमावहेत् ।।१८।।

आनन्दोत्कर्षसिद्ध्यर्थं साम्यस्थापनहेतवे ।
स्वातन्त्र्याय च सर्वेषां मानवानां हिताय च ।।१९।।

त्यक्त्वा हृदयदौर्बल्यं सङ्कष्टेनापराजितः ।
सङ्घर्षात् सहयोगेन वैषम्यं निश्चितं जयेत् ।।२०।।

संवर्धयेच्च स्वातन्त्र्यं हितं राष्ट्रस्य मङ्गलम् ।
विकासं च समाजस्य समोत्कर्षं च यत्नतः ।।२१।।

समाजोत्थानम्

समाजस्य विकासार्थमतीतमनुशीलयेत् ।
हेयं यत्तत् परित्यज्य प्रगतिप्रदमाश्रयेत् ।।१।।

सुख, दुःख, सन्ताप, राग, द्वेष, समाजहित में रुचि, उल्लास, क्रोध, हर्ष, क्रूरता, करुणा, क्षमा, एकता, संघर्ष, प्रेम, लोभ, ईर्ष्या, उत्कर्ष और पतन संसार में सदा चलते ही रहते हैं।।१६-१७।। गति और प्रगति संसार के सद्गुण कहे गये हैं। पौरुष से उनका योग समाज के उत्कर्ष का साधन है, अर्थात् गति और प्रगति संसार के सहज गुण हैं, पर समाज के विकास के लिये पुरुषार्थ अपेक्षित है।।१८।। कार्यशील, शूरवीर सन्ताप से पराजित हुए बिना देश और काल को समझ कर समाज के उत्कर्ष को बढ़ाये।।१९।। आनन्द तथा उत्कर्ष की सिद्धि के लिये, समता की स्थापना के निमित्त एवं सबकी स्वतन्त्रता और मानवमात्र के हित के लिये हृदय की दुर्बलता को छोड़कर, संकटों से परेशान हुए बिना संघर्ष और सहकार से विषमता को निश्चित रूप से जीते तथा जनता का आनन्द, स्वतन्त्रता, राष्ट्र का हित-मंगल एवं समाज का विकास और समुचित उत्कर्ष यत्नपूर्वक बढ़ाये।।२०-२१।।

समाज के विकास के लिये अतीत का बार बार चिन्तन किया जाय, जो त्याग करने योग्य है, उसे छोड़कर प्रगतिशील तत्त्वों का आश्रय लिया जाय, अर्थात् उन्हें ग्रहण किया जाय।।१।। राष्ट्र की संस्कृति, ज्ञान और आचार का भी ठीक ठीक

राष्ट्रस्य संस्कृतिं ज्ञानमाचारमनुशीलयेत् ।
प्रगतिप्रदतत्त्वानि समारक्षेत् च वर्धयेत् ।।२।।

विश्वस्य सञ्चितं ज्ञानं विज्ञानमनुशीलयेत् ।
देशकालौ च विज्ञाय प्रगतिप्रदमाश्रयेत् ।।३।।

अतीतं वर्तमानं च भविष्यं ज्ञेयमेव च ।
वर्तमानं भविष्यं वै साधयेत् कार्यतत्परः ।।४।।

शीलं वृत्तं विवेकश्च संघशक्तिर्बलं तथा ।
संघर्षो रचना क्रान्तिर्व्रतं शौर्यं पराक्रमः ।।५।।

लोकसेवा देशभक्तिः सिद्धान्ते च दृढस्थितिः ।
शुभोपकरणैरेतैः समाजोत्थानमावहेत् ।।६।।

अध्ययन किया जाय, उनके प्रगतिशील तत्त्वों की रक्षा और अभिवृद्धि की जाय।।२।। विश्व के संचित ज्ञान-विज्ञान का भी बार बार अध्ययन कर देश तथा काल को समझ कर उनके प्रगतिशील तत्त्वों को धारण किया जाय।।३।।

प्रगतिशील जगत् में सामाजिक विकास की प्रक्रिया में नये नये संस्कार, आचार-विचार का सृजन होता ही रहता है। बहुत सी पुरानी बातें काल के प्रवाह में साधक के बजाय बाधक हो जाती हैं, बाधक तत्त्वों को छोड़ना प्रगति के लिये अनिवार्य हो जाता है। पर अतीत का सर्वथा परित्याग घातक और असम्मत है। संचित ज्ञान और अनुभव के प्रगतिशील समाजोपयोगी तत्त्वों की रक्षा प्रगति के लिये नितान्त आवश्यक है। प्रगति के लिये व्यापक दृष्टिकोण, विश्वभावना भी आवश्यक होते हैं। मानव-मात्र के अनुभव से लाभ उठाना ही श्रेयस्कर है। इन्हीं विचारों की पुष्टि में आचार्य नरेन्द्रदेव का कहना है कि आदिकाल से मानवजाति का जो विकास हुआ है, मनुष्य ने जो ज्ञानोपार्जन और चिन्तन किया है, उससे विभिन्न युगों में जिस संस्कृति की सृष्टि हुई है, उसका यथार्थ ज्ञान रखने से ही और उस संस्कृति के उपयोगी अंशों को सुरक्षित रखते हुए उनको नया रूप प्रदान करके ही नव संस्कृति का निर्माण हो सकता है (देखें—आचार्य नरेन्द्रदेव युग और नेतृत्व, पृ. ४५४)।

अतीत, वर्तमान और भविष्य का ज्ञान प्राप्त कर कार्यशील वर्तमान और भविष्य की साधना करे।।४।। शील, सदाचार, विवेक, संघटन, शक्ति, संघर्ष, रचना, क्रान्ति, संकल्प, शौर्य, पराक्रम, लोकसेवा, देशभक्ति, सिद्धान्तों में दृढ़ निष्ठा इन उपायों से समाज का उत्कर्ष किया जाय।।५-६।। न्याय और कर्तव्य की भावना से, दृढ़ता, ज्ञान

न्यायकर्तव्यभावाभ्यां दृढताज्ञानसाहसैः ।
सत्कृतैः सहयोगेन समाजोत्थानमावहेत् ।।७।।

मानवत्वसमायुक्तो धैर्योत्साहसमन्वितः ।
रचनात्मककार्येण समाजोत्थानमावहेत् ।।८।।

न्यायेन हि बलं प्राप्य न्यायेनैव प्रयोजयेत् ।
विरोधयेत् स्थिरस्वार्थं लोकन्यायं च पोषयेत् ।।९।।

परित्यज्य दुराचारमन्यायं दमनं तथा ।
स्थापयेच्च सदाचारं न्यायं समत्वमेव च ।।१०।।

वृद्ध्यर्थं लोकन्यायस्य लोकमङ्गलहेतवे ।
समाजं सम्पदं चैव साम्ययोगेन साधयेत् ।।११।।

कार्यकाले समुत्पन्ने क्रान्तिं चापि विवर्धयेत् ।
सुयोजिता क्रान्तिरेषा समाजं नवमावहेत् ।।१२।।

सङ्घर्षाः क्रान्तयश्चैव लक्ष्यसाधनहेतवः ।
लोकार्थं न्यायवृद्ध्यर्थं ते मन्तव्या मनीषिभिः ।।१३।।

सङ्घशक्तिर्महाशक्तिर्निर्बलानां परं बलम् ।
ततः सङ्घातयोगेन वर्गाधिप्यं विनाशयेत् ।।१४।।

और साहस से तथा सत्कार्यों और सहयोग से समाज का उत्कर्ष किया जाय।।७।। मानवता से, धैर्य और उत्साह से सम्पन्न हो रचनात्मक कार्यों द्वारा समाज का उत्कर्ष किया जाय।।८।। न्याय से शक्ति प्राप्त कर न्याय से उसका प्रयोग कर स्थिर स्वार्थों का विरोध तथा लोकन्याय को पुष्ट किया जाय।।९।। दुराचार, अन्याय तथा दमन को छोड़ कर सदाचार, न्याय और समता की स्थापना की जाय।।१०।। लोकन्याय की वृद्धि तथा लोककल्याण के निमित्त समाज और सम्पत्ति को समता की योजना से साधा जाय, अर्थात् उसे सम्पन्न तथा उसका संचालन किया जाय।।११।। उपयुक्त समय के उपस्थित होने पर क्रान्ति भी की जाय तथा सुयोजित क्रान्ति द्वारा नये समाज की स्थापना की जाय।।१२।। संघर्ष और क्रान्तियाँ लक्ष्य साधन के उपकरण हैं। लोकहित और न्याय की वृद्धि के निमित्त उन्हें विद्वानों ने मान्यता प्रदान की है।।१३।। संघटन की शक्ति एक महान् शक्ति है, निर्बलों का परम बल है, अत: संघटन की विधि से वर्ग-आधिपत्य का विकास किया जाय। शक्तिशाली वर्ग की शक्ति और आधिपत्य का मुकाबला संघटन के बल पर ही निर्बल जनता द्वारा किया जा सकता है।।१४।। हृदय की दुर्बलता को

त्यक्त्वा हृदयदौर्बल्यं न्यायस्थापनहेतवे।
शोषितस्य हिते न्यायात् सङ्घर्षं चालयेत् स्थिरः ।।१५।।

दलितान् शोषितांश्चैव रक्षितुं न्यायनिष्ठया।
दमनं शोषणं सर्वं सर्वोपायाद् विनाशयेत् ।।१६।।

दलितक्षेमसङ्घर्षं समाजोत्कर्षहेतवे।
न्यायेन चालयेद् वीरः सङ्कष्टेनापराजितः ।।१७।।

न्यायोचितं हि सङ्घर्षं चालयेत् कार्यतत्परः।
अन्यायं शोषणं जित्वा समाजं स्थापयेत् समम् ।।१८।।

मानवोचितमार्गेण सन्न्यायेन समर्थितम्।
हिते लोकस्य सङ्घर्षं चालयेत् पूर्णनिष्ठया ।।१९।।

मानवोचितमार्गेण न्यायस्थापनहेतवे।
रहितं वर्गसङ्घर्षात् समाजं स्थापयेत् समम् ।।२०।।

लोकतान्त्रिकराष्ट्रे वै लोकतन्त्रं समाचरेत्।
स्थापयेत्तस्य सिद्धान्तान् मूल्यानि च परम्पराम् ।।२१।।

विरोधयेच्चान्यायं वै पोषयेज्जनमङ्गलम्।
लोकतान्त्रिकमार्गेण समाजं स्थापयेत् समम् ।।२२।।

त्याग कर न्याय की स्थापना के निमित्त शोषित जनता के हित में न्यायपूर्वक दृढ़ संकल्प के साथ संघर्ष चलाये।।१५।। न्यायनिष्ठा से दलितों और शोषितों की रक्षा की जाय तथा सब प्रकार से दमन और शोषण का नाश किया जाय।।१६।। संकष्टों से अपराजित वीर न्यायपूर्वक समाजोत्कर्ष के निमित्त दलितों का कल्याण करने वाले संघर्ष का संचालन करे।।१७।। कार्यशील न्यायोजित संघर्ष का ही संचालन करे। उसके द्वारा अन्याय और शोषण पर विजय प्राप्त कर समसमाज की स्थापना करे।।१८।। वह मानवोचित मार्ग से लोकहित में न्याय से समर्थित संघर्ष को पूरी दृढ़ता से संचालित करे।।१९।। मानवोचित मार्ग से न्याय को प्रतिष्ठित करने के निमित्त वर्गसंघर्ष से रहित समसमाज को प्रतिष्ठित करे।।२०।। लोकतान्त्रिक राष्ट्र में लोकतन्त्र का, अर्थात् उसके सिद्धान्त तथा विधि-विधान का पालन करे, उसके सिद्धान्त, मूल्य और परम्परा की स्थापना करे, अन्याय का विरोध करे, जनकल्याण को पुष्ट करे और लोकतान्त्रिक उपायों से समसमाज की स्थापना करे।।२१-२२।। समाज के विकास तथा श्रमिक जनता के कल्याण के

विकासार्थं समाजस्य श्रमिकक्षेमहेतवे ।
दमनं शोषणं जित्वा समाजं स्थापयेत् समम् ।।२३।।

न्यायं च सहकार्यं च न्यायवृत्तिं समाचरेत् ।
अधिकारं मानवानां स्वातन्त्र्यं रक्षयेत्तथा ।।२४।।

लोकतन्त्रं समारक्षेत् शान्तिं विश्वस्य साधयेत् ।
समाचरेद् राष्ट्रहितं वर्धयच्च सुखं समम् ।।२५।।

समोत्कर्षं च कल्याणं सर्वेषां साधयेत् सदा ।
लोभदम्भौ परित्यज्य हितं लोकस्य साधयेत् ।।२६।।

नारी

नराणां चैव नारीणां समोत्कर्षं विवर्धयेत् ।
तेषां समाऽभिवृद्धिर्हि समाजोत्कर्षकारणम् ।।१।।

आशाप्रेमसमायुक्ता लज्जाशीलगुणान्विता ।
सुसंस्कृता सदाचारा नैतिकत्वविभूषिता ।।२।।

ज्ञानकौशलसंयुक्ता कर्तव्ये दृढतत्परा ।
समाजोत्कर्षसंलग्ना सा नारी सात्त्विकी स्मृता ।।३।।

शीलात् कुलं प्रभवति न्यायात् सत्यं प्रवर्धते ।
शीलन्यायसमायुक्ता लभते श्रेय उत्तमम् ।।४।।

निमित्त दमन और शोषण पर विजय प्राप्त कर समसमाज की स्थापना करे, मनुष्यता, सहकारिता तथा न्याय पर आश्रित व्यवसाय और जीवनचर्या प्रतिष्ठित करे, मनुष्यों के अधिकार और स्वतन्त्रता की रक्षा करे, लोकतन्त्र की भी ठीक प्रकार से रक्षा करे, विश्वशान्ति की साधना करे, राष्ट्रहित का आचरण करे, सबके समान सुख की वृद्धि करे, सदा सब के समोत्कर्ष और कल्याण को साधे तथा लोभ और प्रपंच का परित्याग कर विश्व के हित को पुष्ट करे।।२३-२६।।

नर और नारी दोनों का समोत्कर्ष बढ़ाया जाय, उनकी समान अभिवृद्धि समाज के उत्कर्ष का कारण है।।१।। आशा, प्रेम, लज्जा तथा शील से सम्पन्न एवं नैतिकता, ज्ञान और कौशल से विभूषित कर्तव्यशील तथा समाज के उत्कर्ष में संलग्न सुसंस्कृत सदाचारिणी स्त्री ही सात्त्विकी समझी जाती है।।२-३।। सुशीला सात्त्विकी नारी धैर्य और उत्साह से समन्वित हो बन्धुता की रक्षा करे, कुटुम्ब को पाले, बालक और बालिकाओं

सुशीला सात्त्विकी नारी धृत्युत्साहसमन्विता ।
सौभ्रात्रं च समारक्षेत् कुटुम्बं पालयेत्तथा ।।५।।

बालानां बालिकानां च समोत्कर्षं विवर्धयेत् ।
स्वगुणैः सहयोगेन ह्यभिवृद्धिं विधारयेत् ।।६।।

निर्भीका सात्त्विकी नारी स्वातन्त्र्ये परिनिष्ठिता ।
मानवानामधीकारं कर्तव्यं च समाचरेत् ।।७।।

लोकतान्त्रिकसिद्धान्तान् पोषयेत् परिपालयेत् ।
संवर्धयेच्च लोकार्थं शिवं सत्यं च सुन्दरम् ।।८।।

विवेकशीलसम्पन्ना स्वात्मगौरवसंयुता ।
लोकन्यायसमायुक्ता ह्याधिपत्यं विरोधयेत् ।।९।।

समारक्षेच्च स्वातन्त्र्यमधिकारं च गौरवम् ।
स्थापयेत् साम्यबन्धुत्वे वर्धयेच्च जगद्धितम् ।।१०।।

शान्तिप्रिया सुशीला स्त्री वैषम्यमवरोधयेत् ।
कुटुम्बे स्थापयेच्छान्तिं सौहार्द्रं भद्रतां तथा ।।११।।

नार्यश्च मातरो नूनं गौरवे ह्यधिके स्थिताः ।
[१]यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ।।१२।।

के उत्कर्ष को बढ़ाये और अपने गुणों तथा सहयोग से कुटुम्ब की अभिवृद्धि करे।।४-५।। स्वतन्त्रता में निष्ठावती निर्भीक सात्त्विकी नारी मनुष्यों के अधिकार और कर्तव्य का सेवन करे, लोकतान्त्रिक सिद्धान्तों का पालन करे, उन्हें पुष्ट करे, लोकहित तथा सत्य-शिव-सुन्दर की सम्यक् रूप से वृद्धि करे।।६-७।। विवेक, शील तथा आत्मगौरव से सम्पन्न एवं लोकन्याय से समन्वित स्त्री आधिपत्य का विरोध करे, स्वतन्त्रता, अधिकार तथा गौरव की रक्षा करे, समता और बन्धुत्व की स्थापना करे एवं जगत् के हित को बढ़ाये।।८-९।। शान्तिप्रिय सुशीला नारी विषमता को रोके तथा कुटुम्ब में सौहार्द, शान्ति, प्रीति एवं भद्रता को प्रतिष्ठित करे।।१०।। स्त्री तथा माता गौरव में निःसन्देह अधिक हैं। जिस कुल में इनका आदर नहीं होता, वहाँ सब कर्म निष्फल होते हैं।।११।। माता तो सब वृद्धों में अधिक आदरणीय कही जाती है। माता तो सहस्र पिताओं की अपेक्षा गौरव में अधिक है।।१२।। मुनियों का कहना है कि मातृभक्ति पराभक्ति है,

---

१. मनु. ३.५६

माता तु सर्ववृद्धेषु ह्यादरार्हाऽधिका स्मृता ।
[1]सहस्त्रं तु पितॄन् माता गौरवेणातिरिच्यते ।।१३।।

मातृभक्तिः पराभक्तिरित्येव मुनिनोच्यते ।
नमस्कृता हि माता वै परिव्राजकसूनुभिः ।।१४।।

सुशीला शिक्षिता माता बालं शीले सुशिक्षयेत् ।
विशोधयेच्च चारित्र्यं व्यवहारं कृतानि च ।।१५।।

सर्वथा सर्वकालेषु [2]भार्या पुंसां सहायिका ।
[3]भार्याहीनं गृहस्थस्य शून्यमेव गृहं भवेत् ।।१६।।

यस्मिन् कुले पतिर्भार्या परस्परवशानुगौ ।
तत्रोद्भवन्ति स्नेहश्च सौख्यं शान्तिश्च मङ्गलम् ।।१७।।

सद्गृहे च पतिर्भार्या स्थितावान्योन्यसंश्रयात् ।
तयोरेव सुसम्बन्धाद् वर्धते गृहमङ्गलम् ।।१८।।

[4]नास्ति भार्या समो बन्धुर्नास्ति भार्या समा गतिः ।
[5]नास्ति भार्यासमं किञ्चिन्नरस्यार्तस्य भेषजम् ।।१९।।

गृहलक्ष्मीः समाख्याता कीर्तिता च गृहेश्वरी ।
तस्याः शीलैश्च कौशल्यैर्वर्धते गृहमङ्गलम् ।।२०।।

निःसन्देह संन्यासी हो गया पुत्र भी माता को प्रणाम करता है।।१३।।

माता को छोड़कर पिता को भी नमस्कार करना संन्यासी को नहीं बताया गया है।

सुशीला, शिक्षिता माता बालक को शील की शिक्षा दे, उसके चरित्र, व्यवहार और कार्य को निर्मल बनाये।।१४।। सब तरह सब अवसरों में भार्या पति की सहायिका है। पत्नी के बिना गृहस्थ का घर सूना ही रहता है।।१५।। जिस कुल में पति-पत्नी एक दूसरे के अनुगामी होते हैं, वहाँ स्नेह, सुख, शान्ति तथा मंगल का उदय होता है।।१६।। अच्छे गृहस्थ पति-पत्नी एक दूसरे पर आश्रित होते हैं और उनके अच्छे सम्बन्ध घर में मंगल को बढ़ाते हैं।।१७।। भार्या के समान कोई बन्धु नहीं, भार्या के समान कोई आश्रय नहीं। पीड़ित पुरुष के लिये भार्या के समान कोई औषधि नहीं।।१८।। भार्या 'गृहलक्ष्मी' तथा 'गृहेश्वरी' के नामों से विख्यात है। उसके शील और कौशल से घर में मंगल बढ़ता है।।१९।। कुल में अधिकारों से सम्पन्न, कर्तव्य में संलग्न,

---

१. मनु. ३.१४५ २. शान्ति. २११.२४४.२३ ३. शान्ति. १४४.५
४. शान्ति. १४४.१६ ५. शान्ति. १४४.२५

प्रेमस्रोता रमा धीरा प्रेमग्रन्थिसुसज्जिता ।
पतिप्रेमा च कौशल्या सुहिता मृदुभाषिणी ।।२१।।

गृहकार्येषु संलग्ना वत्सला नन्दिका तथा ।
पतिप्रिया सुशीला च जीवेत् सज्जनजीवनम् ।।२२।।

प्रीणाति या सुचारित्र्यैः प्रीणीते या च सर्वदा ।
प्रीयते बान्धवान् बन्धून् सा वै प्रोक्ता गृहेश्वरी ।।२३।।

सत्यसौन्दर्यसम्पन्ना शीलशृङ्गारशोभिता ।
सेवासौभाग्यसंयुक्ता भावभूषणभूषिता ।।२४।।

कुरुते कुलकल्याणं विनयं वितनोति वै ।
सेवते सर्वसौहार्द्रं प्रेम्णा प्रीणयते पतिम् ।।२५।।

गृहस्थः

यस्माद् [१]गृहस्थमाश्रित्य वर्तन्ते सर्व आश्रमाः ।
आश्रमेषु तु सर्वेषु [२]तस्माज्ज्येष्ठाश्रमो गृही ।।१।।

[३]आश्रमाणां गृही मूलं श्रेष्ठः सर्वेषु वै तथा ।
कर्तव्यकर्मसंसिद्धौ गृही सर्वत्र सिद्ध्यति ।।२।।

लोकन्याय से समायुक्त जो नारी है, वह गृहेश्वरी है।।२०।। वह सत्य के सौन्दर्य से सम्पन्न, भावों के भूषण से विभूषित, सेवा के सौभाग्य से युक्त, शील के शृंगार से सुशोभित कुल का कल्याण करती है, विनय का व्यवहार करती है, सबके सौहार्द का उपभोग करती है तथा सबके साथ सौहार्द का अनुसरण करती है और पति को प्रेम से प्रसन्न करती है।।२१-२५।।

चूँकि गृहस्थ का आश्रय लेकर सभी आश्रम चलते हैं, इसलिये गृहस्थ आश्रम सब आश्रमों से ज्येष्ठ है।।१।। गृहस्थ आश्रम सब आश्रमों का मूल और सबमें श्रेष्ठ है। कर्तव्य कर्म में सिद्ध गृहस्थ प्रत्येक स्थान और समय में सिद्ध होता है।।२।। गृहस्थ

---

१. मनु. ३.७७ २. मनु. ३.७८

३. शान्ति. १९१.१०; शान्ति. ५५.१५; मनु. ६.८९

शीलं चानुभवं ज्ञानं मानवो लभते गृहे ।
[1]यत्र पक्वकषायो हि दान्तः सर्वत्र सिद्ध्यति ।।३।।

[2]दान्तस्य किमरण्येन ह्यदान्तस्य कुतः सुखम् ।
शान्तो दान्तो गृहस्थोऽपि श्रेष्ठत्वं लभते ध्रुवम् ।।४।।

धूर्ता यत्र न पूज्यन्ते सत्क्रियन्ते च सद्गुणाः ।
[3]दम्पत्योः कलहो नास्ति तत्र श्रीः स्वयमागता ।।५।।

दाम्पत्यसहवासं च पारिवारिकजीवनम् ।
धनधान्याभिवृद्धिश्च कुलस्य परिपालनम् ।।६।।

सर्वेषां च समोत्कर्ष आनन्दो लोकमङ्गलम् ।
अतिथीनां च सत्कारो निर्बलेभ्यो ह्यनुग्रहः ।।७।।

परस्परं च सौहार्दं समाजस्य हिते रतिः ।
उत्साह उत्सवः शौर्यं पौरुषं दानसंयमौ ।।८।।

प्रगतिप्रदगुणानां च रक्षणं वर्धनं तथा ।
सम्पर्कसहयोगाश्च बालानां कौतुकं तथा ।।९।।

अभिवृद्धिश्च शीलस्य ज्ञानस्य संस्कृतेस्तथा ।
उल्लासः स्नेहहर्षैश्च गृहीणां जीवनं स्मृतम् ।।१०।।

आश्रम में ही मनुष्य शील, ज्ञान और अनुभव प्राप्त करता है। इसमें रहकर सांसारिक विषयों में आसक्ति के पकने पर जितेन्द्रिय पुरुष सर्वत्र सिद्धि प्राप्त करता है।।३।। संयमी पुरुष को वन में जाने की क्या आवश्यकता है? और जो असंयमी है उसको वन में रहने से भी क्या लाभ है? संयमी गृहस्थ निश्चित ही श्रेष्ठता प्राप्त करता है।।४।। जहाँ धूर्तों का आदर नहीं होता और गुणों का सत्कार होता है तथा दम्पती में कलह नहीं होता, वहाँ समृद्धि और ऐश्वर्य स्वयं आते हैं।।५।। दाम्पत्य सहवास, पारिवारिक जीवन, धनधान्य की अभिवृद्धि, परिवार का पालन, सबका सर्वांग उत्कर्ष तथा आनन्द, लोककल्याण, अतिथियों का सत्कार, निर्बलों पर कृपा, पारस्परिक सौहार्द, समाज के हित में रुचि, उत्साह, उत्सव, शौर्य, पौरुष, दान, संयम, प्रगतिशील तत्त्वों की रक्षा और वृद्धि, सम्पर्क, सहयोग, बच्चों के कौतुक, शील तथा ज्ञान और संस्कृति की वृद्धि, उल्लास, स्नेह, हर्ष—यही गृहस्थ जीवन है।।६-१०।। शील, बन्धुता, कल्याण,

---

१. शान्ति. २३४.६ २. शान्ति १६०.३६ ३. चाणक्य २.२२

जीवनं शीलसम्पन्नं बन्धुत्वेन समन्वितम् ।
शिवसौन्दर्यसंयुक्तं परोपकारसंयुतम् ।।११।।

नैतिकत्वसमायुक्तं हर्षानन्दविभूषितम् ।
सुशोभितं च कौशल्यैर्गृहीणां जीवनं शुभम् ।।१२।।

भोगतृष्णासु शृङ्गारे सहवासे च संयमः ।
परस्परोपकारश्च वृद्धिश्च जगतो हिते ।।१३।।

कार्यकर्मसु लग्नत्वं हिते लोकस्य वै तथा ।
व्यवहारेषु संशुद्धिः स्वार्थमोहनियन्त्रणम् ।।१४।।

सार्वलौकिककार्येषु न्यायपूर्णानुशासनम् ।
केलिक्रीडाप्रमोदेषु शीलस्य परिपालनम् ।।१५।।

पारिवारिककार्येषु सत्यानुसरणं तथा ।
स्नेहस्याचरणं चैव गृहीणां जीवनं शुभम् ।।१६।।

गृहस्थो नैतिकत्वेन ह्यात्मोत्कर्षं समावहेत् ।
न्यायेन पौरुषेणापि कुटुम्बं परिपालयेत् ।।१७।।

संवर्धयेच्च लोकार्थं लोकतन्त्रं जगद्धितम् ।
स्वातन्त्र्यं न्यायकल्याणे बन्धुत्वं सहकारिताम् ।।१८।।

सौन्दर्य, परोपकार, नैतिकता, हर्ष, आनन्द तथा कौशल से सम्पन्न जीवन ही गृहस्थों का अच्छा जीवन है।।११-१२।। भोगतृष्णा तथा शृंगार एवं सहवास में संयम, पड़ोसियों में सौजन्य, जगत् के हित में वृद्धि, कर्तव्य कर्म तथा लोकहित में संलग्नता, व्यवहार में शुद्धि, स्वार्थ तथा मोह का नियन्त्रण, सार्वजनिक कार्यों में न्यायपूर्ण अनुशासन, खेल, क्रीड़ा तथा विनोद में शील का पालन, परिवार के कार्यों में सत्य का अनुसरण तथा स्नेह का आचरण — यही गृहस्थियों का अच्छा जीवन है।।१३-१६।। गृहस्थ पुरुष नैतिकता द्वारा अपना उत्कर्ष बढ़ाये, न्याय और पुरुषार्थ से कुटुम्ब का पालन करे एवं लोकहित लोकतन्त्र, विश्वहित, स्वतन्त्रता, न्याय, कल्याण, बन्धुता तथा सहकारिता की अभिवृद्धि करे।।१७-१८।।

कुटुम्बकम्

जीवनस्य च सौविध्यमानन्दः सौख्यमेव च।
स्नेहश्चातिथ्यसत्कारः सौहार्दं सहकारिता ।।१।।

सुकल्याणाभिवृद्धिश्च लोकसेवा च वै तथा।
सर्वोत्थानं समोत्कर्षः कुटुम्बस्य सुलक्षणम् ।।२।।

कौटम्बिकः प्रयत्नेन संरक्षति कुटुम्बकम्।
प्रगतिप्रदमर्यादां सौहार्दं कुलगौरवम् ।।३।।

प्रतिष्ठापयते न्यायं सद्वृत्तिं सद्व्रतं तथा।
दीक्षां दत्ते च सर्वेषां शीलेषु सद्गुणेषु च ।।४।।

अध्यापयति सज्ज्ञानं व्यवहारसमन्वितम्।
संवर्धयति चानन्दं सर्वोत्कर्षं च सर्वदा ।।५।।

उभौ पतिश्च भार्या च जीवितः सुखजीवनम्।
आनन्दं कुरुते नित्यं कलानानासमाश्रितौ ।।६।।

पतिरेव स्वभार्यां च प्रसादयति नित्यशः।
संरक्षते च तन्मानं स्नेहं च कुरुते सदा ।।७।।

दत्ते च प्रीतिमानन्दं सौख्यं नानाविधं तथा।
प्रसीदति स्वयं चैव गुणैस्तस्याश्च सेवया ।।८।।

कुटुम्ब समाज का मूल आधार है। वह प्रेम, सौहार्द, अच्छी वृत्ति, सहकारिता, सामाजिकता की भावना, सुसांस्कृतिक जीवन, सम्बन्धियों में भाईचारा तथा हितकारी व्यवहार को बढ़ाता है।।१।। जीवन की सुविधा, सुख तथा आनन्द, स्नेह, आतिथ्यसत्कार, सौहार्द, सहकारिता, कल्याण की अभिवृद्धि, लोकसेवा, भद्रता, सबका उत्थान, सर्वांगीण विकास कुटुम्ब के शुभ लक्षण हैं।।२।। कौटुम्बिक प्रयत्न से कुटुम्ब प्रगतिशील मर्यादा, सौहार्द, कुल के गौरव की रक्षा करता है; न्याय, शुभ जीवनचर्या, उत्तम नियम प्रतिष्ठित करता है; सबको शील और उत्तम गुणों में दीक्षित करता है; व्यवहार समन्वित ज्ञान की शिक्षा देता है तथा सदा आनन्द एवं सबका उत्कर्ष और संस्कृति बढ़ाता है।।३-५।। पति-पत्नी दोनों सुख का जीवन बितातें हैं और विभिन्न कलाओं के सहारे नित्य आनन्द करते हैं।।६।। पति पत्नी को नित्य प्रसन्न रखता है, उसके मान की रक्षा करता है, सदा स्नेह करता है तथा नाना विधि से प्रीति, सुख और आनन्द देता है एवं उसके गुणों और सेवा से आनन्दित होता है।।७-८।। पत्नी भी पति को अपने व्यवहार

प्रसादयति भर्तारं व्यवहारेण चात्मनः ।
सेवां करोति नित्यं सा पुष्णाति च कुटुम्बकम् ।।९।।

स्नेहादानन्दयत्येषा कौशलैर्विनयेन च ।
प्राप्नोति प्रेमशृङ्गारं दाम्पत्यस्य सुखं तथा ।।१०।।

बालका बालिकाश्चैव जीवन्ति प्रेमपूर्वकम् ।
वृद्धानां कुर्वते मानं सत्यमेव वदन्ति च ।।११।।

प्राप्नुवन्ति च सज्ज्ञानं शिष्टाचारं सुसंस्कृतिम् ।
आरभन्ते च सत्कार्यं सहकार्यं च कुर्वते ।।१२।।

वर्धयन्ते समोत्कर्षं स्नेहं च कुलमङ्गलम् ।
आनन्दं कुर्वते नित्यं जायन्ते च सुशिक्षिताः ।।१३।।

कुटुम्बहितसंवृद्धिगौरवस्य च रक्षणम् ।
परस्परोपकारश्च ह्यन्योन्यस्य समर्थनम् ।।१४।।

पारस्परिकसौहार्दं निर्बलेभ्यो ह्यनुग्रहः ।
कुटुम्बस्य जनानां वै कर्तव्यं समुदाहृतम् ।।१५।।

से सन्तुष्ट करती है, सदा सेवा करती है, कुटुम्ब को पालती है, अपने कौशल और विनय से आनन्दित करती है तथा दाम्पत्य का सुख और प्रेम शृंगार प्राप्त करती है।।९-१०।। बालक और बालिकाएँ प्रेमपूर्वक रहते हैं, बूढ़ों का मान करते हैं, सच बोलते हैं, उत्तम ज्ञान, शिष्टाचार और संस्कृति प्राप्त करते हैं, अच्छे काम तथा सहकार्य करते हैं, सर्वागीण उत्कर्ष, स्नेह, कुल के मंगल को बढ़ाते हैं, नित्य आनन्द करते हैं और सुशिक्षित बनते हैं।।१३।। कुटुम्ब के हित की वृद्धि, उसके गौरव की रक्षा, परस्परोपकार, एक दूसरे का समर्थन, बन्धु-बान्धव में सौहार्द, निर्बलों के प्रति कृपा, यह सब निश्चय ही कुटुम्ब के लोगों का कर्तव्य बताया जाता है।।१४।। उत्कृष्ट समाज में प्रगतिशील कुटुम्ब हो, वह निश्चय ही नागरिकता के गुणों से सम्पन्न; सौहार्द, देशबन्धुत्व से सम्पन्न राष्ट्रियता तथा मानवता, लोकतान्त्रिक सौजन्य और विश्वकल्याण की भावना को पुष्ट करे। प्रगतिशील जीवन, लोककल्याण की वृद्धि, मानवता की अभिवृद्धि, उसकी (कुटुम्ब) परीक्षा है।।१५।।

मानवत्वम्

मानवत्वं परा निष्ठा मानवानां परो गुणः ।
मानवत्वेन सम्पन्नो मानवः परमो मतः ।।१।।

मनुष्यत्वं परं शीलं परं ज्ञानं परं तपः ।
मनुष्यत्वसमोत्कृष्टो महामानव उच्यते ।।२।।

कारुण्यं विश्वबन्धुत्वं समत्वं न्यायनिष्ठता ।
मानवानां हिते प्रीतिर्मानवत्वमुदाहृतम् ।।३।।

मानवानां समस्तानां हितबुद्ध्या विचिन्तयेत् ।
दम्भद्वेषौ परित्यज्य विश्वकल्याणमाचरेत् ।।४।।

सर्वमानवसौभ्रात्रं मानवानां परो गुणः ।
भूषितो विश्वभावेन मानवः परमो मतः ।।५।।

मानवानां हितार्थाय यः करोति प्रयत्नतः ।
सत्कार्यं निरहङ्कारो विश्वबन्धुः स उच्यते ।।६।।

यस्तु साम्यव्रताचारो विश्वकल्याणतत्परः ।
न्यायशीलश्च सत्यार्थी विश्वबन्धुः स उच्यते ।।७।।

मानवता महती भावना है, कल्याण और उत्कर्ष का साधन है, समष्टि के स्नेह तथा सौहार्द से सम्पन्न जीवन का वह अमृत है।।१।। मनुष्यता उत्तमशील, उत्तम ज्ञान, उत्तम तप है। मनुष्यता से सम्पन्न महामानव कहा जाता है।।२।। मनुष्यता में दृढ़ विश्वास, श्रद्धापूर्वक उसका सम्मान, तथा नित्य उसका अनुष्ठान परम कर्तव्य है।।३।। श्रद्धा, शील तथा विवेक से मानवता की सिद्धि के निमित्त मानवमात्र की सेवा महाव्रत है।।४।। सत्यनिष्ठ सज्जन न्याय, समत्व की भावना, मैत्री तथा हितनिष्ठा से नित्य मानवता की आराधना करे, अर्थात् सब मनुष्यों में मानवता के दर्शन कर उनसे न्याय, समता, मैत्री का हितवर्धक व्यवहार करे।।५।। करुणा, विश्वबन्धुत्व, समता, न्यायनिष्ठा, मानव-मात्र के हित में प्रीति मानवता कही जाती है। ये सब मानवता के प्रमुख गुण हैं।।६।। समता-विषमता मिश्रित संसार में सब समता-मूलक है, नि:सन्देह समता सब प्रजातियों का मौलिक गुण है।।७।।

यद्यपि विभिन्न प्रजातियों के जीवन-स्तर तथा जीवन-चर्या में काफी भेद पाया जाता है और इसके कारण बहुत से सज्जन विभिन्न प्रजातियों की आन्तरिक नैसर्गिक शक्तियों

यस्तु सर्वमनुष्यांश्च ह्यात्मनैवानुपश्यति ।
भजते सर्वकल्याणं विश्वबन्धुः स उच्यते ।।८।।

मनुष्यो ह्यात्मनो नाथः शत्रुर्मित्रं च बान्धवः ।
स्वकृतैः सहकार्येण ह्युत्कर्षं लभते नरः ।।९।।

मानवः सर्वकार्याणां परीमाणमुदाहृतम् ।
अभिवृद्धिर्मनुष्याणां परीक्षा परिकीर्तिता ।।१०।।

मानुष्यं न्यायनिष्ठा वै स्थिते ह्यन्योन्यसंश्रयात् ।
परस्परं तयोर्जन्म निर्द्वन्द्वो नोपलभ्यते ।।११।।

मानुष्यं साम्यभावेन सज्जनः सत्यनिष्ठितः ।
अर्हयेन्न्यायमानाभ्यां मैत्र्या च हितनिष्ठया ।।१२।।

समाजे हि समारब्धं समाजेन प्रभावितम् ।
मानवं जीवनं नूनं सामाजिकमुदाहृतम् ।।१३।।

सामाजिकप्रवृत्तिस्तु पुंसो नैसर्गिको गुणः ।
समष्टिभावसंसिद्धो मानवः पुरुषोत्तमः ।।१४।।

समाजस्य हि संवृद्ध्यै निहितं व्यक्तिमङ्गलम् ।
नित्यं सेवा समाजस्य खल्वात्मोत्कर्षसाधनम् ।।१५।।

का भिन्न-भिन्न मूल्यांकन करते हैं, पर वास्तव में सब प्रजातियों में मूलतः समता और एकता है, सबमें मनुष्यता तथा उत्कर्ष की शक्ति विराजमान है।

मानवता से भूषित ज्ञान से सम्पन्न मनुष्य सब मनुष्यों में मनुष्यता की भावना रखते हैं।।८।। मानव सब कामों का परिमाण, अर्थात् माप है। मनुष्यों की अभिवृद्धि ही सब कामों की परीक्षा है, अर्थात् वही काम ठीक है, जो कल्याणकारी है, जिससे मनुष्य का हित साधन होता है।।९।। मनुष्य ही अपना स्वामी, शत्रु, मित्र और बान्धव है, अपने सत्कर्मों और सहयोग से ही मनुष्य उत्कर्ष को प्राप्त करता है।।१०।। मनुष्य शक्तिसम्पन्न है, वह सब प्राणियों में श्रेष्ठ है, अपने पौरुष से आनन्द-मंगल प्राप्त करता है।।११।। कातर अज्ञान के कारण अपने को दीन-हीन मानते हैं। वीर पुरुष तो ज्ञान से यत्नपूर्वक मंगल का सृजन करता है।।१२।। समाज में ही जन्म लेने वाला और समाज से प्रभावित मानव-जीवन वास्तव में सामाजिक जीवन है।।१३।। सामाजिक प्रवृत्ति मनुष्य का स्वाभाविक गुण है। समष्टिभाव से प्रेरित पुरुष ही पुरुषोत्तम है।।१४।। सामाजिकता मानव की शुभकामना (सहज प्रवृत्ति) है। वह समाज का बहुत हित करने वाली है। उसका

श्रद्धाशीलविवेकेभ्यो मानवत्वस्य सिद्धये।
सेवा मानवमात्रस्य महाव्रतमुदाहृतम् ।।१६।।

मानुष्ये दृढविश्वासः सम्मानं तस्य निष्ठया।
अनुष्ठानं च तन्नित्यं कर्तव्यं परमं स्मृतम् ।।१७।।

भूषितो मानवत्वेन विश्वभावगुणान्वितः।
हितं मानवमात्रस्य सर्वदा समुदाचरेत् ।।१८।।

साम्यवैषम्यसंसारे सर्वं वै साम्यमूलकम्।
नूनं सर्वप्रजातीनां समत्वं मौलिको गुणः ।।१९।।

परित्राणे मनुष्याणां न्यायस्थापनकारणे।
सहकार्ये विश्वहिते रतास्ते विश्वसेवकाः ।।२०।।

उत्कर्ष निःसन्देह समाज तथा व्यक्ति के उत्कर्ष का साधन है।।१५।। सामाजिकता और मानवता मनुष्यों के नैसर्गिक गुण हैं। उनका विकास निःसन्देह जीवन का उत्कर्ष कहा जाता है।।१६।। सामाजिकता और मानवता के समान लक्ष्य हैं। सौहार्द, जीवन का उत्कर्ष तथा लोकहित ये लक्ष्य कहे जाते हैं।।१७।।

मनुष्य सामाजिक जीव है, सहानुभूति, प्रेम आदि सामाजिक प्रेरणाएँ उसके सहज स्वभाव के अंग हैं। वह समाज में ही जन्म लेता और परवरिश पाता है, समाज में ही उसके जीवन का विकास होता है, उसकी शक्तियाँ परिपुष्ट तथा उसके नैतिक गुण विकसित होते हैं। आचार्य नरेन्द्रदेव के शब्दों में—"समग्र की पूर्णता में ही व्यक्ति की पूर्णता है, समाज का अंग होकर ही अपने संकुचित स्वार्थ का परित्याग करके ही, सहयोगयुक्त मानव-कल्याण के प्रयासों के द्वारा ही व्यक्ति अपनी पूर्णता प्राप्त कर सकता है" (आचार्य नरेन्द्रदेव – युग और नेतृत्व, पृ. ३३८)। स्वामी विवेकानन्द भी कहते थे—"व्यक्ति का जीवन समष्टि में है, व्यक्ति का आनन्द समष्टि के आनन्द में है, समष्टि से पृथक् व्यक्ति का अस्तित्व चिन्तनीय है", उनका कहना था—"अनन्त समष्टि की ओर धीरे-धीरे बढ़ना, उसके साथ गाढ़ी सहानुभूति और अभेद की भावना बराबर बनाये रखना, उसके आनन्द में आनन्दित होना और उसके कष्टों में व्यथित होना ही व्यक्ति का एकमात्र कर्तव्य है"।

समष्टि की अभिवृद्धि ही पुरुष का परम स्वार्थ है। उसके द्वारा ही मनुष्य संसार में उत्तम श्रेय प्राप्त करता है। समाज की समृद्धि में ही व्यक्ति का मंगल अन्तर्हित है। समाज की नित्य सेवा ही आत्मोत्कर्ष का साधन है।।१८-१९।। समता, सत्य एवं समष्टि (समाज) के स्नेह से सम्पन्न तथा मानवता से अलंकृत मनुष्य सम्मानित मानव समझा

उदात्तभावसम्पन्नो लोकज्ञो विश्वसेवकः।
सर्वाधिकारं संरक्षेत् स्वाधिपत्यं परित्यजेत्।।२१।।

पोषयेद् विश्वकल्याणं विश्वन्यायं विधारयेत्।
दुष्कार्यनिग्रहं कृत्वा विश्वोत्कर्षं विवर्धयेत्।।२२।।

मानवः शक्तिसम्पन्नः श्रेष्ठः सर्वेषु जन्तुषु।
स्वात्मनः पौरुषेणैव प्राप्नोति पदमुत्तमम्।।२३।।

आत्मानं कातरोऽज्ञानाद् दीनं हीनं च मन्यते।
वीरो ज्ञानेन यत्नेन सृजत्यत्यन्तमङ्गलम्।।२४।।

समष्टेरभिवृद्धिर्हि पुंसः स्वार्थः परः स्मृतः।
मानवः खलु तेनैव लभते श्रेय उत्तमम्।।२५।।

मानवाधिकारः

जगद्धितसमायुक्तं कर्तव्येन समन्वितम्।
समत्वमूलं स्वातन्त्र्यमधिकारो नृणां स्मृतः।।१।।

अधिकारविहीनस्तु पशुरेव प्रकीर्तितः।
अधिकारसमायुक्तो मानवः परिलक्ष्यते।।२।।

कर्तव्यमधिकारश्च स्थिते ह्यन्योन्यसंश्रयात्।
अधिकारविहीनं वै कर्तव्यं दासता स्मृता।।३।।

जाता है।।२०।। निस्पृह, निरहंकारी, सदा न्याय से नियन्त्रित, सबके लिए समता से सज्जित, मैत्री तथा मनुष्यता से अलंकृत, शौर्य और शील से सुशोभित, विद्या एवं सदाचार और दृढ़ प्रतिज्ञा से सम्पन्न तथा सबकी अभिवृद्धि में संलग्न मनुष्य सम्मानित माना जाता है।।२१-२५।।

जगत् के हित और कर्तव्य से समन्वित समतामूलक स्वतन्त्रता मनुष्य का अधिकार है।।१।।

स्वतन्त्रता के साथ-साथ जगत् का हित (सामान्य हित), कर्तव्य तथा समता मानव-अधिकार के अनिवार्य अंग हैं।

अधिकारविहीन मनुष्य पशु के समान है। अधिकारसम्पन्न व्यक्ति ही मानव है।।२।। कर्तव्य और अधिकार एक दूसरे पर आश्रित हैं। अधिकार से रहित कर्तव्य तो दासता

कर्तव्यरहितं स्वत्वमाधिपत्यमुदाहृतम् ।
तयोरेव समायोगात् स्वातन्त्र्यं लभते नरः ।।४।।

जगद्धितं समत्वं च संरक्षेद् यत्नतोऽनिशम् ।
तयोरेव समायोगादधिकारो विशुद्ध्यति ।।५।।

है। कर्तव्य से विहीन अधिकार आधिपत्य है। कर्तव्य और अधिकार के संयोग से ही पुरुष स्वतन्त्रता प्राप्त करता है।।३-४।।

कर्तव्य और अधिकार के नैसर्गिक सम्बन्ध को करीब करीब सभी विद्वान् स्वीकार करते हैं। प्राचीन भारतीय विद्वानों ने तो प्रभुसत्ता, स्वत्व और कर्तव्य उन सब अर्थों में अधिकार शब्द का प्रयोग किया है। प्रभुत्व, सत्ता और कर्तव्य का अविच्छिन्न सम्बन्ध ही इसका मूल कारण है। प्रभुत्व और उत्तरदायित्व दोनों ही सत्ता के लक्षण हैं। प्रभुत्व उत्तरदायित्वपूर्ण होता है, उत्तरदायित्व का पालन ही प्रभुत्व का मूल कारण है और उद्देश्य है। इस तरह अधिकृत सत्ता प्रभुत्व और उत्तरदायित्व दोनों है। इसी तरह स्वत्व, मिलकियत के अधिकार और कर्तव्य का भी घनिष्ठ सम्बन्ध है। सम्पत्ति के व्यक्तिगत अधिकार उत्तरदायित्व, अर्थात् कर्तव्य से बँधे हुए हैं। उनका उत्तरदायित्वपूर्ण उपभोग ही वांछनीय है। यही बात व्यक्ति के दूसरे अधिकारों के सम्बन्ध में भी कही जा सकती है। प्राचीन भारतीय विद्वानों ने तो कर्तव्य पर ही विशेष जोर दिया है।

आधुनिक भारतीय नेताओं ने भी अधिकार और कर्तव्य दोनों को मान्यता दी है। कर्तव्य और अधिकार का कैसा सम्बन्ध है? इस विषय पर आधुनिक पाश्चात्य विद्वानों में कुछ मतभेद है। कुछ विद्वानों की राय में अधिकार-व्यवस्था जहाँ एक व्यक्ति को स्वतन्त्रता प्रदान करती है, वहीं वह उस स्वतन्त्रता पर दूसरे व्यक्तियों की स्वतन्त्रता के आदर तथा संरक्षण पर प्रतिबन्ध या कर्तव्य लगाती है। कुछ विद्वानों के विचार में अधिकार और कर्तव्य का सम्बन्ध इससे कहीं अधिक घनिष्ठ है। उनके विचार में कर्तव्य अधिकार का अविच्छिन्न अंग है। जहाँ स्वतन्त्रता-सम्पन्न व्यक्ति ही समाज के प्रति अपने कर्तव्यों का पालन कर सकता है, समाज की अभिवृद्धि में पूर्ण रूप से अपना योगदान कर सकता है, वहाँ अधिकार और स्वतन्त्रता का उद्देश्य मानव को अपने विकास तथा आनन्द के निमित्त स्वच्छन्द परिस्थिति और सुविधा प्रदान करना ही नहीं, बल्कि उसमें ऐसी क्षमता भी पैदा करना है कि वह समाज की अधिक से अधिक सेवा कर सके, समाज सम्बन्धी कर्तव्यों को अपनी स्वेच्छा से पूरा कर सके।

जगत् के हित और समता की निरन्तर रक्षा करे। इन दोनों के संयोग से अधिकार शुद्ध होता है।।५।।

प्रगतिप्रदसंसारे लोकात्मोत्कर्षवर्धकाः ।
नैसर्गिका मनुष्याणामधिकाराः प्रकीर्तिताः ।।६।।

समाजे वै समारब्धः समाजेन प्रतिष्ठितः ।
परिवर्तनशीलोऽयमधिकारः प्रकीर्तितः ।।७।।

जैसा कि पहले श्लोक में कहा गया है, समता और जगत् का हित मानव-अधिकार के अविच्छिन्न अवयव हैं। समता तो मानव-अधिकार का प्राण है। वही अधिकार वास्तव में मानव-अधिकार कहा जा सकता है, जो सब मनुष्यों को समान रूप से प्राप्य हो। जो अधिकार किसी विशिष्ट वर्ग या समुदाय के व्यक्तियों तक सीमित है, उसे वर्ग-अधिकार कहा जा सकता है, उसे मानव-अधिकार की मान्यता नहीं प्रदान की जा सकती। प्रोफेसर हावहाउस, प्रोफेसर लास्की आदि सभी विद्वान् सामान्य हित (कामन गुड), अर्थात् समान हित को मानव-अधिकार का अनिवार्य तत्त्व स्वीकार करते हैं। प्रोफेसर हावहाउस के विचार में सामान्य हित व्यक्तिगत अधिकारों का स्रोत है। अधिकारों की उत्पत्ति समाज में होती है, अधिकार सामाजिक हित का तत्त्व है, सामाजिक हित के विरुद्ध कोई व्यक्तिगत नैतिक अधिकार नहीं है। हावहाउस स्वीकार करते थे कि व्यक्ति के अधिकार व्यक्तित्व पर आधारित हैं, व्यक्ति के उत्कर्ष की शर्त है। पर व्यक्तित्व स्वयं सामान्य हित में एक तत्त्व है और इसी कारण उसके अधिकारों को नैतिक मान्यता प्राप्त है।

मानव अधिकार व्यक्ति और समाज के हितों को बढ़ाने वाले हैं। कुछ राजनीतिज्ञों के विचार में ये अधिकार नैसर्गिक (प्राकृतिक) हैं। ये अधिकार जो समाज में प्रारम्भ होते हैं और समाज से प्रभावित होते हैं, निसन्देह ही परिवर्तनशील हैं।।६-७।।

अधिकारों की उत्पत्ति और मान्यता के सम्बन्ध में पाश्चात्य विद्वानों में काफी मतभेद रहा है। सत्रहवीं और अठारहवीं शताब्दी के प्रसिद्ध विद्वान् लाक और रूसो मानव-अधिकारों को नैसर्गिक, प्राकृतिक मानते थे। उनके विचार में मनुष्य कतिपय अधिकारों को लेकर समाज में प्रवेश करता है। उसके ये अधिकार प्राकृतिक हैं। उनकी रक्षा करना, उसको मान्यता प्रदान करना समाज और राज्य का कर्तव्य है। उन्नीसवीं शताब्दी के प्रसिद्ध विचारक जेन आस्टिन के विचार में मानव-अधिकार राज्य की आज्ञा पर आश्रित हैं। राज्य कानून द्वारा जिन अधिकारों को मान्यता प्रदान करता है, वही मानव-अधिकार है। दूसरे बहुत में विद्वानों ने इतिहास का विश्लेषण करते हुए बताया कि कानून और मानव-अधिकार का आदि स्रोत राज्य के बजाय समाज है। अधिकार की उत्पति समाज में हुई, समाज में ही उसे पहले पहल मान्यता मिली। इस बात को स्वीकार करते हुए जहाँ कुछ

मानवानामधीकारा लोकन्यायगुणान्विताः ।
जनहितसमायुक्ता नराणां सद्गुणाः स्मृताः ।।८।।

गतिशीलोऽधिकारो वै प्रगतिस्तस्य सद्गुणः ।
आत्मलोकहितार्थाय सुविचारैः प्रयोजयेत् ।।९।।

लोकस्यास्याभिवृद्धिर्हि गुणस्तस्य प्रकीर्तितः ।
विभूषितो लोकहितैर्लभते श्रेय उत्तमम् ।।१०।।

स्वातन्त्र्यैरधिकाराणां स्वलक्ष्यं लभते नरः ।
लोकार्थविपरीतं च स्वातन्त्र्यं न विधीयते ।।११।।

विद्वान् मानव-अधिकार के लिये सामाजिक मान्यता ही पर्याप्त समझते हैं, वहाँ कुछ विद्वान् सामाजिक मान्यता के साथ-साथ राज्य की मान्यता भी आवश्यक समझते हैं। प्रोफेसर हेरल्ड लास्की आदि बहुत से विद्वान् जान लाक और जेन आस्टिन दोनों के सिद्धान्तों को अस्वीकार करते हुए प्राकृतिक मानव-अधिकार का एक नया सिद्धान्त प्रतिपादित करते हैं। वे इस बात को स्वीकार करते हैं कि सब अधिकार सामाजिक हैं, उनकी उत्पत्ति समाज में होती है, उनका सामाजिक लक्ष्य है, सामाजिक हित उनका विशिष्ट गुण है, समाज के साथ साथ वे भी बदलते हैं, समाज के अनुरूप ही उनका स्वरूप होता है। अच्छे समाज में समाजहित से समन्वित मानव-अधिकार समाज द्वारा स्वीकृत होते ही हैं। पर उनका नैतिक अस्तित्व समाज की स्वीकृति के बजाय उनके अपने निहित गुणों पर आश्रित है। वे मानव-अधिकार हैं; क्योंकि वे समाजहित की वृद्धि तथा व्यक्ति की स्वतन्त्रता एवं उत्कर्ष के लिये आवश्यक हैं। इस अर्थ में वे प्राकृतिक तथा नैसर्गिक हैं और उनकी मान्यता के लिये समाज में संघर्ष किया जा सकता है। (देखें हेरल्ड लास्की : ग्रामर आफ पालिटिक्स)।

लोकन्याय के गुण से समन्वित तथा लोकहित से सम्पन्न मानव-अधिकार पुरुष का सद्गुण है।।८।। अधिकार गतिशील है, प्रगति उसका सद्गुण है। अपने और लोक के हित के लिये इन्हें विचारपूर्वक प्रयोग करना चाहिये।।९।। लोकहित की वृद्धि ही उसका गुण है, लोकहित से विभूषित यह अधिकार उत्तम श्रेय प्राप्त करता है।।१०।। पुरुष अधिकारों की स्वतन्त्रता से अपने लक्ष्य को प्राप्त करता है। लोकहित के विपरीत अधिकार या स्वतन्त्रता का कोई विधान नहीं है।।११।। स्वतन्त्रता, सबकी समता, सबकी समान रक्षा, विचारों की स्वतन्त्रता, सबका समान गौरव, सहयोग तथा जीवन और संस्कृति की स्वतन्त्रता, अन्याय तथा दमन और आधिपत्य एवं शोषण से रक्षा, लोकयात्रा

[१]स्वातन्त्र्यं सर्वसाम्यं च सर्वेषां समरक्षणम्।
स्वातन्त्र्यं च विचारस्य सर्वेषां समगौरवम्।।१२।।

स्वातन्त्र्यं सहयोगस्य जीवनस्य कृतस्य च।
समरक्षणमन्यायदमनाधिप्यशोषणैः ।।१३।।

सौविध्यं लोकयात्रायै समोत्कर्षाय साधनम्।
समत्वसहितो न्यायो ह्यधिकारा नृणां स्मृताः।।१४।।

मानवानामधीकारान् कर्तव्यानि च यत्नतः।
राष्ट्रिको ज्ञानसम्पन्नः संरक्षेत् परिपालयेत्।।१५।।

मान्यतां तु समाजस्य राज्यस्वीकृतिमादरम्।
मानवः स्वाधिकारेभ्यः सुराष्ट्रे लभते ध्रुवम्।।१६।।

राष्ट्रे वैषम्यसम्पन्ने चाधिपत्यसमन्विते।
सुनियोजितसङ्घर्षैः स्वस्वत्वं पद्यते नरः।।१७।।

भूत्यर्थं सर्वलोकानां व्यक्तित्वोत्कर्षहेतवे।
जनसङ्घर्षयोगेन चेतिहासक्रमेण हि।।१८।।

अधिकारो मानवानां स्वातन्त्र्यं न्यायगौरवे।
भवे ध्रुवं विवर्धन्ते विकसन्ति च निश्चितम्।।१९।।

संरक्षणं च विस्तारः स्वत्तानां मानवस्य हि।
व्यवस्थायाः समाजस्य सद्गुणौ परिकीर्तितौ।।२०।।

की सुविधा, समोत्कर्ष के साधन, समता सहित न्याय—ये सब मनुष्यों के अधिकार हैं।।१२-१४।। ज्ञानसम्पन्न राष्ट्रशासक मानव-अधिकारों और कर्तव्यों की यत्नपूर्वक रक्षा तथा उनका पालन करे।।१५।। अच्छे राष्ट्र में अपने अधिकारों के लिये समाज की मान्यता और राज्य की स्वीकृति मनुष्य को निश्चित ही प्राप्त हो जाती है।।१६।। विषमता से सम्पन्न आधिपत्य से त्रस्त राष्ट्र में सुनियोजित संघर्षों द्वारा मनुष्य अपने अधिकार को प्राप्त करता है।।१७।। इस संसार में सब लोगों के कल्याण के निमित्त तथा व्यक्तित्व के उत्कर्ष के लिये वर्गसंघर्ष के उपाय से तथा इतिहास के क्रम से मनुष्यों के अधिकार, स्वतन्त्रता, न्याय और गौरव निःसन्देह बढ़ते और विकसित होते हैं।।१८-१९।। मानव के अधिकारों का संरक्षण और विस्तार समाज की व्यवस्था के सद्गुण कहे जाते हैं।।२०।।

---

१. शान्ति.

कर्तव्यम्

कल्याणार्थाय जीवानां समाजोत्कर्षहेतवे ।
स्वातन्त्र्याय समत्वार्थं संवृद्ध्यर्थं च संस्कृतेः ।।१।।

आनन्दात्मोत्कर्षसिद्ध्यै न्यायस्थापनहेतवे ।
योगयुक्तं कार्यमेव कर्तव्यं समुदाहृतम् ।।२।।

स्वस्वकर्तव्यनिष्ठा या सा गुणः परिलक्ष्यते ।
कर्तव्यकर्माभिरतो लभते श्रेय उत्तमम् ।।३।।

जीवनोद्देश्यकर्तव्ये साध्यसाधनसंस्थिते ।
सुसम्बन्धात् तयोरेव मानवत्वं सुसिद्ध्यति ।।४।।

उद्देश्यनिश्चितं कार्यं कर्तव्यं समुदाहृतम् ।
सल्लक्ष्यसिद्धिसामर्थ्यं परीक्षा तस्य वै स्मृतः ।।५।।

सदादर्शसमायुक्तं दृढसङ्कल्पसम्भृतम् ।
कर्तव्यं न्यायसंयुक्तं जीवनोत्कर्षसाधनम् ।।६।।

कर्तव्यं कर्म कुर्वीत यावद्धि पुरुषायुषम् ।
दरिद्राति स्वकर्तव्ये ह्यनाचारः स उच्यते ।।७।।

[१]केवलं शास्त्रमाश्रित्य न कर्तव्यो विनिर्णयः ।
कारणान्निश्चयं कृत्वा कार्यं कर्म समाचरेत् ।।८।।

कर्तव्य गतिशील है, वह परिस्थितियों से प्रभावित, देशकाल से नियन्त्रित एक व्यावहारिक सत्य है।।१।। देशकाल से प्रेरित कर्तव्य प्रगतिशील है। न्याय और कल्याण की संवृद्धि उसकी परीक्षा है।।२।। हमारे दावे और अधिकार कर्तव्य तथा क्षमता पर आश्रित हैं। कर्तव्य पहला तत्त्व है, क्षमता उसका साधन है।।३।। कर्तव्य और क्षमता से हीन व्यक्तियों के दावे सर्वथा जनता के आनन्द तथा देश के हित के घातक हैं।।४।। जीवन के उद्देश्य और कर्तव्य साध्य-साधन हैं। अच्छे लक्ष्य की सिद्धि की क्षमता ही कर्तव्य का गुण है।।५।। अच्छे आदर्श से युक्त, शुभ यत्न से समन्वित तथा न्याययुक्त कर्तव्य जीवन के उत्कर्ष का साधन है।।६।। जीवों का कल्याण, समाज का उत्कर्ष, स्वतन्त्रता, समता-संस्कृति की वृद्धि, आत्मोत्थान, सेवा एवं सत्य की प्रतिष्ठा जैसे शुभ

---

१. वशिष्ठः

अनाश्रितो दानपुण्यं वेदपुण्यमनाश्रितः ।
विद्याचरणसम्पन्नः कर्तव्यं परिपालयेत् ।।९।।

सततं सत्प्रयत्नेन कार्यं कर्म समाचरेत् ।
न्यायवृत्तिं समालम्ब्य जीवेत् सज्जनजीवनम् ।।१०।।

उद्योगेन बलेनैव बुद्ध्या धैर्येण साहसात् ।
व्रतेन सहयोगेन कार्यं कर्म समाचरेत् ।।११।।

कर्तव्यनिष्ठा निर्भीकाः सन्तप्यन्ते न दुःखतः ।
कर्तव्यं कुर्वते नित्यं सङ्कष्टेनापराजिताः ।।१२।।

मानवत्वस्य सिद्ध्यर्थं जनकल्याणहेतवे ।
कर्तव्यं पालयेद् धीरः सततं सत्प्रयत्नतः ।।१३।।

जीवनोत्कर्षपुष्ट्यर्थं समाजोन्नतिसिद्धये ।
कर्तव्यं कुरुते वीरः स्नेहसौहार्दपूर्वकम् ।।१४।।

लक्ष्यों के निमित्त न्याययुक्त कार्य ही मानव का कर्तव्य कहा जाता है।।७-९।। मानवता की सिद्धि तथा श्रमिकों के कल्याण के निमित्त धीर पुरुष निरन्तर सत्प्रयत्नों द्वारा अपने कर्तव्य का पालन करे।।१०।। जीवन के उत्कर्ष की पुष्टि तथा समाज की उन्नति के लिये वीर पुरुष स्नेह और सौहार्द के साथ कर्तव्य का पालन करते हैं।।११।।

पश्चिम के अधिकांश आधुनिक विद्वान् समाज के प्रति उत्तरदायित्व को ही मनुष्य के कर्तव्य में सम्मिलित करते हैं। वे इस उत्तरदायित्व में सामाजिक अभिवृद्धि के साथ-साथ सबके साथ सौहार्दपूर्ण व्यवहार को भी शामिल करते हैं। पर प्रोफेसर एल. टी. हावहाउस आदि पश्चिम के कतिपय अन्य विद्वान् अपने जीवन के उत्कर्ष के प्रति मनुष्य के उत्तरदायित्व को भी मानव का कर्तव्य समझते हैं, अर्थात् उनकी राय में सौहार्दपूर्ण व्यवहार तथा सामाजिक कल्याण और जीवनोत्कर्ष सम्बन्धी नियम सभी कर्तव्य हैं। कर्तव्य की यह व्यापक व्याख्या ही भारतीय विद्वानों को स्वीकार हो सकती है, यही पुरानी परम्परा के अनुकूल है।

निःसन्देह कर्तव्य में सम्यक् निष्ठा एक सद्गुण है। कर्तव्य में संलग्न पुरुष उत्तम श्रेय प्राप्त करता है।।१२।। जब तक जिन्दगी है, तब तक कर्तव्य करना चाहिये। जो व्यक्ति अपने कर्तव्य में दरिद्रता करता है, वह अनाचारी है।।१३।। केवल शास्त्र का आश्रय लेकर कर्तव्य का निर्णय नहीं करना चाहिये। कारण का निश्चय करके ही कर्तव्य का निर्णय करना चाहिये।।१४।।

कर्तव्यमेव कर्तव्यं कर्मण्येन प्रयत्नतः।
कार्यकर्मसु संलग्नः साफल्यं पद्यते गुणम् ।।१५।।

कष्टे समाजसङ्कष्टे हृदयेनापराजितः।
धैर्यसाहससंयुक्तो कर्तव्यं साधयेत् सुधीः ।।१६।।

[1]आशा सर्वोत्तमं ज्यौतिर्निराशा परमं तमः।
आशाधृतिसमायुक्तः साधु कर्म समाचरेत् ।।१७।।

जीवनं यो विजानाति [2]सर्वलोकहितात्मकम्।
कर्तव्यभावसंयुक्तो लोकसेवां करोति सः ।।१८।।

गुणसाधनसन्दक्षः कर्तव्येन विभूषितः।
विद्यया कर्मणा शीलैर्वर्धयेज्जनमङ्गलम् ।।१९।।

यस्तु कर्तव्यसन्तुष्टः कार्यं कर्म करोति वै।
सङ्गं त्यक्त्वा फलं चैव स त्यागी परमो मतः ।।२०।।

आर्य ग्रन्थों का अध्ययन कर्तव्य की जानकारी में सहायक हो सकता है। पर शब्द प्रमाण को कर्तव्य का निर्णायिक मान लेना ठीक नहीं है। सामाजिक लक्ष्य और जीवनोद्देश्य की कसौटी पर ठीक तौर पर परख कर ही कर्तव्य का सही निर्णय किया जा सकता है। आधुनिक युग में राजा राममोहन राय, महादेव गोविन्द रानाडे आदि विद्वानों ने इसी बात को पुष्ट किया है।

देश-काल के अनुकूल कर्तव्य का निर्णय करके कर्तव्यनिष्ठ विवेकपूर्वक कर्तव्य कर्म करे।।१५।। विद्याचरणसम्पन्न पुरुष दान-पुण्य तथा वेद में वर्णित पुण्य का आश्रय लिये बिना कर्तव्य पालन करे, अर्थात् पुण्य-प्राप्ति की अभिलाषा को त्याग कर कर्तव्य करना चाहिये।।१६-१७।।

सामाजिक हित और जीवनोत्कर्ष की अभिवृद्धि ही कर्तव्य का लक्ष्य है। निष्काम भावना से ही कर्तव्य का ठीक ठीक पालन हो सकता है।

निरन्तर अच्छे प्रयत्न द्वारा कर्तव्य का पालन किया जाय। न्यायसमन्वित व्यवसाय और जीवनचर्या का अवलम्बन कर सज्जनता का जीवन व्यतीत किया जाय।।१८।। उद्योग, शक्ति, बुद्धि, धैर्य, साहस, दृढ़ निष्ठा और संकल्प तथा सहयोग के साथ कर्तव्य कर्मों को किया जाय।।१९।। निर्भीक कर्तव्यनिष्ठ व्यक्ति दुःख से सन्तप्त नहीं होते।

---

१. रश्मिमाला २. शान्ति.

दमनस्य विनाशाय निग्रहाय च दुष्कृताम् ।
अनाश्रितः कर्मफलं कार्यं कर्म समाचरेत् ।।२१।।

हितार्थं सर्वलोकानां समाजोत्कर्षहेतवे ।
कार्यनिष्ठो न्यायशीलः कर्तव्यं कुरुतेऽनिशम् ।।२२।।

नागरत्वम्

नागरत्वं समाजस्य नराणां च परो गुणः ।
नागरत्वविहीनश्च जडत्वमधिगच्छति। ।।१।।

समोत्कर्षाय सर्वेषां राष्ट्रोत्थानाय वै तथा ।
नागरेषु सुसम्बन्धः सर्वथा हितकारकः ।।२।।

सर्वनागरसौभ्रात्रं लोकार्थो लोकतन्त्रकम् ।
प्रतिवेशिषु सौहार्दं नैतिकत्वं सुसंस्कृतिः ।।३।।

नराधिकारकर्तव्ये स्वातन्त्र्यं सहकारिता ।
लोकज्ञानं च सौन्दर्यं विवेको विनयो व्रतम् ।।४।।

सर्वोत्कर्षस्य सौविध्यमानन्दं जीवनस्य च ।
समत्वं न्यायशीले च नागरत्वसुलक्षणम् ।।५।।

सौम्यत्वं सत्यबन्धुत्वे समष्ट्यां परिनिष्ठता ।
तितिक्षा मतभेदेषु व्यवहारेषु चार्जवम् ।।६।।

वे कष्टों से पराजित हुए बिना नित्य कर्तव्य करते रहते हैं।।२०।। गुणों की साधना में संदक्ष, कर्तव्य से विभूषित विद्या, कर्म तथा शील द्वारा जनकल्याण को बढ़ाये।।२१।। जो कर्तव्य से सन्तुष्ट हो फल और आसक्ति को छोड़कर कर्तव्य कर्म करता है, वही बड़ा त्यागी है।।२२।।

नागरिकता समाज तथा मनुष्यों का अच्छा गुण है। नागरिकता से विहीन पुरुष अज्ञान को प्राप्त करता है।।१।। सबके उत्कर्ष तथा राष्ट्र के उत्थान के लिये नागरिकों में परस्पर अच्छा सम्बन्ध हितकारक होता है।।२।। सब नागरिकों में बन्धुता, लोकहित, लोकतन्त्र, पड़ोसियों में सद्भाव, नैतिकता, संस्कृति, मानव-अधिकार और कर्तव्य, स्वतन्त्रता, सहकारिता, लोकज्ञान, सौन्दर्य, विवेक, विनय, व्रत, सबके उत्कर्ष के लिये सुविधा, आनन्दमय जीवन, समता, न्याय, शील—ये सब नागरिकता के अच्छे लक्षण हैं।।३-५।। सौम्य भाव, सत्य, बन्धुता, समाज के प्रति निष्ठा, मतभेद में सहनशीलता,

हिते रतिश्च लोकस्य सर्वकार्येषु मार्दवम् ।
गुणैरेतैः समायुक्तं जीवनं नागरं शुभम् ।।८।।

सत्यङ्कारः सत्यबुद्धिः समारम्भः समागतिः ।
समासक्तिः समाहारः सद्व्रतं सति नागरे ।।१०।।

यो लोकनीतिसम्पन्नो लोकाचारसमन्वितः ।
साम्यन्यायसमायुक्तः स्वातन्त्र्ये परिनिष्ठितः ।।११।।

कर्तव्यकर्मसंलग्नो लोकप्रेमविभूषितः ।
कल्याणवर्धनो धीरः स वै सन्नागरः स्मृतः ।।१२।।

यस्तु सत्यव्रताचारो न्यायशीलः पराक्रमी ।
सचेताः सुहितो वीरः स वै सन्नागरः स्मृतः ।।१३।।

समष्टिभावसम्पन्नः सत्यकामः समाजिकः ।
सद्व्रती समुदाचारी सद्विवेकः सुशिक्षितः ।।१४।।

सत्यनिष्ठः सदानन्दः सदाचारः सुभाषकः ।
समः सर्वेषु सौभ्रात्रः सूरः सन्नागरः स्मृतः ।।१५।।

व्यवहार में निष्कपटता, लोक के हित में रुचि, सब कामों में उदारता—इन गुणों से सम्पन्न नागरिक जीवन शुभ है।।६-७।। वायदे को पूरा करना, सत्य बुद्धि, उत्तरदायित्वपूर्ण कार्य, मेल, अनुराग संग्रह, शुभ संकल्प अच्छे नागरिक में पाये जाते हैं।।८।। जो सत्यव्रत का पालन करता है, न्यायशील तथा पराक्रमी एवं सचेत, हितचिन्तक और वीर है, वही अच्छा नागरिक है।।९।। जो लोकज्ञान और लोकाचार में सम्पन्न है, समता और न्याय से समायुक्त है, स्वतन्त्रता में निष्ठा रखता है, कर्तव्य कार्यों में संलग्न है, लोकप्रेम से विभूषित है तथा कल्याण की वृद्धि करने वाला और धीर है, वही अच्छा नागरिक है।।१०-११।। समष्टि के स्नेह से सम्पन्न, सत्य का प्रेमी, सामाजिक, प्रतिज्ञा का पालन करने वाला, उचित व्यवहार करने वाला, विवेकवान्, सुशिक्षित, सत्यनिष्ठ, सदा आनन्द में मग्न, सदाचारी, अच्छा वक्ता, समता का व्यवहार करने वाला, सबका बन्धु तथा बुद्धिमान् ही अच्छा नागरिक है।।१२-१३।। जो मनुष्य मानव अधिकार और सम्मान में सब मनुष्यों को अपने समान मानता है, वह अच्छा नागरिक है।।१४।। जो लोकतान्त्रिक भाव तथा लोकनिष्ठा से सम्पन्न एवं सदा लोकहित में संलग्न है, वह अच्छा नागरिक है।।१५।। जो लोक तथा लोकनीति का ज्ञाता, लोक

सन्नागरत्वसम्पन्ना मानवा न्यायनिष्ठिताः ।
कर्तव्यमिति बुद्ध्यैव भूतिकर्माणि कुर्वते ।।१६।।

संवर्धयन्ति यत्नेन हितं च सार्वलौकिकम् ।
रक्षयन्ति नराणां च कल्याणं मानगौरवे ।।१७।।

कर्तव्यनिष्ठनीतिज्ञो नागरः प्रगतिप्रियः ।
पुष्णाति प्रगतिं पुंसां व्यवस्थां लोकतान्त्रिकीम् ।।१८।।

इन्द्रजालेन दम्भेन प्रपञ्चेन च मायया ।
अत्याचारं न कुर्वन्ति नागराश्च सदाशयाः ।।१९।।

परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्।
शोषणं च न कुर्वन्ति नागराश्च शुभाशयाः ।।२०।।

भोगैश्वर्यसमाविष्टो लोभोपहतनागरः ।
ईहते कामभोगार्थमन्यायेनार्थसञ्चयान् ।।२१।।

व्याजेनार्जयते कीर्तिं दम्भं चरति सर्वदा ।
अन्यायं कुरुते नित्यं कल्याणं न तनोति सः ।।२२।।

राष्ट्रियत्वम्

सर्वनागरसौभ्रात्रं देशबन्धुत्वमुच्यते ।
तेषां वै समवायश्च नूनं राष्ट्रमुदाहृतम् ।।१।।

की आराधना में तत्पर तथा समाज और अपने उत्कर्ष में संलग्न है, वह अच्छा नागरिक है।।१६।। अच्छी नागरिकता से सम्पन्न न्यायनिष्ठ मनुष्य कर्तव्यबुद्धि से कल्याण कार्य करता है, यत्नपूर्वक सार्वलौकिक हित की वृद्धि करता है और मनुष्यों के कल्याण, मान तथा गौरव की रक्षा करता है।।१७-१८।। कर्तव्य में श्रद्धा रखने वाला, नीति का ज्ञाता प्रगतिशील नागरिक पुरुषों की प्रगति तथा लोकतान्त्रिक व्यवस्था को पुष्ट करता है।।१९।। दाँव-पेंच, पाखण्ड, जालसाजी तथा धूर्तता से शुभ आशयवाला नागरिक अनाचार नहीं करता।।२०।। अच्छे उद्देश्य से समन्वित नागरिक पराये धन की कामना, मन से अनर्थ का चिन्तन तथा शोषण नहीं करते है।।२१।। भोग, ऐश्यर्य और लोभ में फंसा नागरिक कामनाओं के भोग के लिये अन्याय से धन इकट्ठा करना चाहता है, धोखे से कीर्ति प्राप्त करता है, सदा दाव पेंच और पाखण्ड का आचरण करता है, नित्य अन्याय करता है तथा कल्याण का विस्तार नहीं करता।।२२।।

सब नागरिकों में बन्धुत्व ही देशबन्धुत्व है। देशबन्धुओं में सौहार्द राष्ट्रीयता कहलाती है।।१। लोकतान्त्रिक राष्ट्रों में सब नागरिक समान हैं। धर्म के भेद से अधिकार

स्वातन्त्र्यं देशबन्धुत्वं समत्वसहितं तथा ।
देशसेवा देशभक्ती राष्ट्रस्य सद्गुणाः स्मृताः ।।२।।
सुराष्ट्रे सकला लोकाः स्वातन्त्र्यं समतां तथा ।
मानं ज्ञानं न्यायवृत्तिं समृद्धिं चाप्नुवन्ति वै ।।३।।
राष्ट्रे वैषम्यसम्पन्ने वर्गाधिप्यसमन्विते ।
राष्ट्रबन्धुत्वशान्ती च विक्रियामधिगच्छतः ।।४।।
सङ्कीर्णा वै राष्ट्रियता रुध्नाति देशबन्धुताम् ।
उपेक्षते मनुष्यत्वं विश्वशान्तिं जगद्धितम् ।।५।।
राष्ट्रे वैषम्यसम्पन्ने ह्याधिपत्यसमावृताः ।
उपेक्षन्ते च लोकार्थं निर्बलानां हितं तथा ।।६।।
विधारयन्ति वैषम्यमन्यायं चैव शोषणम् ।
पोषयन्ते दुराचारं स्थिरस्वार्थस्य वै तथा ।।७।।
आधिपत्येन भावेन प्रेरितो राष्ट्रनिष्ठितः ।
उपेक्षते मानवानां कल्याणं बन्धुतां तथा ।।८।।
संवर्धयति सङ्घर्षमशान्तिं विग्रहं तथा ।
साम्राज्यं च प्रतिष्ठाप्य वर्धयत्यात्मशोषणम् ।।९।।
श्रमिकक्षेमसंयुक्तं जगद्धितसमन्वितम् ।
स्वातन्त्र्यसाम्याधारं वै राष्ट्रियत्वं विधारयेत् ।।१०।।

की विषमता न्याय की घातक है।।२।। धर्मभेद के कारण नागरिकों का विभाजन, लोकतान्त्रिक संस्कृति और शान्ति को निश्चय ही नाश करने वाला है।।३।। समाज में जातियों का वैषम्य (असमानता और अन्याय) शान्ति और संवृद्धि का नाश करने वाला है। सब प्रजातियों का सौहार्द निःसन्देह शान्ति को बढ़ाने वाला है।।४।। जाति और धर्म के भेदों से स्थापित और परिपुष्ट संकीर्ण राष्ट्रीयता पारस्परिक सौहार्द को नष्ट करती है। वह सौजन्य का नाश करती है, देशबन्धुता में बाधा डालती है, मनुष्यता एवं विश्वशान्ति और जगत् के हित की उपेक्षा करती है।।५-६।। सब धर्म और प्रजातियों का सौहार्द राष्ट्र कहलाता है। उस राष्ट्र में सब लोकतान्त्रिक जीवन व्यतीत करते हैं।।७। स्वतन्त्रता, देशबन्धुत्व, समता, देशसेवा, लोकतन्त्र, सन्न्याय राष्ट्र के सद्गुण हैं।।८।। मनुष्यता तथा देशबन्धुत्व पर व्यवस्थित और समाश्रित राष्ट्र ही प्रगतिशील है एवं शान्ति और प्रगति को बढ़ाने वाला है।।९।। विषमता से सम्पन्न तथा विशिष्ट वर्ग के आधिपत्य से समन्वित राष्ट्र में राष्ट्रबन्धुत्व और शान्ति विकृत हो जाते हैं।।१०।। विषमता से

न्यायशीला राष्ट्रनिष्ठाः कर्तव्ये परिनिष्ठिताः ।
हिते मनुष्यमात्रस्य राष्ट्रमुन्नमयन्ति ते ।।११।।

कर्तव्यशीलः स्वगुणैः सहयोगेन चानिशम् ।
राष्ट्रस्वातन्त्र्यमारक्षेत् यशो मानं च वर्धयेत् ।।१२।।

सर्वमानवकल्याणं विश्वशान्तिं विधारयेत् ।
मानवानामधीकारं मानं च रक्षयेत् तथा ।।१३।।

राष्ट्रिकाणां समस्तानां राष्ट्रनिष्ठः सुहृत्सदा ।
समभ्रातृत्वसंयुक्तो निर्बलानां हिते रतः ।।१४।।

दमनस्य विनाशश्च निर्बलानां हिते रतिः ।
समोत्कर्षस्य वृद्धिश्च कर्तव्या राष्ट्रनिष्ठितैः ।।१५।।

कार्यशीलो राष्ट्रनिष्ठः सङ्कष्टेनापराजितः ।
समाचरेद् राष्ट्रहितं रक्षयेत् वर्धयेत्तथा ।।१६।।

ज्ञानेन शीलशौर्याभ्यां राष्ट्रनिष्ठाः सदाशयाः ।
राष्ट्रं लोकान् रक्षेयुर्वर्धयेयुश्च सम्पदः ।।१७।।

[१]मातृभूमिरयं देशः सेव्यः प्राणैर्धनैरपि ।
कर्तव्यं देशभक्तिश्च शोषितानां च रक्षणम् ।।१८।।

सम्पन्न राष्ट्र में आधिपत्य-भावना से ग्रस्त पुरुष लोकहित तथा निर्बलों के हितों की उपेक्षा करते हैं, विषमता, अन्याय और शोषण को धारण करते हैं तथा दुराचार और स्थिर स्वार्थों को पुष्ट करते हैं।।११-१२।। आधिपत्य की भावना से प्रेरित राष्ट्रनिष्ठा मानवमात्र की बन्धुता और कल्याण की उपेक्षा करती है, संघर्ष, अशान्ति और विघटन को बढ़ाती है तथा साम्राज्य को प्रतिष्ठित कर शोषण को प्रज्वलित करती है।।१३-१४।। श्रमिकों के कल्याण से सम्पन्न, समुदाय के हित से समन्वित, देशबन्धुत्व से संयुक्त राष्ट्रीयता को अच्छी तौर पर पुष्ट करे।।१५।। देशभक्ति से सम्पन्न एवं मानवता से विभूषित पुरुषों द्वारा मानवमात्र के हित में देश की उन्नति की जाय।।१६।। यह मातृभूमि प्राण और धन से सेवा करने योग्य है। देशभक्ति और शोषितों का संरक्षण कर्तव्य है।।१७।। पुरुषों का, विशेषतः अपने राष्ट्र में, मेल श्रेयस्कर है। संघ-शक्ति बड़ी शक्ति है, राष्ट्र की उन्नति करने वाली है।।१८।। कर्तव्यशील अपने गुणों से तथा दूसरों के साथ मिलकर निरन्तर

---

१. मालवीयः

देशभक्तिसमायुक्तैर्वृत्तशीलगुणान्वितैः ।
स्वे स्वे कर्मण्यभिरतैः [1]कार्या देशसमुन्नतिः ।।१९।।

[2]ये च राष्ट्रापराधेषु वृद्धिं कुर्वन्ति केचन ।
[3]ये चाशिष्टाः प्रवर्धन्ते नरास्ते मूढ़चेतसः ।।२०।।

मनसाऽपि स्वराष्ट्रस्य योऽनिष्टानि प्रचिन्तयेत् ।
दम्भलोभपराभूतः नाप्नोति कीर्तिभद्रताम् ।।२१।।

सङ्गतिः श्रेयसी पुंसां स्वराष्ट्रे च विशेषतः ।
सङ्घशक्तिर्महाशक्ती राष्ट्रस्योन्नतिकारिका ।।२२।।

राष्ट्रं सङ्घातयोगेन रक्षयेदभिवर्धयेत् ।
नागराणां च कल्याणमभिवृद्धिरुदाहृता ।।२३।।

राष्ट्र की स्वतन्त्रता की रक्षा करे और उसके यश और मान को बढ़ाये, मानवमात्र के कल्याण को तथा विश्वशान्ति को पुष्ट करे और सदा मनुष्यों के अधिकार और सम्मान की रक्षा करे।।१९-२०।। राष्ट्रनिष्ठ पुरुष सब राष्ट्रिकों का सदा मित्र है और समान बन्धुत्व की भावना से सम्पन्न निर्बलों के हित में लगा रहता है।।२१।। दमन का विनाश, राष्ट्रिकों के हित में अभिरुचि और समोत्कर्ष की वृद्धि राष्ट्रनिष्ठ व्यक्ति को करनी चाहिये।।२२।।जो लोग राष्ट्र को हानि पहुँचाकर अपनी उन्नति के लिये प्रयत्न करते हैं और जो शिष्ट पुरुषों को सताते हैं, वे नासमझ हैं। जो मन से भी अपने राष्ट्र के अनिष्ट की बात सोचता है, वह दम्भ और लोभ से ग्रस्त कीर्ति और भद्रता प्राप्त नहीं करता।।२३।।

शान्तिपर्व में उनके लिये कड़े दण्ड और कष्ट की व्यवस्था की गयी है। (शान्ति० १३५.२०-२१)।

राष्ट्रीयता के सम्बन्ध में इटली के राष्ट्रपिता जोसेफ मेत्सनी, भारत के राष्ट्रपिता महात्मा गाँधी, पण्डित जवाहरलाल नेहरु एवं आचार्य नरेन्द्रदेव जैसे राष्ट्रनिष्ठ नेताओं के विचारों का अध्ययन लाभप्रद है। इन सबने जाति, नस्ल तथा सम्प्रदायों के भेद से ऊपर उठकर सब देशवासियों को देशबन्धुत्व की भावना से अनुप्राणित हो अपने को एक शक्तिशाली राष्ट्र में संगठित कर राष्ट्र की स्वतन्त्रता की अभिवृद्धि करते हुए विश्वशान्ति और मानवमात्र के कल्याण के लिये प्रयत्न करना आवश्यक बताया है। ये सब राष्ट्र को मानव समाज का अंग स्वीकार करते हैं, विश्वहित की रक्षा और वृद्धि प्रत्येक व्यक्ति और राष्ट्र का कर्तव्य समझते हैं, देशबन्धुत्व की भावना के साथ साथ

---

१. मालवीयः २. शान्ति. १३५ ३. शान्ति. १३५

सार्वलौकिकसेवा

राजनीतिविशेषज्ञो लोकनीतिविशारदः ।
जनकल्याणकार्येषु स्थितौ ह्यन्योन्यमाश्रितौ ।।१।।

तयोश्च सहयोगो वै समाजोन्नतिकारकः ।
तयोरेव विरोधस्तु सर्वतो दुःखकारणम् ।।२।।

राजनीतिविशेषज्ञैर्लोकज्ञैर्लोकतन्त्रकैः ।
लोकनीत्यभिवृद्धिश्च कर्तव्या वै प्रयत्नतः ।।३।।

लोकनीतिप्रसारेण वर्धयेल्लोकतन्त्रकम् ।
राजनीतिप्रयोगेण लोकनीतिं विवर्धयेत् ।।४।।

अन्योन्यमाश्रिते नीती समलक्ष्यगुणान्विते ।
सर्वदा सहयोगेन कुरुतां लोकमङ्गलम् ।।५।।

स्वतन्त्रता, समता और लोकतन्त्र को राष्ट्र के मूल सिद्धान्त स्वीकार करते हैं। इस तरह ये सब महापुरुष धार्मिक विश्वासों पर आश्रित संकीर्ण साम्प्रदायिक राष्ट्रीयता तथा आधिपत्य की भावना से अनुप्राणित आक्रमणशील राष्ट्रीयता के विरोधी हैं। राष्ट्र के गौरव की अभिवृद्धि के नाम पर दूसरे राष्ट्रों की स्वतन्त्रता का अपहरण तथा साम्राज्यशाही की स्थापना ये महानुभाव निन्दनीय समझते हैं। ये सब विश्वभावना से समन्वित उदार राष्ट्रीयता के पोषक हैं और इस प्रकार की राष्ट्रीयता को संसार की प्रगति और मानव-कल्याण के लिये लाभप्रद समझते हैं। (देखें—मेत्सनी द्वारा लिखित 'ड्यूटीज आफ मैन' (मनुष्य के कर्तव्य) तथा 'आचार्य नरेन्द्रदेव–युग और नेतृत्व', पृ० ४६६-४७२)।

राजनीतिक विशेषज्ञ और लोकनीति के पण्डित जन-कल्याण कार्य में एक दूसरे पर आश्रित हैं, उन दोनों का सहयोग निःसन्देह समाज की उन्नति करने वाला है तथा उनका विरोध सर्वथा दुःख का कारण है।।१-२।। लोकज्ञ लोकतान्त्रिक राजनीतिक विशेषज्ञों को यत्नपूर्वक लोकनीति की अभिवृद्धि करनी चाहिये।।३।। लोकनीति के प्रसार से लोकतन्त्र की तथा राजनीति के प्रयोग से लोकनीति की अभिवृद्धि होती है।।४।। इन दोनों नीतियों का एक ही लक्ष्य है। वे सदा आपस में मिलकर लोककल्याण करें। अर्थात् लोकनीति और राजनीति दोनों का लक्ष्य लोककल्याण की अभिवृद्धि है और दोनों का सहयोग लाभप्रद है।।५।। लोक की आराधना, अर्थात् सेवा में संलग्न लोकनीति-परायण व्यक्ति अच्छे प्रयत्नों द्वारा सार्वलौकिक जीवन की सेवा करते हैं।।६।।

लोकाराधनसंलग्नो लोकनीतिपरायणः ।
सेवते सत्प्रयत्नेन जीवनं सार्वलौकिकम् ।।६।।

शिष्टाचारो न्यायशीलं वाक्यं हितसमन्वितम् ।
लोकप्रीतिर्लोकसेवा लोकाराधनमुच्यते ।।७।।

सदुद्देश्यसमायुक्तः सद्भावेन च संयुतः ।
कर्तव्यज्ञानसम्पन्नः सत्कल्याणगुणान्वितः ।।८।।

स्वातन्त्र्येण समत्वेन सहयोगेन संयुतः ।
व्यवहारश्च लोकानां सार्वलौकिक उच्यते ।।९।।

नागराणां हितार्थाय समाजोत्कर्षहेतवे ।
कृतं च भूतिकर्माणि जीवनं सार्वलौकिकम् ।।१०।।

लोकनीतिविशेषज्ञो लोकाराधनतत्परः ।
ऋद्धिं सिद्धिं परित्यज्य सन्तप्तं भजते भवे ।।११।।

दुष्कार्यनिग्रहं कृत्वा सेवते जनमङ्गलम् ।
हीने दृष्ट्वा च देवत्वं तं विशेषेण सेवते ।।१२।।

लोकाराधनसंलग्नो लोकनीतिपरायणः ।
स्वगुणैः सहकार्येण विवेकेन तितिक्षया ।।१३।।

निष्ठा (विश्वास तथा आशा), विवेक एवं संकल्प से लोककल्याण के निमित्त निष्काम लोकसेवा ही लोक-आराधना कही जाती है।।७।। शुभ उद्देश्य और सद्भावना से सम्पन्न, कर्तव्य तथा ज्ञान एवं कल्याणभाव से समन्वित, समता तथा स्वतन्त्रता और सहयोग से संयुत लोकव्यवहार ही सार्वलौकिक कहा जाता है।।८-९।। लोगों के हित तथा समाज के उत्कर्ष के निमित्त किया गया कल्याणकारी कार्य सार्वलौकिक जीवन कहा जाता है।।१०।। लोकनीति का विशेषज्ञ लोक की आराधना, अर्थात् सेवा में तत्पर ऋद्धि और सिद्धि के विचार का परित्याग कर संतप्त हृदय से संसार में दुष्ट कर्मों का नियन्त्रण करते हुए जनकल्याण को बढ़ाता है तथा हीनता से ग्रस्त लोगों में मनुष्यता के दर्शन कर उनकी विशेष रूप से सेवा करता है।।११-१२।। लोकनीति का ज्ञाता सेवाभाव से विभूषित हो निरन्तर मनुष्यता का अनुष्ठान करता है तथा समता का अनुगमन करता है।।१३।। उच्च भावना तथा देशप्रेम से सम्पन्न व्यक्ति केवल अपने उत्कर्ष से सन्तुष्ट न होकर सदा लोकहित का चिन्तन करता है। वह रचनात्मक कार्य तथा स्नेह से शान्तिपूर्वक राष्ट्र का

प्रतिष्ठापयते सत्यमृध्नोति जगतो हितम्।
वृत्तं रक्षति नित्यं च धैर्यं धारयतेऽनिशम्।।१४।।

सेवाभावसमायुक्तो लोकनीतिविशारदः।
अनुराध्नोति मानुष्यं समत्वं भजतेऽनिशम्।।१५।।

उदात्तभावसम्पन्नो देशप्रेमगुणान्वितः।
नात्मोत्कर्षैस्तर्पणीयः सदा लोकार्थचिन्तकः।।१६।।

रचनात्मकमार्गेण स्नेहेन शान्तिपूर्वकम्।
कुरुते राष्ट्रनिर्माणं सर्वोत्कर्षं च सेवते।।१७।।

भूषितो मानवत्वेन लोकाराधनतत्परः।
प्रगतिं विश्वकल्याणं हितं राष्ट्रस्य सेवते।।१८।।

देशभक्तो दयावीरो दृढग्राही दृढव्रतः।
दाक्ष्याद् दमयते दर्पं दमनं दैन्यदासते।।१९।।

साध्यं च साधनं चैव स्थिते ह्यन्योन्यमाश्रिते।
मानवोचितमार्गेण साध्यं प्राप्नोति साधकः।।२०।।

सर्वोत्कर्षाभिवृद्धिश्च शोषितानां च रक्षणम्।
मानवानां हिते प्रीतिः सेवकानां गुणाः स्मृताः।।२१।।

स्वातन्त्र्यं साम्यबन्धुत्वे त्रय एते वरा गुणाः।
विभूषितो गुणैरेतैराचरेद् लोकसेवकः।।२२।।

निर्माण तथा सबके उत्कर्ष का अनुष्ठान करता है।।१४-१५।। मानवता से विभूषित, लोकसेवा में तत्पर सज्जन प्रगति, विश्वकल्याण, तथा राष्ट्रहित का अनुष्ठान करता है।।१६।। देशभक्त, दयावीर, दृढ़ता से कार्य करने वाला, धैर्यवान्, दक्षता से मनुष्यों के दर्प, दीनता और दासता को खत्म करता है।।१७।। साध्य और साधन एक दूसरे पर आश्रित हैं, मानवोचित उपाय से शुभ साध्य ठीक तौर पर सिद्ध होताहै।।१८।। सबके उत्कर्ष की वृद्धि, शोषितों का संरक्षण, मानवमात्र के हित में प्रीति—यह लोकसेवकों के गुण हैं।।१९।। स्वतन्त्रता, समता और बन्धुता तीन अच्छे गुण हैं। इन गुणों से विभूषित लोकसेवक सदाचरण करता है।।२०।। पराक्रम, बल और बुद्धि बड़े गुण हैं, इन गुणों से सम्पन्न लोकसेवक सदाचरण करे।।२१।। स्वतन्त्रता, समता, बन्धुता, पराक्रम, बल और बुद्धि को ग्रहण कर इनके द्वारा लोकसेवक समाज की सेवा करे।।२२।।

पराक्रमो बलं बुद्धिः शौर्यमेते महागुणाः ।
गुणैरेतैः समायुक्त आचरेत् लोकसेवकः ।।२३।।

लोकतन्त्रम्

रक्षणं सर्वलोकानां स्वातन्त्र्यं समता तथा ।
न्यायो ज्ञानं समोत्कर्षस्तद्राज्यस्य सुलक्षणम् ।।१।।

लोकसेवक सहयोग, सदाचार तथा सत्कर्मों द्वारा सत्य को प्रतिष्ठित करे तथा जगत् के हित को बढ़ाये।।२३।।

कुछ लोकसेवक और राजनीतिज्ञ एक दूसरे के कार्यक्षेत्र के महत्त्व को स्वीकार नहीं करते। पर उनका यह आग्रह अवैज्ञानिक है। दोनों के कार्यक्षेत्रों का अपना महत्त्व है। उनका घनिष्ठ सम्बन्ध है। दोनों के कार्य एक दूसरे को पुष्ट करते हैं। लोकतान्त्रिक जीवन लोकसेवा से पुष्ट होता है। स्वतन्त्र सार्वजनिक जीवन लोकतन्त्र का प्राण है। सब सार्वजनिक कामों का संचालन कोई लोकतान्त्रिक शासन नहीं कर सकता। लोकतान्त्रिक सामाजिक जीवन की संवृद्धि से लोकतन्त्र के सामाजिक सिद्धान्तों पर आश्रित स्वतन्त्र सार्वजनिक संस्थाओं का महत्त्वपूर्ण योग होता है। पर राज्य और राजनीति की उपेक्षा भी नहीं की जा सकती। राजनीति का सर्वथा परित्याग कर अकेली लोकनीति से काम नहीं चल सकता। लोकसेवा को पग पग पर राज्य की रक्षा और सहायता की जरूरत पड़ती है। राज्यविहीन समाज की कल्पना कम से कम मौजूदा युग के लिये तो एक अव्यावहारिक आदर्श ही है। एकमात्र स्वतन्त्र सार्वजनिक संस्थाओं द्वारा समाज का सुचारु रूप से संचालन कम से कम इस युग में तो असम्भव ही है। उसके लिये जितने ऊँचे सामाजिक चरित्र की आवश्यकता है, मानव का उतना चारित्रिक विकास तो अभी नहीं ही हो पाया है। फिर समुचित चारित्रिक विकास हो जाने पर तथा लोकतन्त्र और समता पर आश्रित आर्थिक और सामाजिक व्यवस्था को प्रतिष्ठित कर लेने पर लोकतान्त्रिक राज्य को आसानी से समाजसेवा-संस्था के रूप में बदला भी जा सकता है। उस समय राज्य का मुख्य काम रक्षा और नियन्त्रण के बजाय उन सामाजिक कार्यों की व्यवस्था करना होगा, जिनका सम्बन्ध समान रूप से किसी देश या क्षेत्र की सारी जनता से हो। पिछले सौ सवा सौ वर्ष में राज्य का स्वरूप बदल भी रहा है। सामाजिक नियन्त्रण और रक्षा के साथ साथ सामाजिक कल्याण उसका प्रमुख काम बनता जा रहा है।।

सब लोगों की रक्षा, समता, स्वतन्त्रता, न्याय, ज्ञान तथा समोत्कर्ष—ये राज्य के अच्छे लक्षण हैं।।१।। सब पराधीन कार्य दु:ख का और सब स्वाधीन कार्य सुख

[१]सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
लोकतन्त्रे सर्वलोकाः स्वातन्त्र्यं प्राप्नुवन्ति वै ।।२।।

सर्वेषु संविधानेषु श्रेष्ठं वै लोकतन्त्रकम् ।
तस्मिन् सर्वे नागरास्तु सर्वसत्तासमन्विताः ।।३।।

समत्वसहितं न्यायं स्वातन्त्र्यमधिकारकम् ।
मानवं गौरवं ज्ञानमैश्वर्यं चाप्नुवन्ति ते ।।४।।

समत्वं देशबन्धुत्वं स्वातन्त्र्यं सहकारिता ।
न्यायो नराधिकारश्च लोकतन्त्रं प्रशस्यते ।।५।।

तितिक्षुः कर्तव्यनिष्ठः कार्यशीलः पराक्रमी ।
सुवृत्तः शीलसम्पन्नः समो लोकार्थचिन्तकः ।।६।।

देशभक्तो न्यायशीलः स्वातन्त्र्ये परिनिष्ठितः ।
सहकार्ये राष्ट्रहिते रतो वै लोकतान्त्रिकः ।।७।।

[२]न कञ्चिदवमन्येत सर्वस्य शृणुयान्मतम् ।
[३]तितिक्षा मतभेदेषु कर्तव्या लोकतान्त्रिकैः ।।८।।

[४]सभ्येष्वपक्षपातस्तु सुहितोक्तिश्च मन्त्रिषु ।
देशभक्तिर्मनुष्येषु सुभूषणमुदाहृतम् ।।९।।

का कारण है। लोकतन्त्र में ही सब लोग स्वतन्त्रता प्राप्त करते हैं।।२।। सब संविधानों में लोकतन्त्र ही श्रेष्ठ है। उसमें सर्वाधिकारों से समन्वित सब नागरिक समता सहित न्याय, स्वतन्त्रता, अधिकार, मानव-गौरव, ज्ञान तथा ऐश्वर्य प्राप्त करते हैं।।३-४।। समता, देशबन्धुता, स्वतन्त्रता, सहकारिता, न्याय तथा मानव-अधिकार लोकतन्त्र कहलाता है, अर्थात् ये सब लोकतान्त्रिक राज्य के मुख्य लक्षण हैं।।५।। सहनशील, लोकनिष्ठ, कार्यकुशल, पराक्रमी, सदाचारी, शीलसम्पन्न, कर्तव्य में तत्पर, देशभक्त, न्यायशील तथा स्वतन्त्रता में दृढ़ विश्वास एवं सह कार्य और राष्ट्र में रुचि रखने वाला पुरुष ही लोकतान्त्रिक है।।६-७।। लोकतान्त्रिक किसी का अपमान न करे, सबका मत सुने तथा मतभेद में सहनशील रहे।।८।। सभासदों में पक्षपात का अभाव, मन्त्रियों में हित के वचन, मनुष्यों में देशभक्ति भूषण है।।९।। लोकतान्त्रिक पुरुष लोगों के कल्याण की

---

१. मनु. ४.१६० २. अर्थशास्त्र १.१५ ३. मालवीयः
४. शुक्र. ३.२२७

लोकानां क्षेममन्विच्छेत् पुरुषो लोकतान्त्रिकः ।
श्रुत्वा ज्ञानं लोकहितं न्यायवृत्तिं हि धारयेत् ।।१०।।

[1]लोकतान्त्रिकलोकज्ञो राज्यपण्यं न कारयेत् ।
[2]यत् कल्याणमभिध्यायेत् तत्रात्मानं नियोजयेत् ।।११।।

[3]भेदमूलो विनाशो हि गणानामुपलक्षये ।
[4]तस्मात् सङ्घातमेवाहुर्गणानां शरणं महत् ।।१२।।

[5]अर्थं चैवाधिगम्येत सङ्घातबलपौरुषैः ।
[6]तस्मात् सङ्घातयोगेन प्रयतेरन् गणाः सदा ।।१३।।

[7]मानयन्तो महोत्साहान् कर्मसु स्थिरपौरुषम् ।
यथावत् प्रतिपश्यन्तो विवर्धन्ते गणोत्तमाः ।।१४।।

सभ्यो लोकसभां गत्वा समस्यां परिचिन्तयेत् ।
नयं कृत्वा विवेकेन हितं लोकस्य वर्धयेत् ।।१५।।

सभ्यो लोकसभामध्ये लोकसेवाव्रतान्वितः ।
लोकतन्त्रस्य मर्यादां प्रथां च परिपालयेत् ।।१६।।

खोज करे, ज्ञान की बात सुनकर न्यायकार्य को धारण करे।।१०।। लोकतान्त्रिक लोकज्ञ 'राज्य को बाजार का सौदा न बनाये'। जिस कार्य को सबके लिये कल्याणकारी समझे, उसीमें अपने आपको लगाये, अर्थात् राज्य के कार्य में स्वार्थ-सिद्धि के लिये सौदेबाजी न कर जनकल्याण की अभिवृद्धि ही करे।।११।। गणराज्यों के विनाश का मूल कारण आपस की फूट ही दिखाई देती है। अतः संगठन ही गणराज्यों का महान् आश्रय है।।१२।। जो सामूहिक बल और पौरुष से सम्पन्न हैं, वे सब प्रकार के अभीष्ट अर्थ प्राप्त कर लेते हैं। इसलिये गण सदा मेल की रीति से प्रयत्न करें।।१३।। महान् उत्साही तथा सभी कार्यों में पुरुषार्थ का परिचय देने वालों का गणोत्तम संमान करते हैं तथा यथोचित दृष्टि से देखते हुए आगे बढ़ते जाते हैं।।१४।। लोकसेवा के संकल्प से युक्त सभासद लोकसभा में लोकतन्त्र के सिद्धान्त तथा मान्यताओं का पालन करे, लोकतन्त्र के मार्ग से लोकन्याय को स्थापित रखे, साहस तथा विवेक से भ्रष्टाचार का विरोध करे,

---

१. शान्ति. २४.१६ २. शान्ति. ९४.१० ३. शान्ति. १०७.८

४. शान्ति. १०७.३२ ५. शान्ति. १०७.२५ ६. शान्ति. १०७.२४

७. शान्ति. १०७.२०

लोकतन्त्रस्य मार्गेण लोकन्यायं विधारयेत्।
साहसेन विवेकेन भ्रष्टाचारं विरोधयेत्।।१७।।
रचनात्मकसङ्घर्षैरन्यायं प्रतिरोधयेत्।
संवर्धयेच्च स्वातन्त्र्यं कल्याणं साम्यभद्रताम्।।१८।।
दलविश्वाससम्पन्नं जनसम्मानसम्भृतम्।
लोकज्ञानसमायुक्तं लोकसेवाव्रतान्वितम्।।१९।।
कार्यकौशलशक्तिभ्यां भूषितं मन्त्रिमण्डलम्।
सभायाः सहयोगेन राज्यकार्यं विधारयेत्।।२०।।
सभाया बहुसंख्याभिः सुसमर्थितमण्डलम्।
समारक्षेच्च राष्ट्रस्य व्यवस्थां शान्तिगौरवम्।।२१।।
राष्ट्रिकाणामधीकारं सम्मानं परिपोषयेत्।
राष्ट्रोत्थानं वर्धयेच्च सर्वोत्कर्षं च मङ्गलम्।।२२।।
सभायाश्चैव सम्मानः कर्तव्यो मण्डलेन वै।
तयोश्च सहयोगेन लोकतन्त्रं सुसिद्ध्यति।।२३।।
सभा पदान्निराकृत्य दूषितं मन्त्रिमण्डलम्।
अधिकुर्वीत सामर्थ्यं मण्डलं च यथास्थितम्।।२४।।
लोकतन्त्रे सर्वसभ्या मन्त्रिमण्डलमेव च।
प्राप्यन्ते नागरेभ्यस्तेऽधिकारं पदगौरवम्।।२५।।

रचनात्मक संघर्षों से अन्याय को रोके तथा स्वतन्त्रता, कल्याण, समता एवं भद्रता को बढ़ाये।।१५-१७।। लोकतन्त्र के सभ्य लोकसभा में विवेक के साथ सभाध्यक्ष के गौरव को लोकतान्त्रिक आचार, रीति, लोकसंस्कृति को, सब भेदों में (वाद विवाद में) सौजन्य को एवं सब सदस्यों में भद्रता को पुष्ट करें।।१८-१९।। सभासद लोकसभा में जाकर समस्या पर विचार करें, विवेक से न्याय करके लोक की हित की वृद्धि करें।।२०।। दल के विश्वास से सम्पन्न, जनता के सम्मान से समन्वित, लोकज्ञान तथा लोकसेवा के संकल्प से युक्त एवं कार्य-कौशल और शक्ति से विभूषित मन्त्रिमण्डल सभा के सहयोग से राज्य के कार्य को संभाले।।२१-२२।। सभा के बहुसंख्यक सदस्यों से समर्थित मन्त्रिमण्डल राष्ट्र की व्यवस्था, शान्ति तथा गौरव की रक्षा करे, नागरिकों के अधिकार और संमान को पुष्ट करे, एवं राष्ट्र के उत्थान, सबके उत्कर्ष तथा मंगल को बढ़ाये।।२३-२४।। सभा का संमान मन्त्रिमण्डल का कर्तव्य है। दोनों के सहयोगों से ही लोकतन्त्र अच्छी तरह सफल होता है।।२५।। सभा दूषित मन्त्रिमण्डल को अपने पद से हटाकर

कर्तव्यस्य समायोगादधिकारो विशुद्ध्यति ।
नागराणां हितार्थाय ह्यधिकारं प्रयोजयेत् ।।२६।।

मन्त्रिणां सर्वकार्याणां विवेकन्यायसाहसैः ।
समीक्षां नागरः कृत्वा रक्षेद् वै लोकतन्त्रकम् ।।२७।।

समीक्षारहितं स्वत्वमाधिपत्यमुदाहृतम् ।
स्वत्वं समीक्षया युक्तं लोकतन्त्रस्य लक्षणम् ।।२८।।

लोकतन्त्राधिकारैश्च भूषितैः सर्वनागरैः ।
समाजमाधिपत्यं च रक्षेयुश्च प्रयत्नतः ।।२९।।

वर्धयेयुः समत्वं वै श्रमिकक्षेमशासनम् ।
अधिकारं मनुष्याणां लोकतन्त्रपरम्पराम् ।।३०।।

लोकनेता

लोकनेता जनाधीनः सेवको मार्गदर्शकः ।
जनविश्वाससम्पन्नः सेवते जनमङ्गलम् ।।१।।

भूषितो लोकशीलेन विद्यावृत्तव्रतान्वितः ।
शोभितो न्यायशौर्याभ्यां नीतिज्ञः कार्यतत्परः ।।२।।

स्थिति के अनुकूल दूसरे समर्थ मण्डल को स्थापित करे।।२६।। लोकतन्त्र में सब सभासद और मन्त्रिमण्डल नागरिकों से अधिकार, पद और गौरव प्राप्त करते हैं। कर्तव्य के योग से ही सत्ता का अधिकार शुद्ध होता है। मनुष्यों के हित में ही उसका प्रयोग किया जाना चाहिये।।२७।। विवेक, न्याय तथा साहस से मन्त्रियों के सब कामों की समीक्षा करके नागरिक लोकतन्त्र की रक्षा करे।।२८।। समीक्षा से रहित अधिकार आधिपत्य कहलाता है। समीक्षा से युक्त सत्ता ही लोकतन्त्र का लक्षण है।।२९।। लोकतान्त्रिक अधिकारों से सम्पन्न सब नागरिकों द्वारा यत्नपूर्वक समाज को आधिपत्य से बचाया जाय तथा समता, श्रमिकों के कल्याणकारी शासन, मनुष्यों के अधिकार तथा लोकतान्त्रिक परम्परा की अभिवृद्धि की जाय।।३०।।

जनशक्ति समाज की शक्ति का मूल कारण, अर्थात् स्रोत है। जनशक्ति पर आधृत राज्य ही लोकतान्त्रिक राज्य है।।१।। जनशक्ति की अभिवृद्धि ही सबके उत्कर्ष का साधन है। इसलिये सब प्रयत्नों से जनशक्ति को बढ़ाये।।२।। जनशक्ति और नेतृत्व एक दूसरे की उत्कृष्टि, अर्थात् उन्नति के हेतु हैं। उन दोनों के अच्छे सम्बन्ध से ही लोकमंगल

जनविश्वाससम्पन्नः सर्वोत्कर्षपरायणः ।
प्रेरितो मानवत्वेन लोकनेता प्रकीर्तितः ।।३।।

स्वातन्त्रस्य परो भक्तः सर्वस्वातन्त्र्यरक्षकः ।
जनसम्मानसंयुक्तो देशप्रेमाम्बुसम्भृतः ।।४।।

ज्ञाता भूतभविष्यस्य प्रतिपत्तिविशारदः ।
युक्तः सिद्धान्तलक्ष्याभ्यां लोकनेता प्रकीर्तितः ।।५।।

साहसी सत्यसङ्कल्पः सद्भावेन समन्वितः ।
आशाऽऽदर्शसमायुक्तः सङ्कष्टेनापराजितः ।।६।।

धैर्योत्साहसमायुक्तः शिष्टः सर्वोपकारकः ।
कर्तव्यकर्मसंलग्नो लोकनेता प्रकीर्तितः ।।८।।

राजनीतिविशेषज्ञो रचनाक्रान्तिकोविदः ।
प्रगतिप्रदसंदक्षः समः सौहार्दसंयुतः ।।९।।

कुशलः सहकार्येषु तितिक्षुर्दृढनिश्चयः ।
लोकार्थन्यायलोकज्ञो लोकनेता प्रकीर्तितः ।।१०।।

सन्तप्तो दीनदुःखेन दीनहीनहिते रतः ।
सत्पथे यः स्थितो नित्यं लोकनेता स वै स्मृतः ।।११।।

बढ़ता है।।३।। नेतृत्वविहीन राज्य नेत्रहीन कहलाता है। गुणसम्पन्न नेतृत्व राष्ट्र की उन्नति का अच्छा साधन है।।४।। लोकशील, विद्या, सदाचार तथा व्रत से सम्पन्न, न्याय और शौर्य से सुशोभित, नीतिज्ञ, कार्य में संलग्न, जनता का विश्वासभाजन, सबकी उन्नति में रत, मानवता से प्रेरित महानुभाव ही लोकनेता कहलाता है।।५-६।। स्वतन्त्रता का परम भक्त, सबकी स्वतन्त्रता का रक्षक, जनता द्वारा सम्मानित, देशप्रेम से सम्पन्न, अतीत तथा भविष्य का जानकार, परिस्थिति का ज्ञाता तथा सिद्धान्त और लक्ष्य से युक्त पुरुष लोकनेता कहा जाता है।।७-८।। राजनीति का विशेषज्ञ, रचना और क्रान्ति दोनों में दक्ष, प्रगतिशील विद्वान्, समता का व्यवहार करने वाला, सौहार्द सम्पन्न, सह कार्यों में कुशल, सहनशील, दृढ़ निश्चयी तथा लोकहित, न्याय एवं लोक की परिस्थिति का जानकार ही लोकनेता कहलाता है।।९-११।। साहसी, प्रतिज्ञा का पालन करने वाला, शुभ भावनाओं से सम्पन्न, आशा तथा आदर्श से युक्त, संकष्ट से अपराजित, धैर्य एवं

जनशक्तिः समाजस्य शक्तेश्च मूलकारणम् ।
जनशक्त्याधृतं राज्यं लोकतान्त्रिकमुच्यते ।।१२।।

जनशक्त्यभिवृद्धिर्हि सर्वोत्कर्षप्रसाधनम् ।
तस्मात् सर्वप्रयत्नेन जनशक्तिं विवर्धयेत् ।।१३।।

जनशक्तिश्च नेतृत्वमन्योन्योत्कृष्टिहेतुके ।
सुसम्बन्धात् तयोरेव वर्धते लोकमङ्गलम् ।।१४।।

राष्ट्रं नेतृत्वहीनं हि नेत्रहीनमुदाहृतम् ।
गुणसम्पन्ननेतृत्वं राष्ट्रोत्कर्षप्रसाधनम् ।।१५।।

आशानुप्राणितो नेता समत्वादर्शसंयुतः ।
साहसोत्साहसंयुक्तो विरोधेनापराजितः ।।१६।।

रचनाक्रान्तिसङ्घर्षैः समाजोत्कर्षहेतवे ।
स्थापनाय समत्वस्य प्रयत्नं कुरुतेऽनिशम् ।।१७।।

नेतृत्वं गुणहीनं च सर्वथा हानिकारकम् ।
व्याजेन कुरुते सेवां लभते कीर्तिगौरवम् ।।१८।।

उत्साह से सम्पन्न, शिष्ट, सबका उपकार करने वाला, कर्तव्य में संलग्न व्यक्ति ही लोकनेता कहलाता है।।१२-१४।। दीनों के दुःख से सन्तप्त, दीनों तथा साधनहीन पुरुषों के हित में संलग्न सदा सत्पथ में स्थित पुरुष ही लोकनेता है।।१५।।

लोकनेता के लिये बहुगुणसम्पन्न होना आवश्यक है। ऊपर लिखे श्लोकों में इनमें से कुछ गुणों की ओर संकेत किया गया है। गुणी व्यक्ति ही समाज का ठीक ठीक नेतृत्व कर सकता है।

लोकनेता जनता के अधीन तथा उसका सेवक और मार्गदर्शक है। जनता के विश्वास से सम्पन्न वह लोककल्याण करता है।।१६।।

लोकनेता का जनता से घनिष्ठ सम्बन्ध है। वह जनता का मार्गदर्शक ही नहीं, उसका सेवक भी है। जनसेवा ही उसके नेतृत्व, अर्थात् मार्गदर्शन का लक्ष्य है। जनता का विश्वास उसके नेतृत्व का आधार है। अपने सब कार्यों के लिये वह जनता का उत्तरदायी है और इस तरह वह जनता के अधीन है।

आशा से अनुप्राणित तथा समता, आदर्श, साहस एवं उत्साह से सम्पन्न, विरोध से अपराजित नेता रचना, क्रान्ति तथा संघर्ष से समाज की अभिवृद्धि तथा समता की स्थापना के निमित्त निरन्तर प्रयत्न करता है।।१७-१८।। गुणहीन नेतृत्व सर्वथा

विवर्धयति पाखण्डं दुराचारं च मत्सरम् ।
आधिपत्यमहङ्कारं भ्रष्टाचारं च शोषणम् ।।१९।।

गुणेभ्यश्च विनिर्मुक्ता भ्रष्टाचारा गणोत्तमाः ।
लोकन्यायं विकुर्वन्ति सार्वलौकिकजीवनम् ।।२०।।

स्वातन्त्र्यं नागराणां च राष्ट्रस्य कीर्तिगौरवम् ।
समाजादर्शकल्याणे व्यवस्थां लोकतान्त्रिकीम् ।।२१।।

राष्ट्रोत्थानं नरोत्कर्षं राष्ट्रिकानां च निष्ठताम् ।
भावनां राष्ट्रमर्यादां नागरत्वं च संस्कृतिम् ।।२२।।

राष्ट्रकल्याणपुष्ट्यर्थं राष्ट्रिका दृढनिश्चयाः ।
नेतॄणां सर्वकार्याणां समीक्षां कुर्वतेऽनिशम् ।।२३।।

नेतृत्वाद्धि निराकृत्य नेतारं गुणवर्जितम् ।
समर्थयन्ते नेतारं गुणवन्तं हि राष्ट्रिकाः ।।२४।।

प्रशासनम्

आभ्यन्तराद् भयाद् रक्ष्यं राष्ट्रं रक्ष्यं बहिर्भयात् ।
कर्तव्यः सततं यत्नः स्वराष्ट्रपरिपालने ।।१।।

परित्राणाय दीनानां विनाशाय च दुष्कृताम् ।
स्वातन्त्र्यरक्षणार्थं च न्यायाद् दण्डं प्रयोजयेत् ।।२।।

हानिकारक है। वह चालाकी से सेवा करता तथा कीर्ति और गौरव प्राप्त करता है एवं पाखण्ड, दुराचार, ईर्ष्या, आधिपत्य, अहङ्कार, भ्रष्टाचार और शोषण को बढ़ाता है।।१९-२०।। गुणों से हीन भ्रष्टाचारी गणनेता लोकन्याय, सार्वजनिक जीवन, नागरिकों की स्वतन्त्रता, राष्ट्र की कीर्ति और गौरव, समाज के आदर्श और कल्याण तथा लोकतान्त्रिक व्यवस्था, सबको विकृत कर देता है।।२१-२२।। राष्ट्रकल्याण की पुष्टि के लिये दृढ निश्चय सम्पन्न नागरिक नेताओं के सब कामों की निरन्तर समीक्षा करते हैं।।२३।। गुणविहीन नेता को नेतृत्व से अलग कर नागरिक गुणवान् नेता का समर्थन करते हैं।।२४।।

आन्तरिक तथा बाह्य भय से राष्ट्र की रक्षा करनी चाहिए। राष्ट्र के पालन करने में भी निरन्तर प्रयत्न करना चाहिए।।१।। सब लोगों की रक्षा राज्य का कर्तव्य है। इसके लिए तीक्ष्ण समय में तीक्ष्ण और मृदु काल में कोमल होना चाहिए।।२।।

रक्षणं सर्वलोकानां राज्यकर्तव्यमुच्यते ।
तीक्ष्णकाले भवेत् तीक्ष्णं मृदुकाले मृदुर्भवेत् ।।३।।

राज्यं गतिसमायुक्तं सुराज्यं प्रगतिप्रियम् ।
नित्यं प्रगतिदं राज्यं वर्धयेल्लोकमङ्गलम् ।।४।।

[1]प्रजानन्देन सन्तुष्येत्तद् दुःखैर्दुःखितो भवेत् ।
[2]अवृत्तिव्याधिशोकार्तानुवर्तेत शक्तितः ।।५।।

[3]सन्धेयानभिसन्धत्स्व विरोधाँश्च विरोधय ।
[4]अभृतानां भवेद्भर्ता भृतानामन्ववेक्षकः ।।६।।

प्रशासको नीतिनिपुणो दण्डशक्तिसमन्वितः ।
[5]साम्ना दानेन मानेन प्रकृतीरनुञ्जयेत् ।।७।।

[6]यो यत्र कुशलः कार्ये तं तत्र विनियोजयेत् ।
यत्कार्ये यो नियुक्तः स्याद् भूयात्तत्कार्यतत्परः ।।८।।

कुछ शास्त्रकारों ने कोमल उपायों की प्रशंसा करते हुए कहा है कि कोमल उपाय ही सर्वोत्तम हैं। कोमलता कठिन समय में भी लाभप्रद होती है (देखें शान्ति. १४०.६६)। पर दूसरे विद्वानों के विचार में तेज परिस्थिति में तीक्ष्ण उपायों का प्रयोग आवश्यक हो जाता है। (देखें शान्तिपर्व १४०.६५-६७)।।

प्रजा के आनन्द से सन्तुष्ट तथा उसके दुःख से दुःखी होना चाहिए। बेरोजगारी, रोग और शोक से जो दुःखी हैं, शक्ति भर उनका पालन किया जाय।।३।। जो सन्धि करने योग्य हैं, उनसे सन्धि करना चाहिए और जो विरोध के पात्र हों उनका विरोध करना चाहिए। जिनके भरण पोषण का प्रबन्ध न हो, उनका पोषण और जिनका भरण पोषण चल रहा है, उन सबकी देख-भाल करना चाहिए।।४।। राज्य-शक्ति से सम्पन्न नीतिनिपुण प्रशासक साम, दान तथा मान से जनता को प्रसन्न करे।।५।। अपने अपने कामों में संलग्न न्यायशील प्रशासक जो उसे रुचिकर है, उसे छोड़कर लोक के हित को बढ़ाये।।६।। न्याय में संलग्न शासक लोभ से प्रजा को दण्ड देकर दुःखी न करे। सदा थोड़ा दण्ड देने वाला तथा सुधारक बने।।७।। भेद और अतिदण्ड से प्रजा का पालन करे। प्रजा के अतिदण्ड और भेद से राज्य का विनाश होता है।।८।।

---

१. शुक्र. ४.५२३ २. शुक्र. ३.८ ३. शान्ति. ५७.४
४. शान्ति. ५७. २९ ५. कामन्दक ८.७० ६. शुक्र. २.२२७

दक्षो धीरो न्यायनिष्ठो निर्भीकः स्थिरनिश्चयः ।
सत्पक्षे वै स्थितो नित्यं स्मृतोऽयं वै प्रशासकः ।।९।।

विवेकी नीतिकुशलः समः सर्वोपकारकः ।
कर्तव्यनिष्ठः सत्यार्थी विदुस्तं वै प्रशासकम् ।।१०।।

स्वे स्वे कर्मण्यभिरतो न्यायशीलः प्रशासकः ।
स्वयं प्रियं परित्यज्य हितं लोकस्य वर्धयेत् ।।११।।

रक्षणार्थं दुर्बलानां दण्डार्थं च दुरात्मनाम् ।
प्रयत्नं कुरुते नित्यं न्यायशीलः प्रशासकः ।।१२।।

[१]रक्षार्थं सर्वलोकानां लोककल्याणहेतवे ।
दण्डाधिकारौ धर्त्तव्यौ न्यायशीलैः प्रशासकैः ।।१३।।

शुक्र के साथ साथ परोक्ष रूप से कामन्दक ने भी इस बात की पुष्टि की है। (देखें कामन्दक, ८.७०)।।

सब लोगों की रक्षा तथा लोककल्याण के निमित्त न्यायशील प्रशासक से दण्ड और अधिकार धारण किया जाना चाहिये।।९।। दण्ड रक्षा के लिए निर्मित है, वह आधिपत्य के लिए नियत नहीं किया गया है। लोगों की रक्षा के लिए न्याय से दण्ड प्रयोग किया जाय।।१०।। कभी उग्र दण्ड देने वाला न हो। युक्त दण्ड देने वाले की ही प्रशंसा होती है। इसलिए सुधी सब प्रयत्नों से वध-दण्ड त्याग दे।।११।।

भीष्म तथा कामन्दक द्वारा युक्तदण्ड एवं शुक्र द्वारा सुभागदण्ड का समर्थन उनके अपने युग के लिए ही नहीं, आधुनिक युग के लिए भी काफी प्रगतिशील है। कामन्दक और शुक्र दोनों ने वध-दण्ड का विरोध किया है। पर कामन्दक ने लोकविद्वेषी दुष्ट का वध उचित समझा है। भीष्म ने भी ऐसा कहा है। यद्यपि बहुत से अर्वाचीन विद्वान् वध-दण्ड का विरोध कर रहे हैं, पर करीब करीब सभी देशों में अभी भी वध-दण्ड की व्यवस्था कायम है, यद्यपि उसका क्षेत्र धीरे-धीरे कम होता जा रहा है। इसी तरह शुक्र का यह विचार कि जनता में भेद पैदा करके उनपर शासन करने की इच्छा निन्दनीय है, क्योंकि उससे तो राष्ट्र की शक्ति ही क्षीण होती है, निःसन्देह महत्त्वपूर्ण है।

निपुणता से साम, दान, दण्ड, भेद इन चार उपायों से नीतिज्ञ राष्ट्र के हित की रक्षा और अभिवृद्धि करे।।१२।। जब तक किसी तरह सन्धि हो सकती है, तब तक युद्ध को स्वीकार न करे। सबसे पहले साम ही श्रेष्ठ है। साम में ही सिद्धि व्यवस्थित

---

१. शुक्र. ४.३८

स्वप्रजानां न भेदेन नातिदण्डेन पालनम् ।
[1]स्वप्रजादण्डभेदैश्च भवेद्राज्यविनाशनम् ।।१४।।
[2]अर्थानामननुष्ठाता कामचारी विकत्थनः ।
प्रशासको दुराचारी हरते लोकमङ्गलम् ।।१५।।
प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं शासकमिच्छन्ति समाजहितचिन्तकाः ।।१६।।
रक्षार्थं विहितो दण्डः नाधिपत्यार्थमिष्यते ।
रक्षणार्थं च लोकानां न्यायाद् दण्डं प्रयोजयेत् ।।१७।।
स्वातन्त्र्यं शासकेभ्यस्तु समत्वं चात्मनिग्रहः ।
न्यायनिष्ठा विवेको वै न्यायाधीशस्य सद्गुणाः ।।१८।।
न्यायशास्त्रविदो धीराः समाः शिष्टा गुणान्विताः।
विवेकशीला निर्भीका न्यायाधीशाः प्रकीर्तिताः ।।१९।।
परित्राणाय साधूनां न्यायस्थापनहेतवे ।
कुर्वते सततं यत्नं न्यायाधीशा नरोत्तमाः ।।२०।।

है।।१३।। नीतिज्ञ पुरुष को पहले साम का उपयोग करना चाहिए। युद्ध को उपस्थित देखकर साम के प्रयोग से उसे शान्त करे।।१४।। साम तथा सहयोग से स्वतन्त्रता की ठीक तौर पर रक्षा करे। युद्ध में प्राण और धन से भी स्वतन्त्रता की रक्षा करनी चाहिए।।१५।। दान और भेद भी नीतिज्ञ द्वारा उचित रूप से प्रयोग किया जाना चाहिए। माया, उपेक्षा, इन्द्रजाल को यथाशक्ति छोड़ दिया जाय।।१६।।

मनु, भीष्म और शुक्र ने माया, उपेक्षा तथा इन्द्रजाल के प्रयोग की कोई चर्चा नहीं की है। कोटिल्य ने काफी विस्तार से इनके प्रयोगों की व्याख्या की है। आधुनिक जगत् में माया और इन्द्रजाल का काफी प्रयोग किया जा रहा है, पर प्रगतिशील विद्वान् इन प्रयोगों की निन्दा करते हैं।।

जो जिस कार्य में कुशल हो, उसे उसी काम में लगाए। जो जिस कार्य में नियुक्त हुआ है, वह उसीमें तत्पर रहे।।१७।। वही प्रशासक है, जो दक्ष, वीर, न्यायनिष्ठ, निर्भीक, दृढ़ संकल्प तथा सच्चे पक्ष में स्थिर रहता है, अर्थात् उसका पालन-पोषण और पुष्टि करता है।।१८।। जो विवेकी नीतिकुशल, सबके साथ एकता का व्यवहार करने वाला, सबका उपकार करने वाला, कर्तव्यनिष्ठ तथा सत्यार्थी है, उसीको प्रशासक जानो।।१९।। प्रशासन के अधिकारियों से स्वतन्त्रता, समता, आत्मनियन्त्रण,

१. शुक्र. ४.३९ २. शान्ति. ९२.१०

दमनं शोषणं तापं विनाशयितुमुद्यताः ।
लोकन्यायविधातारो न्यायाधीशाः प्रकीर्तिताः ।।२१।।

न्यायाधीशः सभां गत्वा रागद्वेषविवर्जितः ।
न्यायं कृत्वा विवेकेन हितं लोकस्य वर्धयेत् ।।२२।।

[१]सभा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् ।
न्यायाधीशेन कर्तव्यो न्यायः शौर्येण निष्ठया ।।२३।।

[२]कदापि नोग्रदण्डः स्याद् युक्तदण्डः प्रशस्यते ।
[३]तस्मात् सर्वप्रयत्नेन वधदण्डं त्यजेत् सुधीः ।।२४।।
[४]न कर्षयेत् प्रजां लोभात् शासको न्यायतत्परः ।
[५]सदा सुभागदण्डी स्यात् तथा स्याच्च सुधारकः ।।२५ ।।
[६]सन्निपातो न मन्तव्यः शक्ये सति कथञ्चन ।
[७]सामैव प्रथमं श्रेष्ठं सिद्धिः साम्नि व्यवस्थिता ।।२६।।
[८]आदौ साम प्रयोक्तव्यं पुरुषेण विजानता ।
[९]साम्नैव विलयं याति विद्वेषप्रभवं तमः ।।२७।।
[१०]आगतं विग्रहं दृष्ट्वा सुमाम्ना प्रशमं नयेत् ।
साम्ना च सहयोगेन कल्याणं साधयेत् सुधीः ।।२८।।

न्यायनिष्ठा और विवेक निःसन्देह न्यायाधीश के सद्गुण हैं।।२०।। जो न्यायशास्त्र के पण्डित तथा धीर हैं, सबसे एक सा व्यवहार करते हैं, शिष्ट और गुणी हैं एवं विवेकशील और निर्भीक हैं, वे ही न्यायाधीश हैं।।२१।। मनुष्यों में उत्तम न्यायाधीश निरन्तर साधुओं की रक्षा तथा न्याय की प्रतिष्ठा के निमित्त प्रयत्न करते हैं।।२२।। दमन, शोषण तथा सन्ताप को नाश करने में उद्यत तथा लोकन्याय के विधाता न्यायाधीश कहलाते हैं।।२३।। या तो सभा में जाना ही नहीं चाहिये या वहाँ जाकर ठीक बात कहना चाहिए। दृढ़ता और निष्ठा से न्यायाधीश द्वारा न्याय किया जाना चाहिए।।२४।। न्यायाधीश सभा में जाकर रागद्वेष का परित्याग कर विवेकपूर्वक न्याय करके लोक के हित को बढ़ाये।।२५।।

---

१. मनु. ८.१३ २. शुक्र. ३.८१; कामन्दक. २४.२६ ३. शुक्र. ४.८९
४. शुक्र. ४.९० ५. शुक्र. ४.९२ ६. शान्ति. १०२.२२
७. शुक्र. ४.३४; हितो. सन्धि ९९ ८. पंच. १ तन्त्र ४१० ९. पंच. १ तन्त्र ४११
१०. पंच. ३ तन्त्र २१

साम्ना भेदेन दानेन दण्डेनेति चतुर्विधम् ।
हितं राष्ट्रस्य नीतिज्ञो रक्षयेद् वर्धयेत्तथा ।।२९।।

साम्ना च सहयोगेन समारक्षेत् स्वतन्त्रताम् ।
स्वातन्त्र्यं रक्षितव्यं हि युद्धे प्राणैर्धनैरपि ।।३०।।

नीतिज्ञैर्दानभेदौ तु प्रयोज्यौ च यथोचितम् ।
मायोपेक्षेन्द्रजालं तु यथाशक्यं परित्यजेत् ।।३१।।

विश्वशान्तिः

राष्ट्रस्य गौरवं रक्ष्यं लोकानां च स्वतन्त्रता ।
राष्ट्रोत्कर्षो विश्वशान्तिर्वर्धनीयौ प्रयत्नतः ।।१।।

[१]न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
[२]कारणेनैव जायन्ते मित्राणि रिपवस्तथा ।।२।।

सर्वं वैरविवादं च न्यायेन परिशोधयेत् ।
[३]रिपवो येन जायन्ते कारणं तत्परित्यजेत् ।।३।।

विश्वनिष्ठा हि मन्यन्ते [४]वसुधैव कुटुम्बकम् ।
विश्वशान्तिहिते न्यायं बन्धुत्वं वर्धयन्ति ते ।।४।।

राष्ट्र के गौरव तथा जनता की स्वतन्त्रता की रक्षा करनी चाहिये, प्रयत्नपूर्वक राष्ट्र की उन्नति और विश्व की उन्नति को बढ़ाना चाहिये।।१।। न कोई किसी का मित्र है और न कोई किसी का रिपु। किसी कारण से मित्र और शत्रु बनते हैं।।२।।

कौटल्य ने अर्थशास्त्र में 'मण्डल' सिद्धान्त की व्याख्या की है। उसमें उसने स्वाभाविक मित्र और स्वाभाविक शत्रु बताये हैं। पर महाभारत में इसकी कोई चर्चा नहीं है। उसमें कहा गया है कि कारण के बदलने, हितों में भेद होने पर शत्रु मित्र और मित्र शत्रु बन सकते हैं। (देखें शान्तिपर्व १३८.१३; १३८.११०; १४०.५१)।।

सब वैर और विवाद को न्याय से धो डाला जाय। जिस कारण से शत्रु बनते हैं, उसे छोड़ा जाय।।३।। सब उपायों में सहयोग विशिष्ट है। अतः मनुष्यों और राष्ट्रों के सहयोग को अच्छी तौर पर बढ़ाया जाय।।४।।

---

१. शान्ति. १३८.१२ २. कामन्दक ८.१२ ३. कामन्दक ८.५०
४. हितो. मित्र. ७०

साम्ना च सहयोगेन विश्वशान्तिं विधारयेत्।
समाचरेत् विश्वहितं कल्याणमभिवर्धयेत्।।५।।

उपक्रमेषु सर्वेषु सहयोगो विशिष्यते।
ततो नृणां च राष्ट्राणां सहयोगं विवर्धयेत्।।६।।

[1]अपि यत्सुकरं कर्म तदप्येकेन दुष्करम्।
सहयोगेन विश्वस्य जनकल्याणमावहेत्।।७।।

[2]अन्योऽन्यसमुपष्टम्भादन्योन्योपश्रयेण च।
मनुष्या मङ्गलानन्दमुत्कर्षं प्राप्नुवन्ति वै।।८।।

सर्वेषां सहयोगेन विश्वभावगुणान्वितः।
विश्वसङ्घो हि विश्वस्य शान्तिश्च जगतो हितम्।।९।।

मानवानामधीकारं समोत्कर्षं च संस्कृतिम्।
स्वातन्त्र्यं चैव राष्ट्राणामभिवृद्धिं प्रसाधयेत्।।१०।।

आधुनिक जगत् में अन्तर्राष्ट्रीय सहयोग का महत्त्व काफी बढ़ गया है। विश्व की शान्ति और कल्याण के लिये विश्वव्यापी अन्तर्राष्ट्रीय सहयोग आवश्यक हो गया है। इसका क्षेत्र बढ़ता ही जा रहा है। इस सहयोग की प्रक्रिया को 'साम' नीति का अंग समझा जा सकता है। पर इसके बढ़ते हुए महत्त्व को देखकर इसे पाँचवाँ उपक्रम भी कहा जा सकता है।।

छोटा सा काम भी अकेले करना दुष्कर, अर्थात् कठिन है। अत: समाज के सहयोग से जनकल्याण का सम्पादन किया जाय।।५।। परस्पर मेल होने से और एक दूसरे का सहारा मिलने से मनुष्य मंगल, आनन्द तथा उत्कर्ष को प्राप्त करते हैं।।६।। विश्वभावना से अनुप्राणित नीतिज्ञ सबके सहयोग से विश्वसंघ, विश्वशान्ति, जगत् का हित, मानव-अधिकार, समोत्कर्ष, संस्कृति, राष्ट्रों की स्वतन्त्रता तथा अभिवृद्धि को प्रतिष्ठित करे।।७-८।। लोकन्याय से सम्पन्न, विश्वज्ञान से समन्वित नीतिज्ञ विश्वभावना से प्रेरित विश्वकल्याण करे।।९।। मनुष्यता तथा विश्व-बन्धुता की भावना से भूषित विश्वनिष्ठ महामना विश्वकल्याण को बढ़ाता है।।१०।।

विश्वकल्याण तथा विश्वशान्ति की सेवा के लिये लोकन्याय, विश्वज्ञान, विश्वभावना, मानवता और विश्वबन्धुत्व की भावना तथा महान् उदार चित्त आवश्यक

---

१. मनु. ७.५५ २. विदुर. ४.६५

लोकन्यायेन सम्पन्नो विश्वज्ञानसमन्वितः ।
प्रेरितो विश्वभावेन विश्वकल्याणमाचरेत् ।।११।।

मानुष्येण समायुक्तो विश्वबन्धुत्वभूषितः ।
विधत्ते विश्वकल्याणं विश्वनिष्ठो महामनः ।।१२।।

यस्तु नो कुरुते नूनं सर्वराष्ट्रेष्वमङ्गलम् ।
विधत्ते विश्वकल्याणं विश्वबन्धुः स उच्यते ।।१३।।

प्रेरितो न्यायसाम्यभ्यां विश्वभावविभूषितः ।
हितार्थं सर्वराष्ट्राणां सर्वस्वातन्त्र्यमिच्छति ।।१४।।

तप्यन्ते विश्वतापेन विश्वभावगुणान्विताः ।
विश्वं विमोच्यन्त्येव ह्याधिपत्याच्च सर्वथा ।।१५।।

विश्वभावेन सम्पन्नो नीतिज्ञो राष्ट्रनिष्ठितः ।
नूनं राष्ट्रसमस्यां च विश्वदृष्ट्या विचिन्तयेत् ।।१६।।

हैं। इन गुणों से समन्वित नीतिज्ञ ही विश्वशान्ति और कल्याण का कार्य सम्पादन कर सकता है।

न्याय और समता की भावनाओं से प्रेरित, विश्वभावना से विभूषित व्यक्ति सब राष्ट्रों के हित के लिये सबकी स्वतन्त्रता चाहता है।।११।। विश्वभावना से सम्पन्न, राष्ट्रनिष्ठ नीतिज्ञ निःसन्देह राष्ट्र की समस्या पर विश्वदृष्टि से विचार करे।।१२।। विश्व की सेवा में तत्पर प्रगतिशील नीतिज्ञ विश्व की प्रगति और सहकारिता, सब राष्ट्रों में सद्भावना, मानवमात्र का मंगल, स्वतन्त्रता, विश्व की अभिवृद्धि तथा लोकतान्त्रिक परम्परा को बढ़ाता है।।१३-१४।। समता तथा स्वतन्त्रता पर स्थित मनुष्यों का विश्वसंघ मानवोचित उपायों द्वारा विश्वशान्ति प्रतिष्ठित करे।।१५।।

इस समय संयुक्त राष्ट्र (यूनाइटेड नेशन्स) राज्यों का संघ है तथा उसकी संरक्षण समिति (सिक्योरिटी कौंसिल) में पाँच बड़े राष्ट्रों को कुछ विशेष अधिकार प्राप्त हैं। कुछ विद्वानों का विचार है कि विश्वसंघ वास्तव में विश्व की जनता का संगठन होना चाहिए। उसी बात की यहाँ पुष्टि की गयी है।

मानवता तथा विश्वबन्धुत्व की भावना को दृढ़ करके विश्वसंघ विश्वकल्याण की भावना से, सब संबद्ध (वैभवसम्पन्न) राष्ट्रों के सहयोग से तथा सत्कार्यों द्वारा बुद्धिहीन अर्थात् अविकसित और अल्पविकसित राष्ट्रों के सर्वांगीण विकास के लिए प्रयत्न करे।।१६।। जनकल्याण की सिद्धि के निमित्त विश्वसंघ यत्नपूर्वक मानवता से सम्पन्न

प्रगतिप्रदनीतिज्ञो विश्वाराधनतत्परः ।
विवर्धयति विश्वस्य प्रगतिं सहकारिताम् ।।१७।।

सर्वराष्ट्रेषु सौहार्दं सर्वमानवमङ्गलम् ।
स्वातन्त्र्यं विश्वसंवृद्धिं लोकतन्त्रपरम्पराम् ।।१८।।

सत्याग्रहः

अहिंसा सत्यसंयुक्तं सङ्घर्षरचनान्वितम् ।
श्रद्धया परया तप्तं सर्वोत्कर्षगुणान्वितम् ।।१।।

वृत्तशीलसमायुक्तं सदुद्देश्यविभूषितम् ।
प्रेम्णा वै प्रेरितं कर्म तत् सत्याग्रह उच्यते ।।२।।

सत्याग्रहः परा निष्ठा मानवं नैतिकं बलम् ।
तेनैव साहसी धीरः सत्यन्यायौ विवर्धयेत् ।।३।।

यस्तु सत्यव्रताचारः सत्ययोगपरायणः ।
सदुद्देश्यसमायुक्तः संयमी दृढनिश्चयः ।।४।।

प्रगतिशील विज्ञान, लोकन्याय से समन्वित मानवमात्र की अभिवृद्धि सारे संसार का सर्वागीण विकास को प्रसारित करे।।१७।।

विज्ञान के बहुत से अनुसन्धान तथा आविष्कार विद्वेष तथा शोषण की भावना से अनुप्राणित होते हैं। इस प्रकार के प्रयास शान्ति और न्याय के घातक सिद्ध हो रहे हैं। शान्तिप्रिय विद्वानों का मत है कि मानवता की भावना से अनुप्राणित वैज्ञानिक अनुसन्धान ही मानवकल्याण की अभिवृद्धि कर सकते हैं। विद्वानों का यह भी विचार है कि लोकन्याय से नियन्त्रित और संचालित आर्थिक अभिवृद्धि ही मानवमात्र के लिए कल्याणकारी हो सकती है।।

विश्वसंघ मनुष्यता, राष्ट्रों के सहयोग, समता पर आश्रित स्वतन्त्रता, विश्वबन्धुत्व पर आधारित संस्कृति, विश्व की प्रगति और कल्याण, विश्वचेतना और भद्रता एवं सब मनुष्यों के हित और आनन्द को प्रसारित करे।।१८।।

अहिंसा और सत्य से युक्त, संघर्ष तथा रचना से समन्वित, श्रद्धा से तप्त, सबके उत्कर्ष से सम्पन्न, सदाचार तथा शील एवं सदुद्देश्य से विभूषित तथा प्रेम से प्रेरित काम सत्याग्रह कहा जाता है।।१-२।। सत्याग्रह श्रेष्ठ विश्वास है, मानव का नैतिक बल है। उससे ही साहसी धीर पुरुष सत्य तथा न्याय को बढ़ाये।।३।। जो सत्य प्रतिज्ञा का पालन करने वाला, सत्य के प्रयोग में संलग्न, शुभ उद्देश्य से सम्पन्न, संयमी, दृढ़व्रती,

अहिंसा वै परा शक्तिः समाजस्य परो गुणः ।
अहिंसासत्ययोगेन सर्वार्थं लभते सुधीः ।।५।।

अहिंसासत्यमार्गेण न्यायोचितपथेन च ।
सत्याग्रहेण सेवाभ्यः सन्तापेनापराजितः ।।६।।

विरोधयेच्चाधिपत्यं स्वराज्यं स्थापयेत् तथा ।
राष्ट्रोत्थानं वर्धयेच्च पोषयेच्च जगद्धितम् ।।७।।

[1]स्वातन्त्र्यं भिक्षया नैव कदाचिदपि लभ्यते ।
ततो ह्यसहयोगेन सङ्घर्षेण च साधयेत् ।।८।।

लोकतन्त्रेऽपि सत्यार्थी सत्याग्रहसमाश्रयात् ।
अन्यायं च दुराचारं शोषणं प्रतिरोधयेत् ।।९।।

सत्याग्रहेण सत्यार्थी न्यायं धारयते दृढम् ।
सङ्घर्षं च सहर्षेण न्यायस्थापनहेतवे ।।१०।।

सहते सर्वकष्टानि जनकल्याणहेतवे ।
स्वगुणैः सहयोगेन हितं राष्ट्रस्य सेवते ।।११।।

रचना चैव सङ्घर्षः सेवितव्यौ यथोचितौ ।
संयोगतस्तयोरेव वर्धनीयं जगद्धितम् ।।१२।।

अहिंसाव्रत तथा न्यायभावना से गुणान्वित और निष्काम भाव से कर्म में तत्पर है, वह सत्याग्रही है।।४-५।। अहिंसा नि:सन्देह उच्चतर शक्ति है, समाज का श्रेष्ठ गुण है। अहिंसा तथा सत्य के प्रयोग से बुद्धिमान् सब अर्थों को प्राप्त करता है।।६।। सत्य-अहिंसा के न्यायोचित पथ से एवं सत्याग्रह तथा सेवा से सन्ताप से परास्त हुए बिना आधिपत्य का विरोध किया जाय, स्वराज्य को स्थापित किया जाय, राष्ट्र के उत्थान को बढ़ाया जाय तथा विश्वकल्याण को पुष्ट किया जाय।।७-८।। भिक्षा से स्वतन्त्रता कभी नहीं मिलती। अत: उसे असहयोग तथा संघर्ष से सिद्ध करे।।९।। लोकतन्त्र में भी सत्यार्थी सत्याग्रह के आश्रय से अन्याय, दुराचार तथा शोषण का विरोध करे।।१०।। सत्यार्थी सत्याग्रह से न्याय को दृढ़ता से धारण करता है, न्याय की स्थापना के निमित्त हर्ष के साथ संघर्ष करता है, जन-कल्याण की सिद्धि के लिये सब कष्टों को सहता है तथा अपने गुणों तथा सहयोग से राष्ट्रहित का अनुष्ठान करता है।११-१२।। रचना और संघर्ष दोनों का यथोचित अनुष्ठान किया जाना चाहिये। इन दोनों के मेल से संसार का कल्याण

---

१. मालवीयः

रचनाधृतसङ्घर्षः समाजोद्देश्यसाधनः ।
नितरां रचनाहीनः सङ्घर्षो नाशकारणम् ।।१३।।

न्यायप्रेरितसङ्घर्षः सत्यन्यायविभूषितः ।
मानवत्वेन संयुक्तः सङ्कष्टेनापराजितः ।।१४।।

सञ्चालितोऽहिंसया च न्यायस्थापनहेतवे ।
दम्भद्वेषविहीनश्च सङ्घर्षः सात्त्विकः स्मृतः ।।१५।।

रचनात्मककार्येण दीनानां हितमाचरेत् ।
दीनानामभिवृद्धिर्हि परीक्षा तस्य वै स्मृता ।।१६।।

उत्कर्षो रचना चैव ह्युद्यमोद्देश्यमुच्यते ।
तयोरेव विहीनस्य सर्वथा निष्फलाः क्रियाः ।।१७।।

सत्याग्रही लोकतन्त्रं नैतिकं तु समाचरेत् ।
परार्थं पोषयेत् प्रेम्णा पीडितं परिपालयेत् ।।१८।।

सत्याग्रहेन सत्यार्थी सर्वोत्कर्षं समाचरेत् ।
समर्थयेत् सदाचारं सर्वानन्दं सुसंस्कृतिम् ।।१९।।

बढ़ाया जाय।।१३।। न्याय से प्रेरित, निष्ठा, सत्य तथा मानवता से सम्पन्न, कष्टों के भय से अपराजित, दम्भ तथा द्वेष से निर्मुक्त, जनकल्याण के निमित्त अहिंसा से चलाया गया संघर्ष सात्त्विक संघर्ष है।।१४-१५।। रचना पर आधारित संघर्ष समाज के उद्देश्य का साधन है। रचना से हीन संघर्ष नाश का कारण है।।१६।। रचनात्मक कार्य से दीनों के हित का अनुष्ठान करे। दीनों के हित की अभिवृद्धि ही रचनात्मक कार्य की परीक्षा है।।१७।। उत्कर्ष और रचना ही उद्यम का उद्देश्य है। इन दोनों से विहीन कार्य सर्वथा निष्फल है। सत्याग्रही लोकतन्त्र और नैतिकता का आचरण करे, दूसरों के हितों को पुष्ट करे तथा प्रेम से पीड़ितों का पालन करे।।१८।। सत्यार्थी सत्याग्रह से सबके उत्कर्ष का अनुष्ठान करे, सदाचार, सब के आनन्द तथा संस्कृति का समर्थन करे।।१९।।

सत्याग्रह के सिद्धान्त तथा उसकी प्रक्रिया को ठीक तौर पर समझने के लिये महात्मा गांधी के विचारों का अध्ययन आवश्यक है। अतिप्राचीन काल से साधु-सन्त तथा सद्गृहस्थ सत्य और अहिंसा की आराधना करते चले आ रहे हैं। कतिपय व्यक्तियों ने समय समय पर सत्य की प्रतिष्ठा के निमित्त अहिंसात्मक ढंग से अन्याय का प्रतिरोध भी किया था। पर अन्याय के विरुद्ध सत्य और अहिंसा का राष्ट्रव्यापी सामूहिक प्रयत्न गाँधी जी की एक महत्त्वपूर्ण देन है। सत्याग्रह में सत्य, अहिंसा, रचना तथा संघर्ष का

शौर्यम्

शौर्यं समाजभावेन युक्तं मानुष्यनिष्ठया ।
न्यायवृत्तिसमायुक्तं लोकतन्त्रस्य भूषणम् ।।१।।
रक्षार्थं लोकतन्त्रस्य नराणां गौरवस्य च ।
स्वातन्त्रस्य च प्राप्त्यर्थं सूरिः शौर्यं प्रयोजयेत् ।।२।।
परित्राणं हि साधूनां निग्रहो दुष्कृतां तथा ।
संस्थापनं च न्यायस्य शौर्यस्य ध्येयमुत्तमम् ।।३।।
संरक्षणं स्वराष्ट्रस्य समरे चापलायनम् ।
वारणं चापराधानां दीनानां परिपालनम् ।।४।।
असतां प्रतिशोधश्च कर्तव्ये दृढनिष्ठता ।
आपत्काले तु ध्यैर्यं च शौर्यं वै परिकीर्त्यते ।।५।।
सर्वं पालयते शूरः सर्वं न्याये प्रतिष्ठितम् ।
शूरवीरो न्यायशीलः सर्वमानवगौरवम् ।।६।।
[1]दुराचारः क्षीणबलः परित्राणं न गच्छति ।
सुवृत्तो न्यायशीलश्च शूरवीरो भवेन्नरः ।।७।।

समन्वय निहित है। इसके सम्बन्ध में जनतान्त्रिक समाजवादियों के विचारों की जानकारी के लिये देखें—'आचार्य नरेन्द्रदेव – युग और नेतृत्व)।।

मनुष्यों की वीरता का उद्भव भाव से होता है। पर वह नित्य मनुष्यों की भावनाओं को प्रभावित भी करता है।।१।। शौर्य-शक्ति समाज से प्रतिष्ठित और नियन्त्रित है। उसे समाज के उत्कर्ष में यत्नपूर्वक लगाना चाहिये।।२।। संयम तथा मनुष्यता से युक्त लोकन्याय पर आश्रित शौर्य सब मनुष्यों का भूषण है।।३।। मनुष्यता से प्रेरित शौर्य समाज का कल्याण बढ़ाने वाला है, पर मानवता से विहीन बिलकुल हानिकारक है।।४।। लोकन्याय तथा शौर्य साध्य-साधन हैं। न्यायविहीन शौर्य तो निःसन्देह अत्याचार का उपकरण और आधार है। शौर्यविहीन न्याय शक्ति के साधन से विरहित है। उनका अच्छा सम्बन्ध लोक कल्याण का साधन है, अर्थात् लोककल्याण के लिये लोकन्याय और शौर्य का योग आवश्यक है।।५-६।। जिसमें न्याय मौजूद है, वही शौर्य शुभ कहलाता है। जिससे न्याय नष्ट होता है, उसे तो विद्वान् ताड़ना कहते हैं।।७।।

---

१. हितो. सन्धि. ६

उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान्।
आपत्सु ये न मुह्यन्ति ते वै शूराः प्रकीर्तिताः ।।८।।

उत्साहहीनः पुरुषः स्वल्पकेनापि तुष्यति।
आशाशौर्यसमायुक्तो महाध्येयं च विन्दति।।९।।

बलं शौर्यं च कौशल्यं न्यायश्चैव पराक्रमः।
समन्वितो गुणैरेतैर्वीरः कर्तव्यमावहेत्।।१०।।

मनुष्यत्वं च शौर्यं च सौजन्यं वै वरा गुणाः।
विभूषितो गुणैरेतैः सदा कार्याणि साधयेत्।।११।।

न सङ्कष्टमनारुह्य नरो भद्राणि पश्यति।
आगतं तु भयं वीक्ष्य शूरः प्रतिविधारयेत्।।१२।।

लोकन्यायश्च शौर्यं च स्थिते ह्यन्योन्यसंश्रयात्।
न्यायाद् विहीनं शौर्यं वै ह्यत्याचारं विवर्धयेत्।।१३।।

न क्लीबो वसुधां भुङ्क्ते न च न्यायं बिभर्ति सः।
क्षीणशक्तिर्ह्यवमतो दुःखं जीवति जीवनम् ।।१४।।

यो न पृष्टो हितं ब्रूते परिणामे सुखावहम्।
उपविष्टः समामध्ये यो न वक्ति स्फुटं वचः।।१५।।

समुत्पन्नेषु कार्येषु बुद्धिर्यस्य च हीयते।
स नरो मन्दबुद्धिश्च प्रोक्तः कापुरुषस्तथा।।१६।।

कर्तव्य में दृढ़ विश्वास, विपत्ति में दृढ़ साहस, पराक्रम, बल तथा धैर्य वीर पुरुषों के सद्गुण हैं।।८।। अपने राष्ट्र का संरक्षण, संघर्ष में डटे रहना, अपराधों का रोकना, सत्पुरुषों का पालन, खराब लोगों का विरोध, लोकन्याय का सदा अनुकरण तथा जनकल्याण की पुष्टि वीर पुरुषों का कर्तव्य है।।९-१०।। मनुष्यता से सम्पन्न तथा सदा न्याय से प्रेरित वीर पुरुष निर्बलों की ठीक तौर पर रक्षा करते हैं तथा स्वतन्त्रता को बढ़ाते हैं।।११।। शक्ति-साहस से सम्पन्न, कर्तव्यनिष्ठ, भय और स्वार्थ छोड़कर, संकटों से हार माने बिना राष्ट्र की स्वतन्त्रता तथा जनकल्याण के निमित्त आधिपत्य तथा दुष्कर्मों से हर्षपूर्वक संघर्ष करते हैं एवं शान्ति, लोकन्याय, स्वतन्त्रता, मानवाधिकार तथा लोकतान्त्रिक व्यवस्था को प्रतिष्ठित करते हैं।।१२-१४।। अपने और लोक के उत्कर्ष की सिद्धि के निमित्त वीर पुरुष कर्तव्यपथ में विवेक और साहस से जीवन के आदर्श का अनुगमन करते हैं।।१५।। जो शक्ति के अहंकार को छोड़कर साहस और

शूरवीरो न्यायशीलो विरोधेनापराजितः ।
कुर्यात् प्रतिष्ठितं न्यायं पोषयेच्च जगद्धितम् ।।१७।।

विरोधयेद् दुराचारमाधिपत्यं च शोषणम् ।
विवर्धयेच्च कल्याणं स्वातन्त्र्यं समतां तथा ।।१८।।

वीरा विनयसम्पन्ना न्यायेन सुसमन्विताः ।
निर्बलाँश्चैव रक्षन्ते वर्धयन्ते स्वतन्त्रताम् ।।१९।।

न क्लीबो भजतेऽभीष्टं न क्लीबो धनमश्नुते ।
न क्लीबः शान्तिमाप्नोति न प्राप्नोति सुखं यशः ।।२०।।

नाभिनन्देच्च मरणं नाभिनन्देच्च जीवितम् ।
यावज्जीवेच्च संसारे तावत् कल्याणमाचरेत् ।।२१।।

भूतेभ्यश्चाभयं दत्त्वा निर्भयः समुदाचरेत् ।
विश्वकल्याणरक्षार्थं सदा कर्तव्यमाचरेत् ।।२२।।

समत्वम्

समत्वं वै परं ज्ञानं समत्वं समदर्शनम् ।
समत्वं परमानन्दः [1]समत्वं योग उच्यते ।।१।।

समत्वं वै परा निष्ठा तस्याः सिद्धिः सुदुष्करा ।
कर्मयोगेन संसिद्धिं कर्तव्ये निष्ठितो लभेत् ।।२।।

समानहितसंयुक्तः समभावेन नोदितः ।
निर्द्वन्द्वो व्यवहारो वै समत्वं परिलक्ष्यते ।।३।।

विवेक से यत्नपूर्वक न्याय की रक्षा करता है, वह शूर अथवा वीर है।।१६।। निष्काम भाव से सेवा कार्यों में तत्पर वीर पुरुष सब प्रकार के स्वार्थ तथा अभिमान का परित्याग कर न जीने में न मरने में हर्ष-विषाद प्रकट करे, जब तक संसार में जीवित रहे, तब तक कल्याण करता रहे। सब प्राणियों को अभय देता हुआ स्वयं निर्भीक व्यवहार करे, न लाभ में हर्षित हो, न हानि में चिन्तित।।१७-१९।।

समत्व ही श्रेष्ठ ज्ञान है, समदर्शन ही समत्व है। समत्व परमानन्द और योग है।।१।। समत्व निःसन्देह उच्चतर विश्वास है। उसकी सिद्धि कठिन है। कर्मयोग से कर्तव्यनिष्ठ उसकी सिद्धि प्राप्त करे।।२।। मनुष्यता, सत्य और सौहार्द से सम्पन्न

---

१. गीता २.४८

समभावसमायुक्तः सर्वेषां हितचिन्तकः ।
निर्द्वन्द्वो यश्च निर्वैरः स समः परिकीर्त्यते ।।४।।

सुधीः कर्तव्यनिष्ठो वै सत्याचारः शमी दमी।
निष्कामकर्मसंसिद्धः समत्वमधिगच्छति ।।५।।

शान्तो दान्तो न्यायशीलो निर्द्वन्द्वः कार्यनिष्ठितः ।
निष्कामभावसंसिद्धः समत्वमधिगच्छति ।।६।।

[१]तेषामात्मसमो लोको येषां साम्ये स्थितं मनः ।
सत्पक्षे ते स्थिता नित्यं सङ्कष्टेनापराजिताः ।।७।।

[२]येषामात्मसमो लोकस्ते वै लोकार्थचिन्तकाः ।
ते न मानित्वमिच्छन्ति मानवानां हिते रताः ।।८।।

समं सर्वेषु लोकेषु यः पश्यति स पण्डितः ।
समभावसमायुक्तो लोके चरति सज्जनः ।।९।।

[३]विद्वान् सर्वेषु लोकेषु स्वात्मना स्वोपमो भवेत् ।
दलिते शोषिते चैव [४]वर्तितव्यं यथात्मनि ।।१०।।

आत्मतुल्य निष्पक्ष व्यवहार ही समत्व कहलाता है।।३।। जो समता की भावना से युक्त, सबका हितचिन्तक, निर्द्वन्द्व और निर्वैर है, वह सम कहलाता है।।४।। कर्तव्यनिष्ठ, सत्याचारी, संयमी, निष्काम कर्म में सिद्ध, बुद्धिमान् समत्व को प्राप्त करता है।।५।। जिनका मन समता में स्थित है, उनके लिये सब लोग अपने समान हैं, वे सदा सत्पक्ष में स्थित रहते हैं और कष्टों से परास्त नहीं होते।।६। जिनको सब आत्मसम हैं, वे लोकहित के चिन्तक हैं, वे मान की इच्छा नहीं करते, मानवमात्र के हित में संलग्न रहते हैं।।७।। जो सब लोगों को समान देखता है, वह पण्डित है। सज्जन समता की भावना से युक्त हो संसार में आचरण करता है।।८।। विद्वान् सब लोगों में समता की भावना रखे, अर्थात् सबको अपना जैसा, अपने समान समझे। दलित और शोषित में भी वैसा ही बर्ताव करे, जैसा वह अपने में चाहता है।।९।। अहंकार, दम्भ और लोभ को छोड़कर समता की भावना से युक्त हो दीनों का हित करे।।१०।। सब लोगों में समभाव रखते हुए मैत्री का आचरण करे। दलितों और शोषितों की रक्षा करे और

---

१. गीता ४.१९ २. शान्ति. ११.१६ ३. शान्ति. २७६.१०
४. शान्ति. १६७.९

अहङ्कारं परित्यज्य दम्भं लोभं विसृज्य च।
समभावसमायुक्तो दीनानां हितमाचरेत्।।११।।

समः सर्वेषु लोकेषु [1]मैत्रायणगतिश्चरेत्।
दलितं शोषितं रक्षेत् समाजं स्थापयेत् समम्।।१२।।

समत्वे दृढविश्वास आस्तिक्यं परिकीर्तितम्।
समत्वाचरणं श्रेयो मानवत्वप्रसाधनम्।।१३।।

देशकालौ च विज्ञाय लोकात्मोत्कर्षहेतवे।
सत्यनिष्ठः समत्वं वै स्थापयेच्च समाचरेत्।।१४।।

मानवानां हि संसारे समाजस्य परिस्थितिः।
प्रभावयति संसिद्धिसामर्थ्यं नात्र संशयः।।१५।।

राष्ट्रे वैषम्यसम्पन्ने नरो मानुष्यसम्भृतः।
सत्कृतैर्योगसेवाभ्यां साम्यं कष्टेन पद्यते।।१६।।

साम्यस्वातत्र्यसम्पन्ने राष्ट्रे मानुष्यसम्भृते।
मानवः स्वल्पयत्नेन समत्वमधिगच्छति।।१७।।

सेवासमत्वभावाभ्यां शिष्टाचरणसत्कृतैः।
समत्वं सेवते सूरः साम्यानुकूलसंस्थितौ।।१८।।

समसमाज को स्थापित करे।।११।। समता में दृढ़ विश्वास आस्तिकता कहलाती है। समत्व का आचरण मानवता का सर्वोत्तम तथा अच्छा साधन है।।१२।। देश और काल को समझ कर अपने और लोक के उत्कर्ष के लिए सत्यनिष्ठ समता को स्थापित करे और उसके अनुकूल ठीक तौर पर आचरण करे।।१३।। निःसन्देह समाज की परिस्थिति मानव की सब बातों में सफलता की क्षमता को प्रभावित करती है।।१४।। विषमता से सम्पन्न राष्ट्र में मनुष्यता से सम्पन्न पुरुष सत्कार्य, योग और सेवा द्वारा कष्ट से समत्व प्राप्त करता है।।१५।। मनुष्यता से सम्पन्न तथा स्वतन्त्रता और समता से युक्त राष्ट्र में मनुष्य थोड़े प्रयत्न से ही समत्व प्राप्त करता है।।१६।। समता के अनुकूल स्थिति में विद्वान् सेवा, समत्वभावना, शिष्टाचार, शुभ कार्य से समता का अनुष्ठान करता है।।१७।। समता के समाज में समाज के उत्कर्ष की निष्ठा से शिष्ट पुरुष निष्काम कर्म और शील से शुभ समता प्राप्त करते हैं।।१८।।

---

१. शान्ति. १६०.२७

शिष्टः समे समाजे वै समाजोत्कर्षनिष्ठया।
निष्कामकर्मशीलाभ्यां समत्वं लभते शुभम्।।१९।।

समाजवादः

योगः समाजवादस्य साम्यस्वातन्त्र्यसम्भृतः।
सम्पन्नः सर्वकल्याणैः सर्वमङ्गलसाधकः।।१।।

वर्गहीनसमाजो वै व्यवस्था लोकतान्त्रिकी।
स्वातन्त्र्यं सर्वराष्ट्राणां समताधृतसंस्कृतिः।।२।।

श्रमव्यक्तित्वसम्मानं नराधिकृतिरक्षणम्।
आर्थिकं लोकतन्त्रं च कल्याणमयजीवनम्।।३।।

सर्वोत्कर्षस्य सौविध्यं सर्वमानन्दसाधनम्।
नूनं समाजवादस्याभिप्रायाः परिकीर्तिताः।।४।।

राष्ट्रे वैषम्यसम्पन्ने शोषणेन समावृते।
वर्गाधिपत्यसंयुक्ते वर्गसङ्घर्षसंयुते।।५।।

समसमाज में मनुष्य को समता की अनुभूति स्वतः उपलब्ध नहीं होती। उसकी सिद्धि के लिये उसे प्रयत्न करना होता है। निष्काम भावना से समाजोत्कर्ष के लिये समाज की सेवा करनी होती है, समता के भाव से अपने शील, व्यवहार और कृत्यों को अनुप्राणित करना होता है। विषमता से परिपूर्ण समाज में तो इन सब बातों के साथ साथ उसे विषमता, वैमनस्य, दम्भ, द्वेष तथा अन्याय से संघर्ष भी करना पड़ता है, दूषित वातावरण के कुप्रभावों से अपने को बचाना पड़ता है।

अच्छे आशय से सम्पन्न व्यक्ति समत्व की सिद्धि के निमित्त वर्गविहीन समता-मूलक समाज स्थापित करते हैं। न्यायशील समता एवं सत्य पर निष्ठा रखने वाला सज्जन प्रगति, प्रेम, समता पर आश्रित संस्कृति को पुष्ट करता है।।१९।।

समाजवाद की पद्धति समता, स्वतन्त्रता तथा कल्याण से सम्पन्न एवं सबके मंगल की साधक है।।१।। समाजवाद की पद्धति समाज के उत्कर्ष की साधना है, समता और स्वतन्त्रता की सम्यक् वृद्धि तथा श्रमिकों के कल्याण का हेतु, अर्थात् कारण है।।२।। वर्गहीन समाज, लोकतान्त्रिकी व्यवस्था, सब राष्ट्रों की स्वतन्त्रता, समता पर आधृत संस्कृति, मानव-व्यक्तित्व और श्रम का सम्मान, मानव-अधिकारों की रक्षा, आर्थिक लोकतन्त्र, कल्याणमय जीवन, सबकी उन्नति की सुविधा, आनन्द के सब साधन—निःसन्देह ये सब समाजवाद के लक्ष्य हैं।।३-५।। विषमता से सम्पन्न, शोषण

श्रमिकः सङ्घशक्तिभ्यः शोषणं प्रतिरोधयेत् ।
रचनाक्रान्तिसङ्घर्षैराधिपत्यं विरोधयेत् ।।६।।

संस्थापयेत् समत्वं च लोकन्यायं सुसंस्कृतिम् ।
वर्गहीनं समाजं वै सर्वकल्याणसाधनम् ।।७।।

प्रेरितो मानवत्वेन लोकन्यायप्रभावितः ।
तस्मात् समाजवादस्तु मानवीयः प्रकीर्त्यते ।।८।।

लोकतन्त्रस्य भृत्यानां विस्तारस्तस्य सद्गुणः ।
तस्मात् समाजवादस्यान्दोलनं लोकतान्त्रिकम् ।।९।।

आन्दोलनं च तस्यापि नवसंस्कृतिमीक्षते ।
समाजवादिनस्तमात् तद्वै सांस्कृतिकं विदुः ।।१०।।

से परेशान, वर्गाधिपत्य और वर्गसंघर्ष से अधिकृत राष्ट्र में श्रमिक संगठन की शक्ति से शोषण का मुकाबला करें तथा समता, लोकन्याय, शुभ संस्कृति एवं सबके कल्याण के साधक वर्गहीन समाज को स्थापित करे।।६-८।। लोकतान्त्रिक मूल्यों का विस्तार ही उसका सद्गुण है, इसलिये समाजवाद का आन्दोलन लोकतान्त्रिक है।।९।।

पूंजीवादी व्यवस्था में लोकतन्त्र राजनीतिक क्षेत्र तक सीमित है। समाजवाद के विचार में राजनीतिक लोकतन्त्र अपूर्ण है। वह राजनीतिक लोकतन्त्र को सुरक्षित रखते हुए आर्थिक और सामाजिक सम्बन्धों को भी लोकतान्त्रिक सिद्धान्तों और पद्धति के आधार पर संगठित करना चाहता है। व्यापक लोकतन्त्र की स्थापना ही समाजवाद का लक्ष्य है। उसके लिये लोकतन्त्र एक जीवन-विधि है। स्वतन्त्रता, समता, सहकारिता, सामाजिक न्याय, सौभ्रातृत्व, सर्वोत्कर्ष, सर्वानन्द उसके आदर्श हैं।

समाजवाद का आन्दोलन एक नयी संस्कृति को प्रतिष्ठित करना चाहता है, अतः वह सांस्कृतिक आन्दोलन भी है।।१०।।

रोजा लुकजम्बर्ग तथा आचार्य नरेन्द्रदेव जैसे विद्वानों ने समाजवाद के सांस्कृतिक लक्ष्य पर काफी जोर दिया है। भौतिक अभ्युदय की अभिवृद्धि के साथ साथ मनुष्यत्व का विकास समाजवाद का लक्ष्य है। उसका एकमात्र उद्देश्य आर्थिक व्यवस्था का नवनिर्माण कर सब लोगों को शोषण-विहीन सुखी जीवन बिताने की सुविधा पहुँचाना ही नहीं है, वह तो एक ऐसी संस्कृति का विकास करना चाहता है जो समता, स्वतन्त्रता, सहकारिता, सौभ्रातृत्व तथा सामाजिक न्याय पर आधृत हो, जिसमें मानव व्यक्तित्व के साथ साथ समाजोपयोगी मानव-श्रम का सम्मान हो, जिसमें प्रत्येक व्यक्ति

क्रान्तिः समाजवादस्य चार्थिकी राजनैतिकी ।
स्थापयेत् समताराज्यं लोकतान्त्रिकमार्थिकम् ।।११।।

नवजीवननिर्माणं समाजं समताधृतम् ।
यत्नैः समाजवादस्य लभन्ते श्रमिका जनाः ।।१२।।

जातिसङ्घर्षसन्तप्ते राष्ट्रे जातिविभाजिते ।
यत्नैः समाजवादस्य समाजं स्थापयेत् समम् ।।१३।।

नूनं समाजवादस्तु नैतिकत्वविभूषितः ।
समत्वं न्यायमानुष्ये तस्यैते नैतिका गुणाः ।।१४।।

को संचित सांस्कृतिक उपलब्धियों से अपने जीवन को आनन्दमय और सुसंस्कृत बनाने की सुविधा प्राप्त हो, मानव के पारस्परिक सम्बन्ध समतामूलक सौहार्द पर आधृत हो, सबको अपने जीवन के सर्वागीण विकास, अर्थात् सर्वश्रेष्ठ उत्कर्ष के लिये समुचित अवसर और सुविधा प्राप्त हो। समाजवाद संस्कृति और श्रम की एकता पर विश्वास करता है। अभ्युदय के भौतिक साधनों के उत्पादन में संलग्न श्रमिकों के सांस्कृतिक विकास पर विशेष ध्यान देना वह समाज का कर्तव्य समझता है।

समाजवाद की क्रान्ति आर्थिक और राजनीतिक दोनों तरह की हैं, वह समता का राज्य और आर्थिक लोकतन्त्र स्थापित करना चाहती है।।११।। जातिसंघर्ष से त्रस्त जातियों में विभाजित राष्ट्र में समाजवाद के प्रयत्नों से समसमाज स्थापित हो।।१३।। मानवता से प्रेरित तथा लोकन्याय से प्रभावित समाजवाद मानवीय है।।१४।।

समाज के विरोधी समाजवाद को अनैतिक तथा मानवताविरोधी बताते हैं, उनका कहना है कि समाजवाद का नैतिकता से कोई सम्बन्ध नहीं, वह तो सब नैतिक नियमों का उल्लंघन करते हुए वर्गसंघर्ष द्वारा मानवीय भावनाओं को नष्ट करना चाहता है। इस समीक्षा के उत्तर में समाजवादी विचारकों का कहना है कि समाजवादी आन्दोलन के सामाजिक आदर्श नैतिक हैं। वह जिस समाज की स्थापना करना चाहता है, वह शोषण और वर्गाधिपत्य से रहित होगा, उसमें सबको सुख तथा उत्कर्ष की समान सुविधा प्राप्त होगी, अत: उसका नैतिक स्तर प्रचलित सामाजिक व्यवस्था से कहीं ऊँचा होगा। वर्ग-संघर्ष और वर्गाधिपत्य से ग्रस्त समाज में शोषित वर्गों को वर्गसंघर्ष के लिये तैयार करना उतना ही नैतिक और न्यायसंगत है, जितना साम्राज्यशाही के विरुद्ध स्वतन्त्रता-युद्ध की तैयारी करना। वह प्रचलित नैतिक व्यवस्था का इसलिये विरोध करता है कि उसमें नैतिकता की आड़ में वर्गाधिपत्य की रक्षा की गयी है। वह स्वयं प्रगतिशील नैतिक तत्त्वों तथा क्रान्तिकारी नैतिक भावनाओं के आधार पर एक ऐसी नैतिक जीवनप्रणाली की स्थापना करना चाहता है, जो उच्चतम नैतिक और मानवीय होगी। वास्तविक मानवीय

नूनं श्रमिकसङ्घर्षो लोकन्यायप्रभावितः ।
श्रमिकोत्थानमस्यैव सदुद्देश्यमुदाहृतम् ।।१५।।
नैतिकत्वं च सङ्घर्षो द्वयमन्योन्यमाश्रितम् ।
सङ्घर्षो नैतिकत्वेन लभते मानगौरवम् ।।१६।।
नैतिकत्वं च सङ्घर्षैः पद्यते लक्ष्यसाधनम् ।
तयोरेव सुसम्बन्धाद् विकसन्ति गुणा भवे ।।१७।।
गुणाः समाजवादस्य समाजोत्कर्षसाधनम् ।
सत्ता समाजवादस्य सर्वश्रेष्ठा प्रकीर्तिता ।।१८।।

नैतिकता समता पर आश्रित शोषणविहीन समाजवादी समाज में ही सम्भव है। मानवता ही समाजवाद का आधार है।

निःसन्देह समाजवाद नैतिकता से विभूषित है। समता, न्याय और मनुष्यता उसके नैतिक गुण हैं।।१५।। श्रमिकसंघर्ष निःसन्देह लोकन्याय से प्रभावित है। श्रमिकों का उत्थान उसका उद्देश्य है।।१६।। नैतिकता और संघर्ष एक दूसरे पर आश्रित हैं। नैतिकता से ही संघर्ष मान और गौरव प्राप्त करता है। संघर्षो से नैतिकता लक्ष्य का साधन प्राप्त करती है। उनके समुचित सम्बन्ध से ही संसार में गुणों का विकास होता है।।१७।।

संघर्ष नैतिकता का अस्त्र है तथा नैतिकता संघर्ष का प्राण है। नैतिकताविहीन संघर्ष अत्याचार का उपकरण बन सकता है, समाज के लक्ष्य को विकृत कर सकता है, समाज को विघटित कर सकता है। इसी तरह संघर्ष से विहीन नैतिकता साधनविहीन है। उसके लिये समाजव्यापी अन्याय का प्रतिरोध करके न्याय को प्रतिष्ठित करना, स्थिर स्वार्थों के आधिपत्य को विलीन करके सर्वस्वातन्त्र्य समाज की स्थापना करना असम्भव है। नैतिकता से समन्वित संघर्ष ही लक्ष्य को नैतिक बल प्रदान कर सकता है, संघर्ष के लिये आवश्यक नैतिक समर्थन प्राप्त कर सकता है, लक्ष्य के गौरव को बढ़ा सकता है, उसे समाज में प्रतिष्ठित कर सकता है।

समाजवाद के गुण समाज के उत्कर्ष के कारण हैं। समाजवादी व्यवस्था सर्वश्रेष्ठ है।।१८।।

समाजवाद द्वारा प्रतिपादित सिद्धान्त ही समाज के गतिरोध का समाधान करके समाज का विकास कर सकते हैं। इस युग की सामाजिक समस्याओं का समाधान जनतान्त्रिक समाजवाद के बिना नहीं हो सकता। दूसरे सब विकल्पों की तुलना में समाजवाद निःसन्देह श्रेष्ठ है। इसके द्वारा ही सामाजिक संघर्षों और गम्भीर समस्याओं का निराकरण करके ऐसी सामाजिक व्यवस्था की स्थापना की जा सकती है, जो समाज

समताराज्यम्

राज्यं गतिसमायुक्तं सुराज्यं प्रगतिप्रियम्।
नित्यं प्रगतिदं राज्यं वर्धयेल्लोकमङ्गलम्।।१।।

सामन्तं नृपतन्त्रं च स्वत्ववैशिष्ट्यसंयुते।
तयोस्तु मानवाः सर्वे नराधिकृतवर्जिताः।।२।।

धनिकानामाधिपत्यं व्यवस्था लोकतान्त्रिकी।
वैषम्यं वर्गसङ्घर्षः श्रमिकाणां च शोषणम्।।३।।

कौशलोद्योगवृद्धी च बहुसम्पत्तिसञ्चयः।
धनिकानां च सत्ताया लक्षणं परिकीर्तितम्।।४।।

वर्गसत्ताधृतं राज्यं साम्यस्वातन्त्र्यघातकम्।
दमनन्यायसम्पन्नं नराधिकृतनाशनम्।।५।।

सत्तायाश्च निराकृत्य वर्गाधिप्यं प्रयत्नतः।
स्थापयेत् समताराज्यं सर्वानन्दसमन्वितम्।।६।।

के सर्वोत्कृष्ट सिद्धान्तों का संरक्षण और संवर्धन कर सकती है तथा समष्टि के अधिकारों एवं हितों की रक्षा और अभिवृद्धि करते हुए प्रत्येक व्यक्ति को स्वतन्त्र, आनन्दमय जीवन तथा व्यक्तित्व के विकास की समुचित सुविधा प्रदान कर सकती है।।

राज्य गतिसम्पन्न है, अच्छा राज्य प्रगतिशील होता है। प्रगतिशील राज्य सदा लोककल्याण की अभिवृद्धि करता है।।१।। सामन्तशाही तथा राजाशाही सम्पत्ति के विशिष्ट अधिकार से सम्पन्न होते हैं। उन दोनों में सब मनुष्य मानव-अधिकारों से वर्जित होते हैं।।२।। धनिकों का, अर्थात् पूंजीपतियों का आधिपत्य, लोकतान्त्रिक व्यवस्था, विषमता, वर्गसंघर्ष, श्रमिकों का शोषण, उद्योग तथा कला कौशल की वृद्धि, विपुल सम्पत्ति का सचंय—ये सब धनिकों की सत्ता, अर्थात् पूंजीवादी व्यवस्था के लक्षण हैं।।३-४।।

पूंजीवादी व्यवस्था किन्हीं दृष्टियों से सामन्तशाही और राजशाही की तुलना में प्रगतिशील और उन्नत होती है। पर वह भी विषमता, शोषण, वर्गसंघर्ष तथा आर्थिक शक्ति के केन्द्रीकरण और वर्गाधिपत्य आदि दोषों से दूषित है।

वर्गसत्ता पर आश्रित राज्य समता और स्वतन्त्रता का घातक है। वह दमन तथा अन्याय से सम्पन्न है तथा मानव अधिकार का नाशक है।।५।। वर्गाधिपत्य को सत्ता, अर्थात् अधिकार से प्रयत्नपूर्वक हटाकर सबके आनन्द से समन्वित समता-राज्य स्थापित

लोकोत्कर्षसुसंलग्नं जनविश्वासमाश्रितम् ।
शासनं जनकल्याणं विद्वद्भिः समुदाहृतम् ।।७।।
राज्ये वर्गाधिपत्येन शोषणेन विवर्जिते ।
शासनं जनकल्याणं पूर्णतः सम्भविष्यति ।।८।।
वर्गाधिप्यविनिर्मुक्तं श्रमिकक्षेमशासनम् ।
सम्पुष्टिः पुरुषार्थस्य समताधृतजीवनम् ।।९।।
सर्वोत्कर्षस्य सौविध्यं प्रगतिप्रदसंस्थितिः ।
रक्षा सर्वाधिकाराणां व्यवस्था लोकतान्त्रिकी ।।१०।।
जीवनानन्दसौगम्यं सर्वेषां समगौरवम् ।
विद्वद्भिः समताराज्यं सद्गुणाः परिकीर्तिताः ।।११।।
स्वराज्यं समताराज्यं बन्धुत्वं लोकतन्त्रकम् ।
मानवत्वं न्यायं च स्थापयेत् कार्यनिष्ठितः ।।१२।।
स्वराज्ये समताराज्ये स्वातन्त्र्यं लभते नरः ।
अधिकारं मानवानां यशो मानं च विन्दति ।।१३।।

किया जाय।।६।। लोक के उत्कर्ष में अच्छे तौर पर संलग्न तथा जनविश्वास-प्राप्त शासन को विद्वानों द्वारा जनकल्याण शासन कहा जाता है।।७।। वर्गाधिपत्य तथा शोषण से रहित राज्य में ही जनकल्याण शासन पूरी तौर पर सम्भव हो सकेगा।।८।।

प्रारम्भ में पूंजीवादी राज्यव्यवस्था के समर्थक कल्याण-राज्य या कल्याण-शासन के सिद्धान्त को स्वीकार नहीं करते थे। समाज में शान्ति और व्यवस्था को कायम रखना तथा बाह्य आक्रमण से समाज की रक्षा करना ही वे राज्य के मुख्य कार्य समझते थे। पर श्रमिकों के संगठित संघर्षों से मजबूर हो पूंजीवादी व्यवस्था में कल्याण राज्य के सिद्धान्त को स्वीकार कर लिया गया है और पूंजीवादी शासन ने किसी हद तक कल्याण राज्य का स्वरूप अपना लिया है। पर यह अब भी विषमता, संघर्ष तथा असमानताओं से ग्रस्त है और इन सब दोषों का निराकरण वर्गाधिपत्य को समाप्त करके ही हो सकता है। वर्गाधिपत्य से रहित समता-राज्य में ही कल्याण-राज्य का पूर्ण विकास सम्भव है।

वर्ग के आधिपत्य से छुटकारा, श्रमिक कल्याण शासन, पुरुषार्थ की पुष्टि, समता पर आधृत जीवन, सबके उत्कर्ष की सुविधा, प्रगतिशील परिस्थिति, सबके अधिकारों की रक्षा, लोकतान्त्रिक व्यवस्था, जीवन के आनन्द की सुगमता, सबका समान गौरव— ये सब विद्वानों द्वारा समताराज्य के सद्‌गुण बताये जाते हैं।।९-११।। कार्यनिष्ठ व्यक्ति स्वराज्य, समताराज्य, बन्धुता, लोकतन्त्र, मानवता तथा लोकन्याय को स्थापित करे।।१२।।

समः समाजः स्वातन्त्र्यं स्थिते ह्यन्योन्यसंश्रयात् ।
तयोः संयोगतः सर्वः समोत्कर्षं समश्नुते ।।१४।।

सुराज्यं समताराज्यं स्थिते ह्यन्योन्यसंश्रयात् ।
कुराज्ये नास्ति कल्याणं समत्वं न्यायरक्षणम् ।।१५।।

समत्वरहितं राज्यं सर्वस्वातन्त्र्यवर्जितम् ।
विशिष्टस्वत्वसम्पन्नमाधिपत्यप्रहस्तनम् ।।१६।।

वर्गसङ्घर्षसंयुक्तं शौषणैश्च समन्वितम् ।
राज्यं वैषम्यसम्पन्नं वर्गाधिप्यमुदाहृतम् ।।१७।।

आधिपत्यसमायुक्तं लोकतन्त्रविवर्जितम् ।
राज्यं स्वतन्त्रताहीनं समत्वं न विधीयते ।।१८।।

समत्वं लोकतन्त्रं च स्थिते ह्यन्योन्यसंश्रयात् ।
संश्रयाल्लोकतन्त्रस्य समाजे समता भवेत् ।।१९।।

समत्वयोगसहितं लोकतन्त्रं च सिद्ध्यति ।
अन्योन्यस्याभिवृद्धिश्च तयोः शुभगुणः स्मृतः ।।२०।।

स्वराज्य और समताराज्य में व्यक्ति स्वतन्त्रता, मानव-अधिकार, यश और मान प्राप्त करता है।।१३।। समसमाज और स्वतन्त्रता एक दूसरे पर आश्रित हैं। उनके संयोग से ही सब लोग समोत्कर्ष को प्राप्त करते हैं।।१४।।

स्वतन्त्रता के बिना पराधीनता की परिस्थिति में समसमाज को स्थापित नहीं किया जा सकता। इसी तरह बाहरी शक्ति के आधिपत्य से मुक्त स्वतन्त्र राष्ट्र में जनता को लोकतन्त्र पर आधारित समताराज्य और समसमाज में ही पूरी और सच्ची स्वतन्त्रता प्राप्त हो सकती है। अपनी स्वतन्त्रता के लिये परतन्त्रता के साथ साथ वर्गाधिपत्य और हर प्रकार के अधिनायकत्व से छुटकारा पाना भी जनता के लिये आवश्यक है।

अच्छा राज्य और समताराज्य भी एक दूसरे पर आश्रित हैं। बुरे राज्य में कल्याण, समता, न्याय और रक्षा नहीं होती।।१५।। समता से रहित, सबकी स्वतन्त्रता से वर्जित और सम्पत्ति के विशिष्ट अधिकारों से सम्पन्न राज्य अधिनायकशाही है।।१६।। वर्गसंघर्ष से ग्रस्त, शोषण से त्रस्त, विषमता से सम्पन्न राज्य वर्गाधिपत्य या वर्गविशेष की अधिनायकशाही है।।१७।। अधिनायकशाही से युक्त, लोकतन्त्र से रहित, स्वतन्त्रता से विहीन राज्य समता का विधान नहीं करते।।१८।। समता और लोकतन्त्र एक दूसरे पर आश्रित हैं। लोकतन्त्र के संश्रय से (आश्रय से) समाज में समता आती है, समता के योग से लोकतन्त्र सिद्ध होता है तथा एक दूसरे की समृद्धि दोनों के सद्गुण हैं।।१९-२०।।

समत्वं मानवत्वं च स्थिते ह्यन्योन्यसंश्रयात्।
मानवत्वसमायुक्तः समत्वं साधयेत् सुधीः ।।२१।।

समत्वेन विहीनश्च मानवत्वं न गच्छति।
ततस्तयोः समायोगात् संसिद्धिं लभते नरः ।।२२।।

स्वातन्त्र्ये समताराज्ये मानवत्वं विधारयेत्।
आनन्दं लोकतन्त्रं च समत्वं चाभिवर्धयेत् ।।२३।।

स्वातन्त्र्ये समताराज्ये लोकन्यायं समाचरेत्।
वर्धयेज्जनकल्याणं न्यायवृत्तिं च पोषयेत् ।।२४।।

राष्ट्रस्वातन्त्र्यमारक्षेद् विश्वशान्तिं जगद्धितम्।
मानवानामधीकारं समृद्धिं च विवर्धयेत् ।।२५।।

समः समाजः

स्वातन्त्र्यं समताराज्यं लोकार्थो लोकतन्त्रकम्।
मानवं गौरवं न्यायः समाजः सम उच्यते ।।१।।

समः समाजः संस्थाप्यो लोकमङ्गलकाम्यया।
तथा लोकस्य कल्याणं वर्धयेच्च सुखं समम् ।।२।।

समता लोकतन्त्र का नैसर्गिक गुण है। सब क्षेत्रों में पक्की समता की वृद्धि लोकतन्त्र का ध्येय कहा जाता है।।२१।। समता और मानवता भी एक दूसरे पर आश्रित हैं। मानवता से युक्त बुद्धिमान् समता साधे, समता से विहीन पुरुष मानवता सिद्ध नहीं कर सकता। अत: दोनों के योग, अर्थात् मेल से मनुष्य सफलता प्राप्त करता है। स्वतन्त्र समताराज्य में मानवता को धारण किया जाय तथा आनन्द एवं लोकतन्त्र और समता को बढ़ाया जाय।।२२-२३।। स्वतन्त्र समताराज्य में लोकन्याय के अनुकूल आचरण किया जाय, जनकल्याण बढ़ाया जाय, न्यायवृत्ति पुष्ट की जाय, राष्ट्र की स्वतन्त्रता की रक्षा की जाय तथा विश्वशान्ति, विश्वहित, मानव-अधिकार और समृद्धि को बढ़ाया जाय।।२४-२५।।

स्वतन्त्रता, समताराज्य, लोकहित तथा लोकतन्त्र, मानव-गौरव और न्याय सम-समाज कहलाता है, अर्थात् ये सब समाजवाद के लक्षण हैं।।१।। सबकी स्वतन्त्रता तथा समुदाय के स्नेह से सम्पन्न, समता एवं सर्वसौहार्द और सौभ्रात्र से अलंकृत, लोकहित

सहयोगात् समृद्धिश्च वर्धनीयः समञ्जसा ।
संविभज्य हि भोक्तव्या ऐश्वर्यानन्दसम्पदः ।।३।।

समे समाजे सुजनाः सेवन्ते सहजं समम् ।
सर्वोत्थानं समोत्कर्षं सौभ्रात्रं सहकारिताम् ।।४।।

जातिवंशपदानां ते दर्पाहङ्कारनिर्मलाः ।
वर्गसङ्घर्षनिर्मुक्ताः समाः सर्वोपकारकाः ।।५।।

विश्वशान्तिं राष्ट्रहितं स्वातन्त्र्यं लोकतन्त्रकम् ।
मानवं गौरवं न्यायं यत्नतो रक्षयन्ति ते ।।६।।

राष्ट्रोत्कर्षमपि प्रेम्णा यत्नतो वर्धयन्ति ते ।
आत्मोत्कर्षं सुखं श्रेयस्तस्मात् ते प्राप्नुवन्ति वै ।।७।।

समे समाजे समता स्वातन्त्र्यं सहकारिता ।
न्याय्या वृत्तिर्मनुष्यत्वं लोकशीलं प्रशस्यते ।।८।।

लोकतन्त्रेऽचला निष्ठा संयमो विश्वबन्धुता ।
स्वकर्तव्ये राष्ट्रहिते रतिः शीलं प्रशस्यते ।।९।।

एवं लोकतन्त्र और लोकन्याय से अनुप्राणित तथा मानवाधिकार से युक्त समाज समसमाज कहलाता है।।२-३।।

समसमाज के ये विशिष्ट गुण हैं।

लोकमंगल की कामना से समसमाज को स्थापित कर प्रयत्नपूर्वक लोक की अभिवृद्धि को बढ़ाना चाहिये।।२।। सहयोग से ठीक तौर पर समृद्धि बढ़ाना चाहिये तथा ऐश्वर्य, आनन्द तथा सम्पत्ति का समुचित बटवारा करके उसका उपभोग करना चाहिये।।३।। समसमाज में सुजन सहज रूप से समता, सर्वोत्थान, समोत्कर्ष, बन्धुता, सहकारिता की सेवा और उपभोग करते हैं।।४।। वे जाति, वंश तथा पद के गर्व और अहंकार से मुक्त तथा वर्ग-संघर्ष से रहित होते हैं एवं समान रूप से सर्वोपकारक होते हैं।।५।। वे यत्नपूर्वक विश्वशान्ति, राष्ट्रहित, स्वतन्त्रता, लोकतन्त्र, मानव गौरव और न्याय की रक्षा करते हैं।।६।। वे राष्ट्र के उत्कर्ष को भी यत्नपूर्वक बढ़ाते हैं और इस तरह आत्मोत्कर्ष, सुख, श्रेय प्राप्त करते हैं।।७।। समसमाज में सुजन सुन्दर संस्कृति, समता पर आधारित न्यायमार्ग, नैतिकता, जनकल्याण, लोकतन्त्र, सद्वृत्ति, समता पर आधारित आर्थिक जीवन, सबकी समता, तथा मानव-आदर का अनुष्ठान और आचरण करते हैं।।८-९।। समसमाज में सदा सब मनुष्य समान होते हैं। सबका समोत्कर्ष और

समे समाजे सुजना ह्याचरन्ति सुसंस्कृतिम् ।
साम्याधृतं न्यायमार्गं नैतिकत्वं जगद्धितम् ।।१०।।

लोकतन्त्रं च सद्वृत्तिमर्थं साम्याधृतं तथा ।
सर्वसाम्यं च सर्वेषां नराणां चादरस्तथा ।।११।।

समे समाजे शश्वद्वै जनाः सर्वे समाः स्मृताः ।
सर्वेषां च समोत्थानं मानं च ध्येयमुच्यते ।।१२।।

आनन्दं च समोत्कर्षो ह्यधिकारौ प्रकीर्तितौ ।
सहयोगश्च लोकार्थः कर्तव्यौ परिलक्षयेत् ।।१३।।

गुणेन च स्वभावेन कार्यं वै परिनिश्चितम् ।
विद्याचरणसम्पन्नः संस्कृतः परिकीर्त्यते ।।१४।।

कार्यकर्मसु संलग्नः सत्पुरुष उदाहृतः ।
निष्कामभावसंसिद्ध उत्तमः पुरुषः स्मृतः ।।१५।।

व्यक्तित्वं साम्यसंसिद्धं समष्टेर्भावविभूषितम् ।
मानवत्वसमायुक्तं लोकात्मोत्कर्षतत्परम् ।।१६।।

लोकज्ञानेन सम्पन्नं वृत्तसाहससंयुतम् ।
समे समाजे सुजनैर्महाव्यक्तित्वमुच्यते ।।१७।।

व्यक्तित्वं शीलसंयुक्तमाशालक्ष्यगुणान्वितम् ।
नीतिन्यायसमायुक्तं सद्भावेन विभूषितम् ।।१८।।

सम्मान उसका उद्देश्य है।।१०।। आनन्द और समोत्थान अधिकार; सहयोग और लोकहित कर्तव्य बताये जाते हैं।।११।। गुण और स्वभाव से कार्यक्षेत्र निश्चित होता है। मानवता से विभूषित व्यक्ति सभ्य तथा सुसंस्कृत कहलाता है।।१२।। कर्तव्य कर्मों में संलग्न सत्पुरुष तथा निष्काम कर्म में सिद्ध व्यक्ति उत्तम पुरुष कहा जाता है।।१३।। समत्वसिद्ध, सामाजिक भावना से भूषित, मानवता से युक्त, समाज तथा अपने उत्कर्ष में संलग्न एवं लोकज्ञान, सदाचार तथा साहस से सम्पन्न व्यक्तित्व समसमाज में श्रेष्ठ व्यक्तित्व कहा जाता है।।१४-१५।। शील, आशा तथा लक्ष्य के गुणों से सम्पन्न, नीति तथा न्याय से युक्त, सद्भावना से विभूषित, कर्तव्य कर्म में संलग्न एवं श्रमिकों के कल्याण में तत्पर व्यक्तित्व समसमाज में श्रेष्ठ व्यक्तित्व कहा जाता है।।१६-१७।। हर्ष, आनन्द और उत्साह से सम्पन्न, कला तथा विज्ञान में चतुर, संगीत तथा काव्य से सज्जित, मानव-अधिकारों से युक्त, लोकतन्त्र में निष्ठावान् व्यक्तित्व समसमाज में

कर्तव्यकर्मसंलग्नं श्रमिकक्षेमतत्परम् ।
समे समाजे सुजनैर्महाव्यक्तित्वमुच्यते ।।१९।।

व्यक्तित्वं शौर्यसंयुक्तं सिद्धान्ते परिनिष्ठितम् ।
भूषितं विश्वभावेन पुरुषार्थपरायणम् ।।२०।।

विवेकोल्लाससम्पन्नं सहकारगुणान्वितम् ।
समे समाजे सुजनैर्महाव्यक्तित्वमुच्यते ।।२१।।

व्यक्तित्वं हर्षसम्पन्नमानन्दोत्साहसंयुतम् ।
कलाविज्ञानसन्दक्षं सङ्गीतकाव्यसम्भृतम् ।।२२।।

युक्तं नराधिकारैश्च निष्ठितं लोकतन्त्रके ।
समे समाजे सुजनैर्महाव्यक्तित्वमुच्यते ।।२३।।

अर्थः

न्यायेनार्जनमर्थस्य रक्षणं वर्धनं तथा ।
संविभागश्च पात्रेषु न्यायवृत्तं चतुर्विधम् ।।१।।

सम्पदं लोकयात्रार्थं लोकः सर्वः समर्जयेत् ।
अधिकं यदि सामर्थ्यं तल्लोकार्थं समर्पयेत्।।२।।

श्रेष्ठ व्यक्तित्व कहा जाता है।।१८-१९।। लोकतन्त्र से युक्त समता पर आश्रित समसमाज में लोकसेवा, सर्वांगीण उत्कर्ष, स्वतन्त्रता, सहकारिता, लोकन्याय की पुष्टि, सौजन्य, समता, संयम, लोकहित की अभिवृद्धि संस्कृति समझी जाती है।।२०-२१।। सुख तथा समद्धि से सम्पन्न तथा समता पर आश्रित समाज में मानवता से प्रेरित, लोकन्याय से प्रभावित, समता के अमृत से सम्पन्न, कर्तव्य कार्य में निष्ठावान् हो सौहार्द तथा सहयोग से सदा सहज जीवन बिताता है।।२२-२३।।

न्याय से धन को कमाना, उसकी रक्षा और वृद्धि करना, पात्रों में उसका सम्यक् वितरण करना, न्यायपूर्ण जीवनवृत्ति के ये चार रूप हैं।।१।। सभी लोग लोकयात्रा, अर्थात् जीवन के निर्वाह के लिये धन को ठीक तौर पर कमायें। यदि किसी में अधिक सामर्थ्य हो, तो वह उसे लोकहित में लगावें।।२।।

श्रीमद्भागवत में कहा गया है—

यावद् भ्रियेत जठरं तावत् स्वत्वं हि देहिनाम् ।
अधिकं योऽभिमन्येत स स्तेनः दण्डमर्हति ।।

[1]न लोकार्थी नृशंसेन कर्मणा धनमर्जयेत्।
[2]न्यायागतं धनं चैव देयं भोग्यं च सर्वथा।।३।।

भ्रष्टाचारं परित्यज्य न्यायेन धनमर्जयेत्।
[3]सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्।।४।।

[4]न त्वेवानर्थसम्पन्नां वृत्तिमीहेत मण्डितः।
[5]नान्याधिकारमन्विच्छेन् नान्यायेनार्जयेद्धनम्।।५।।

[6]विना परस्वहरणान्न कश्चित् स्यान्महाधनः।
[7]मायां विना महाद्रव्यं दाङ् न सम्पाद्यते जनैः।।६।।

अर्थात् जहाँ तक उदरपूर्ति, जीवननिर्वाह के लिये आवश्यक है, वहाँ तक मनुष्यों का सम्पत्ति पर अधिकार है। जो इससे अधिक चाहता है, वह चोर दण्ड का पात्र है।

श्रीमद्भागवत आदि ग्रन्थों में यह भी कहा गया है कि सत्पुरुषों की विभूतियाँ लोककल्याण के लिये होती हैं, जिस प्रकार एक सद्गृहस्थ अपने कुटुम्ब के भरण-पोषण तथा अभ्युदय के लिये प्रयत्न करता है, उसी प्रकार एक सत्पुरुष को सारे समाज के हित में काम करना चाहिये।

स्वामी रामतीर्थ ने भी कहा है कि वेदान्त के अनुसार किसी व्यक्तिगत सम्पत्ति पर अधिकार जमाना, आन्तरिक या निजस्वरूप आत्मा के विरुद्ध घोर पातक है। (देखें रामहृदय, पृ. १२५)

लोकहित-चिन्तक को अन्याय से (क्रूरता से) धन उपार्जित नहीं करना चाहिये। न्याय से प्राप्त किये धन को ही सब तरह से देना और उपभोग करना चाहिये।।३।। भ्रष्टाचार को छोड़ कर न्याय से धन कमाया जाय। धन की शुद्धि अन्य सभी प्रकार की शुद्धियों से उच्चतम कही गयी है।।४।। पण्डित, अर्थात् बुद्धिमान् अनर्थ से सम्पत्ति जुटाने की इच्छा नहीं करता। दूसरे के अधिकार की इच्छा न करे, न ही अन्याय से धन उपार्जित करे।।५।। दूसरों के स्वत्व का अपहरण किये बिना कोई महाधनी नहीं होता। माया, अर्थात् कपट और जालसाजी के बिना अन्य किसी उपाय से जल्दी से धन इकट्ठा नहीं किया जा सकता।।६।। गरीबी मनुष्यों के लिये बड़े दुःख और अपमान

---

१. शान्ति. २९२.५   २. शान्ति. २९२.४   ३. मनु. ५.१०६
४. शुक्र. २.२२७   ५. शुक्र. २.२२८   ६. शुक्र. ४.२७८
७. शुक्र. ४.२७७

लक्ष्मीवन्तो न जानन्ति दरिद्राणां च वेदनाम् ।
दारिद्र्यं हि मनुष्यस्य जीवतो मरणं भवेत् ।।७।।

[1]दौर्गत्यं देहिनां दुःखमपमानकरं परम् ।
उद्धरेद् दीनमात्मानं समर्थो यत्नतो भवेत् ।।८।।

[2]अञ्जसा येन वर्तेत तदेवास्य हि दैवतम् ।
[3]तस्माज्जीवनवृत्तिं च सेवयेन्न्यायनिष्ठया ।।९।।

सुखितो दुःखितो वापि नरो लोभं परित्यजेत् ।
यत्नेन सत्ययोगेन न्यायवृत्तिं हि धारयेत् ।।१०।।

लोभाधृता व्यवस्था वै स्वार्थमोहौ तनोति च ।
संवर्धयति वैषम्यमन्यायं शोषणं तथा ।।११।।

सम्पोषयति सङ्घर्षं दम्भविद्रोहमत्सरान् ।
अवरुन्धेच्च सौभ्रात्रं स्वातन्त्र्यं सहकारिताम् ।।१२।।

श्रमिकक्षेमसंयुक्ता समत्वेन समन्विता ।
विभूषिता जनहितैः समाजोत्कर्षसंयुता ।।१३।।

का कारण है। दीन अपने को ऊपर उठाये और यत्न से समर्थ बने।।७।। धनी लोग गरीबों की वेदना को नहीं जानते। गरीबी मनुष्य के जीवन को मृत्यु-तुल्य बना देती है।।८।। जिसके द्वारा ठीक तौर पर जीवन-निर्वाह हो, वही उसका देवता है। इसलिये जीवनवृत्ति का न्यायनिष्ठा से अनुष्ठान करे।।९।।

श्रीमद्भागवत में स्वभावसिद्ध व्यवसाय में देवत्व का दर्शन कर उसकी पूजा, अर्थात् आदर का आदेश दिया गया है।। (भागवत १०.२४)

मनुष्य सुखी हो या दुःखी, लोभ को छोड़ दे। यत्न तथा सत्य की प्रक्रिया से न्याय्य व्यवसाय को ही धारण करे।।१०।। लोभ पर आश्रित व्यवस्था स्वार्थ और मोह को फैलाती है तथा विषमता, अन्याय एवं शोषण को बढ़ाती है। वह संघर्ष, दम्भ, विद्रोह और ईर्ष्या को बढ़ाती है तथा बन्धुता, स्वतन्त्रता और सहकारिता को रोकती है।।११-१२।। श्रमिकों के कल्याण से युक्त, समता से समन्वित, जनहित से प्रेरित तथा समाज

---

१. पंच. २ तन्त्र, श्लो. १०२ २. भागवत १०.२४.१८

३. शान्ति. २९५.२४

प्रेरिता लोकनिष्ठाभिः सहयोगेन पोषिता।
साम्याधृता व्यवस्था वै वर्धयेज्जनमङ्गलम्।।१४।।

साम्याधृता व्यवस्था वै सहयोगं विवर्धयेत्।
संवर्धयेत् समृद्धिं च सौभ्रात्रं च सुखं समम्।।१५।।

रक्षयेत् शोषणाच्चैव ह्याधिपत्याच्च सर्वथा।
स्थापयेच्चैव लोकार्थं लोकन्यायं च मङ्गलम्।।१६।।

अर्थस्य सुव्यवस्थासु श्रमिकश्रमगौरवम्।
स्वातन्त्र्यं सहयोगस्य जीवनस्य सुरक्षणम्।।१७।।

सौविध्यं लोकयात्रायै समोत्कर्षाय साधनम्।
आधिपत्याद् विनिर्मुक्तिः शोषणाच्चैव रक्षणम्।।१८।।

प्रबन्धे ह्यधिकारं वै सुवृत्तिं मानवोचिताम्।
साम्याधृतं च न्यायं वै लभन्ते श्रमिका जनाः।।१९।।

निश्चितं च समाजेन कालैश्च परिवर्तितम्।
तत्सम्पत्तेर्हि स्वातन्त्र्यं न जातु स्यादखण्डितम्।।२०।।

समाजेन समारम्भाः समाजेन प्रतिष्ठिताः।
सम्पत्तेरधिकारा वै समाजेन नियन्त्रिताः।।२१।।

के उत्कर्ष से सम्पन्न एवं लोकहित की भावनाओं से भूषित और सहयोग से पुष्ट समता पर आश्रित व्यवस्था ही जनमंगल को बढ़ाती है।।१३-१४।। समता पर आधृत व्यवस्था ही सहयोग, संवृद्धि, बन्धुता, समान सुख को बढ़ाती है, शोषण तथा आधिपत्य (अधीनता) से पूरी तौर पर रक्षा करती है एवं लोकहित, लोकन्याय और मंगल को प्रसारित करती है।।१५-१६।। अच्छी आर्थिक व्यवस्था में श्रमिकों के श्रम का गौरव, सहयोग की स्वतन्त्रता, जीवन की समुचित रक्षा, जीवन-निर्वाह की सुविधा, उत्कर्ष के साधन, अधीनता से छुटकारा, शोषण से रक्षा, प्रबन्ध में अधिकार, मनोवांछित रोजगार और जीविका, समता पर आधृत न्याय श्रमिक जन प्राप्त करते हैं।।१७-१९।। समाज से आरम्भ तथा समाज से प्रतिष्ठित सम्पत्ति के अधिकार समाज से नियन्त्रित हैं।।२०।। लोक की अभिवृद्धि ही उनका गुण है, लोकहित से रहित मिल्कियत या सम्पत्ति के अधिकार समाज द्वारा वर्जित हैं।।२१।। समाज से निश्चित तथा परिस्थिति द्वारा परिवर्तित सम्पत्ति की स्वतन्त्रता या अधिकार को अखण्ड नहीं कहा जा सकता, अर्थात्

लोकस्यास्याभिवृद्धिर्हि गुणस्तेषां प्रकीर्तितः ।
लोकार्थरहितं स्वत्वं समाजेन विवर्जितम् ।।२२।।

समाजहितसिद्ध्यर्थं समाजेन नियोजितम् ।
परिवर्तनशीलं वै सम्पत्तेः स्वत्वमुच्यते ।।२३।।

न्यायसौहार्दपुष्ट्यर्थं जनकल्याणहेतवे ।
व्यापारोद्योगलाभाः स्यू राज्यादेशनियन्त्रिताः ।।२४।।

वह शाश्वत और अपरिवर्तनीय न होकर सामयिक और परिवर्तनशील है।।२२।। समाज के हित की सिद्धि के लिये समाज द्वारा नियोजित सम्पत्ति का अधिकार परिवर्तनशील कहा जाता है।।२३।। न्याय तथा सौहार्द की पुष्टि एवं जनकल्याण के निमित्त राज्य के आदेश द्वारा व्यापार, उद्योग तथा लाभ का नियन्त्रण होना चाहिये।।२४।।

आधुनिक प्रगतिशील विद्वानों की तरह मनु, कौटिल्य आदि प्राचीन विद्वानों ने भी मुक्त व्यापार के सिद्धान्त को स्वीकार न करके उद्योग, व्यापार, लाभ आदि व्यक्तिगत आर्थिक कार्यों का राज्य द्वारा नियन्त्रण आवश्यक समझा है। मनु ने बैलों की क्षमता को ध्यान में रखते हुए खेती में उनके श्रम के प्रयोग के सम्बन्ध में कई नियम निर्धारित किये हैं (देखें मनुस्मृति)। इसी तरह कौटिल्य ने व्यापार के नियन्त्रण के सम्बन्ध में कई सिद्धान्तों को प्रतिपादित किया है। उन्होंने अपने प्रसिद्ध ग्रन्थ अर्थशास्त्र में राज्य द्वारा पण्याधिकारी की नियुक्ति की व्यवस्था करते हुए व्यापार के सम्बन्ध में उसके कर्तव्यों तथा नियन्त्रण सम्बन्धी अधिकारों की काफी विस्तार से विवेचना की है। इस व्यवस्था में उन्होंने और बहुत सी बातों के साथ-साथ बिक्री की वस्तुओं में मिलावट या तौल आदि में धोखेबाजी को दण्डित करार देते हुए लिखा है कि 'पण्याधिकारी' उपभोग की वस्तुओं के क्रय-विक्रय की ऐसी व्यवस्था करे कि जिससे उपभोक्ता-वर्ग का लाभ हो, तथा वह इस बात से सदा सतर्क रहे कि एक साथ मिलकर बहुत से व्यापारी माल की खरीद बिक्री न कर पायें। कौटिल्य ने लिखा कि यदि व्यापारी पण्याधिकारी की अनुमति के बिना अन्न आदि वस्तुओं का संग्रह करें, तो वह माल जब्त कर लिया जाय। अगर वे निश्चित मुनाफे से अधिक मुनाफा लेकर वस्तुओं को बेचें, तो उनको २०० पण का दण्ड दिया जाय। यदि वे एकता करके माल रोकें और अनुचित मूल्य पर क्रय-विक्रय करें, तो उनमें से प्रत्येक को एक-एक हजार पण का अर्थदण्ड दिया जाय। कौटिल्य का यह भी कहना था कि देशी वस्तुओं के व्यापार में पाँच प्रतिशत का तथा विदेशी माल के व्यापार में दस प्रतिशत का लाभ ही उचित लाभ है। (देखें—अर्थशास्त्र दूसरे अधिकरण का १६ अध्याय तथा चतुर्थ अधिकरण का दूसरा अध्याय)।

समाजहितसिद्ध्यर्थं जनकल्याणहेतवे ।
उद्योगानां नागराणां समाजीकरणं चरेत् ।।२५।।
सुव्यवस्थितराष्ट्रे वै समाजीकृतसम्पदः ।
विनाशयन्ति वैषम्यं हितसङ्घर्षशोषणे ।।२६।।
प्रतिष्ठापयन्ते न्यायं श्रमिकानां च गौरवम् ।
संवर्धयति सौभ्रात्रं राष्ट्रोत्कर्षं च मङ्गलम् ।।२७।।

समाज के हित की सिद्धि तथा जनता के कल्याण के निमित्त नागरिकों के निजी उद्योगों का समाजीकरण किया जाय।।२५।। सुव्यवस्थित राष्ट्र में समाजीकृत सम्पत्ति विषमता, हितसंघर्ष और शोषण को नष्ट करती है, न्याय तथा श्रमिकों के गौरव को प्रतिष्ठित करती है तथा बन्धुता, राष्ट्र के उत्कर्ष और मंगल को बढ़ाती है।।२६-२७।।

स्थिर स्वार्थों के समर्थक निजी सम्पत्ति के समाजीकरण का विरोध करते हैं। वे उसे अन्याय समझते हैं। उनके विचार में सम्पत्ति मानव-व्यक्तित्व की अभिव्यक्ति है, सम्पत्ति का अधिकार मानव-व्यक्तित्व के अधिकार की तरह ही नैसर्गिक है, निजी सम्पत्ति का अपहरण व्यक्तित्व को खण्डित करता है। उनके विचार में सम्पत्ति का संग्रह मानव-स्वभाव का नैसर्गिक गुण है। इसके उत्तर में समाजवादी विचारकों का कहना है कि मानव-अधिकारों की उत्पत्ति समाज में होती है, सामाजिक परिस्थिति और मान्यताओं के साथ साथ उनमें भी परिवर्तन होता है। सम्पत्ति तो एकमात्र सामाजिक संस्था है, वह तो सामाजिक व्यवस्था पर आश्रित है और उसकी व्यवस्था समय समय पर बदलती रही है। सम्पत्ति की मान्यता की तुलना व्यक्तित्व की मान्यता से नहीं की जा सकती। जहाँ व्यक्तित्व मानव जीवन में निहित है, उसका सार है, वहाँ सम्पत्ति एक भौतिक साधन है। सम्पत्ति के बजाय मानवश्रम व्यक्तित्व की अभिव्यक्ति है, श्रम का समुचित संरक्षण मानव व्यक्तित्व के संरक्षण का अंग है। उसका तिरस्कार और अपहरण ही व्यक्तित्व को खण्डित करता है। लोभ पर आश्रित आर्थिक व्यवस्था में मानव श्रम के बजाय सम्पत्ति का आदर होता है, जहाँ सम्पत्ति के अधिकारों का संरक्षण होता है, वहाँ श्रमिकों के श्रम का शोषण होता है। श्रमिकों के श्रम की अभिव्यक्ति का उपभोग श्रमिकों के बजाय सुविधा-सम्पन्न धनवान् करते हैं। समाजवादी आर्थिक व्यवस्था निजी सम्पत्ति के बजाय मानवश्रम का समुचित संरक्षण कर मानव व्यक्तित्व का संरक्षण करती है, श्रम और ज्ञान की एकता को प्रतिष्ठित कर श्रमिकों को अपने व्यक्तित्व के सर्वांगीण विकास की सुविधा प्रदान करती है, शोषण का अन्त कर सामाजिक न्याय की स्थापना करती है। संचय और प्रतिष्ठा मानव का स्वभाव हो सकता है। पर जीवन में इनकी अभिव्यक्ति अनेक

न्यायः

ईक्षया निश्चितं सत्यं समाजहितसंयुतम् ।
निर्द्वन्द्वं वैररहितं लोकन्यायः प्रकीर्तितः ।।१।।

यः स्याद् धारणसंयुक्तः समभावगुणान्वितः ।
विभूषितो जनहितैर्लोकन्यायः स उच्यते ।।२।।

स्वातन्त्र्यं च मनुष्यत्वं समत्वं सहकारिता ।
शान्तिः कल्याणमुत्कर्षस्तस्य ध्येयमुदाहृतम् ।।३।।

प्रकार से होती है। जहाँ बहुत से व्यक्ति धन के संचय में ही अपना अभीष्ट समझ उसमें संलग्न हैं, वहाँ दूसरे लोग समाजसेवा द्वारा कल्याण के संचय में संलग्न रहते हैं और इस कार्य द्वारा प्राप्त प्रतिष्ठा को पर्याप्त समझते हैं। कतिपय व्यक्ति तो प्रतिष्ठा के लोभ-मोह का भी परित्याग कर निष्काम भाव से विश्वकल्याण की अभिवृद्धि करना ही उचित समझते हैं। सम्पत्ति के संचय की लालसा कृत्रिम है, निजी सम्पत्ति पर आश्रित व्यवस्था का परिणाम है। मानव तो जीवनयात्रा की सुविधा तथा समाज में सम्मान चाहता है। चूँकि निजी सम्पत्ति पर आश्रित व्यवस्था में इनकी उपलब्धि सम्पत्ति के संचय द्वारा होती है, सम्पत्तिवान् ही सर्वसुविधा-सम्पन्न होते हैं, उन्हींका समाज में सम्मान होता है और सम्पत्ति ही सफलता का मापदण्ड है, इसलिये मानव प्रेरणायें इस ओर झुक जाती हैं, यह उनका अभीष्ट और लक्ष्य बन जाती है। पर ऐसी व्यवस्था में जहाँ पर्याप्त श्रम के बाद जीवन की सुविधा प्राप्त हो सकती हो और समाजसेवा ही प्रतिष्ठा का मापदण्ड हो, वहाँ मानव प्रेरणायें उधर झुकेंगी। प्रेरणाओं के इस झुकाव में अवश्य ही मानव-जीवन का विकास निहित है। निजी सम्पत्ति का समाजीकरण सम्पत्ति का विनाश नहीं, बल्कि उसका रूपान्तरण है। सामाजिक सम्पत्ति के रूप में उसकी अभिव्यक्ति है।।

विवेक से निश्चित, समभाव से समन्वित, लोक को धारण करने में समर्थ तथा लोकरक्षा की शक्ति से सम्पन्न, जनकल्याण से भूषित, समाज के हित से युक्त, निर्द्वन्द्व और वैररहित सत्य लोकन्याय कहलाता है।।१-२।।

विवेक, समाज कल्याण, निर्द्वन्द्वता, निर्वैरता, समाज की व्यवस्था ठीक रहने की क्षमता, समता और जनकल्याण का सामर्थ्य लोकन्याय के लक्षण हैं। इन गुणों और लक्षणों से सम्पन्न विधि-विधान लोकन्याय है।

स्वतन्त्रता, सर्व सौहार्द, समता, सहकारिता, शान्ति और कल्याण तथा उत्कर्ष लोककल्याण के ध्येय बताये जाते हैं।।३।। श्रमिकों के कल्याण की वृद्धि, बेकारों का

श्रमिकक्षेमसंवृद्धिरमृतानां च पोषणम् ।
रक्षणं निर्बलानां च लोकन्याय उदाहृतः ।।४।।

न्याये स्थितं राष्ट्रहितं सर्वोत्थानं सुखं समम् ।
अधिकारा मानवानामैश्वर्यं रक्षणं तथा ।।५।।

लोकन्यायः परा शक्तिः समाजस्य परो गुणः ।
न्यायेन सम्प्रवर्धन्ते स्वातन्त्र्यं समता तथा ।।६।।

समोत्कर्षश्च लोकार्थः सत्यं शीलं च मङ्गलम् ।
अभिवृद्धिश्च सर्वेषां सानन्दं जीवनं तथा ।।७।।

लोकन्यायात् परं नास्ति वृत्तं शीलं तपो व्रतम् ।
लोकन्यायो हि कर्तव्य इत्येव मुनिभिः स्मृतम् ।।८।।

लोका न्यायेन विधृता रक्षिताः परिपालिताः ।
ततो विवेकी विक्रान्तो न्यायं धारयते ध्रुवम् ।।९।।

राष्ट्रे वैषम्यसम्पन्ने वर्गाधिप्यसमन्विते ।
शोषणैश्च समायुक्ते न्यायो विक्रियतां व्रजेत् ।।१०।।

भरण-पोषण, निर्बलों की रक्षा लोकन्याय है।।४।। न्याय में राष्ट्र का हित, सबका उत्थान तथा समान सुख, मानव-अधिकार, ऐश्वर्य एवं रक्षा स्थित हैं, अर्थात् न्याय द्वारा ही इनकी प्राप्ति और रक्षा होती है।।५।।

लोकन्याय उच्चतर शक्ति है, समाज का उत्तम गुण है। न्याय से स्वतन्त्रता, समता, बल तथा समोत्कर्ष, लोकहित, शील, मंगल, सबकी अभिवृद्धि एवं आनन्दमय जीवन का विकास होता है।।६-७।। लोकन्याय से उत्तम कोई सदाचार, शील, तप और संकल्प नहीं है। लोकन्याय का आचरण करना चाहिये, यही मुनियों ने कहा है।।८।। समाज के मन्तव्य और परिस्थिति से प्रभावित कानून तथा समाजव्यवस्था सामाजिक लक्ष्य तथा गुणों से सम्पन्न होते हैं।।९।। विषमता से सम्पन्न राष्ट्र में कानून विषमता से सम्पन्न होता है । समता पर आश्रित राष्ट्र में कानून भी समता पर आश्रित होता है।।१०।

जैसा कि 'समाजोत्कर्ष' प्रकरण में बताया गया है, न्याय सामाजिक परिस्थितियों तथा आर्थिक व्यवस्था से प्रभावित और नियन्त्रित है । अतः विषमता से ग्रस्त तथा वर्गाधिपत्य से नियन्त्रित परिस्थितियों तथा व्यवस्थाओं में न्याय का सच्चा स्वरूप विकसित नहीं हो पाता, वह मानवमात्र के कल्याण को पुष्ट करने के बजाय वर्गविशेष

राष्ट्रे वैषम्यसम्पन्ने न्यायस्थापनहेतवे ।
विरोधयेदनाचारमन्यायं शोषणं तथा ।।११।।

लोकन्यायसमायुक्तो नीतिशीलगुणान्वितः ।
मानवोचितमार्गेण लोकन्यायं हि स्थापयेत् ।।१२।।

संवर्धयेद्धि स्वातन्त्र्यं समत्वं सहकारिताम् ।
अधिकारं नराणां च न्यायवृत्तिं च मङ्गलम् ।।१३।।

आधिपत्येन संयुक्तं शोषणेन समन्वितम् ।
न्यायमन्यायमूलं च तत्समर्थितशोषणम् ।।१४।।

कर्तव्यनिष्ठः क्रान्तिभ्यो न्यायोचितपथेन च ।
त्यक्त्वा हृदयदौर्बल्यं यत्नतः प्रतिरोधयेत् ।।१५।।

लोकन्यायं प्रतिष्ठाप्य वर्धयेत् लोकमङ्गलम् ।
न्यायेन रक्षिता लोका आनन्दं प्राप्नुवन्ति वै ।।१६।।

सदाचारसमायुक्तो न्यायवृत्तिं हि धारयेत् ।
शीलन्यायविहीनस्य क्रियास्तु हितघातुकाः ।।१७।।

अन्यायं मनसा वाचा कर्मणाऽपि त्यजेत् सदा ।
लोकन्यायाश्रयेणैव कल्याणं समुदाचरेत् ।।१८।।

के हितों और अधिकारों का समर्थन करता है, वह समता को प्रतिष्ठित करने के बजाय विषमता और असमानता को स्थायी बनाने का उपकरण बन जाता है ।

राष्ट्र की न्यायभावना भी परिस्थिति से प्रभावित होती है । उसका पूर्ण विकास तो समता पर आश्रित समाज में होता है।।११।। समता से युक्त, जनकल्याण से सम्पन्न तथा मानव अधिकार से समन्वित कानून को यत्नपूर्वक पुष्ट किया जाय।।१२।। आधिपत्य और शोषण से सम्पन्न अन्यायमूलक विधि (कानून) तथा उससे समर्थित शोषण को कर्तव्यनिष्ठ क्रान्तियों और लोकतान्त्रिक मार्ग से हृदय की दुर्बलता को छोड़कर यत्नपूर्वक रोके।।१३-१४।। लोकन्याय तथा नीति एवं शील से युक्त पुरुष मानवोचित मार्ग से लोकन्याय को स्थापित करे, सद्वृत्ति एवं समता और सहकारिता तथा सब मनुष्यों के हित, स्वतन्त्रता और जनमंगल को बढ़ाये।।१५-१६।। लोकन्याय को प्रतिष्ठित कर लोकमंगल को बढ़ाये। न्याय से रक्षित लोग आनन्द को प्राप्त करते हैं।।१७।। सदाचार से सम्पन्न न्यायपूर्ण जीवनचर्या और व्यवसाय को ही ग्रहण करे, शील और न्याय से विहीन पुरुष के कार्य तो हित के घातक होते हैं।।१८।। अन्याय को मन, वचन कर्म

परश्रमोपजीवीह लोकन्यायं न पश्यति ।
शोषणाचारनिर्मुक्तो न्यायं धारयते ध्रुवम् ।।१९।।

न्याये स्थिते राष्ट्रहितं लोकानां च स्वतन्त्रता ।
लोकन्यायं राष्ट्रनिष्ठो स्थापयेद् वर्धयेदपि ।।२०।।

प्रेरितो न्यायभावेन लोकज्ञानसमन्वितः ।
शीलशौर्यसमायुक्तो विश्वकल्याणमाचरेत् ।।२१।।

शिक्षा

विद्या प्रतिष्ठा लोकानां विद्या चैवाश्रयः सताम् ।
[१]विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।।१।।

आत्मोत्कर्षाय लोकार्थं सर्वो वै ज्ञानमावहेत् ।
विद्या सर्वाधिकारो वै नराणां भूषणं तथा ।।२।।

दीनाय चापि हीनाय तत्सौविध्यं विधारयेत् ।
सर्वोत्कर्षः समानन्दः राष्ट्रध्येयमुदाहृतम् ।।३।।

या स्याद् विवेकसंयुक्ता व्यवहारगुणान्विता ।
हितशीलसमायुक्ता सा सुशिक्षा प्रकीर्तिता ।।४।।

जीवनेनेतिहासेन तद्व्यवस्था सुनिश्चिता ।
जीवनं चेतिहासं च प्रभावयति सा सदा ।।५।।

से सदा त्याग दे । लोकन्याय के आश्रय से ही कल्याण करे।।१९।। न्यायभाव से प्रेरित तथा लोकज्ञान से सम्पन्न एवं शील और शौर्य से युक्त पुरुष विश्वकल्याण करे।।२०।। संसार में पराये श्रम पर आश्रित व्यक्ति लोकन्याय को नहीं देखता । शोषण के आचार से निर्मुक्त हो न्याय को दृढ़ता से धारण करे।।२१।।

विद्या सब लोगों की प्रतिष्ठा और सत्पुरुषों का आश्रय है । विद्या से हीन पुरुष उसी तरह शोभा नहीं पाते, जिस तरह गन्ध के बिना टेसू के फूल।।१।। विद्या तथा आचारविधि से विहीन पुरुष का जीवन बेकार है। विद्या से संसार में प्रशंसा प्राप्त होती है। उत्तम पुरुषों से आदर मिलता है।।२।। विद्या सबका अधिकार तथा मनुष्यों का भूषण है। अतः विद्या की सुविधा मानवमात्र के लिये की जाय।।३।। सबका उत्कर्ष तथा समान आनन्द राष्ट्र का ध्येय है। शिक्षा की व्यवस्था निःसन्देह समाज के इस उद्देश्य को सिद्ध करने वाली है।।४।। शिक्षा की व्यवस्था जीवन तथा इतिहास से निश्चित होती है, वह भी जीवन

---

१. चाणक्य

समोत्कर्षाय सर्वेषां समाजोत्कर्षहेतवे।
व्यवस्थिता सुशिक्षा वै समाजोद्देश्यसाधिनी ।।६।।

चारित्र्यस्य सुनिर्माणं ज्ञानकौशलसाधनम्।
सौविध्यं लोकयात्रायाः सानन्दं जीवनस्य च ।।७।।

संवर्धनं विवेकस्य राष्ट्रोत्थानस्य वै तथा।
समोत्कर्षश्च सर्वेषां शिक्षाध्येयमुदाहृतम् ।।८।।

एवं इतिहास को प्रभावित करती है।।५।। जो विवेक तथा व्यवहार से युक्त तथा हित एवं शील से सम्पन्न है, वह शिक्षा कहलाती है।।६।।

विवेक, व्यावहारिकता, शील तथा हित साधने की सामर्थ्य अच्छी शिक्षा के गुण हैं। शीलविहीन शिक्षा निरर्थक है, व्यावहारिकता से शून्य ज्ञान कोरा पाण्डित्य है। हित की साधना ही शिक्षा की व्यावहारिकता की परीक्षा तथा प्रमाण है। विद्यार्थियों को संचित ज्ञान और अनुभव की जानकारी करना ही शिक्षा का एकमात्र लक्ष्य नहीं है, उनकी विवेक शक्ति का विकास शिक्षा का महत्त्वपूर्ण उद्देश्य है। वही शिक्षित है, जो शीलवान् है और संचित ज्ञान एवं अनुभव के सहारे विकसित विवेक द्वारा उपस्थित परिस्थिति तथा समस्याओं को ठीक तौर पर समझता है, समस्याओं का समाधान सोचता है और अपने विचारों को कार्यान्वित करता है। बुद्धि, भाव तथा कर्मेन्द्रियों का सुसमन्वित तथा स्वस्थ विकास ही शिक्षा है।

चरित्र का सुन्दर निर्माण, ज्ञान तथा कौशल का साधन, लोकयात्रा की सुविधा, आनन्दमय जीवन, विवेक की सम्यक् वृद्धि, राष्ट्रोत्थान, सबका समोत्कर्ष (सर्वांगीण विकास) शिक्षा के ध्येय हैं।।७-८।।

बहुत से विद्वान् शिक्षा को सामाजिक नियन्त्रण का एक महत्त्वपूर्ण उपकरण समझते हैं। उनके विचार में समाज द्वारा प्रतिष्ठित शील, व्यवस्था तथा विचारपद्धति में नवयुवकों को अच्छी तौर पर शिक्षित करना, उनके प्रति निष्ठावान् बनाना शिक्षा का सामाजिक लक्ष्य है। इस विश्लेषण में काफी सच्चाई है। पर स्थितलक्षण (स्थिर) समाज में ही यह शिक्षा का एकमात्र उद्देश्य हो सकता है। प्रगतिशील समाज में तो नवयुवक को प्रतिष्ठित शील और व्यवस्था का वाहक बनाने के बजाय उसे प्रगति का साधक बनाना है। उसमें क्षमता पैदा करना है कि वह संचित ज्ञान तथा पूर्व व्यवस्थित शील और प्रथा के प्रगतिशील तत्त्वों की रक्षा करते हुए देश और काल के अनुकूल नये समाज का निर्माण कर सके, समाज की प्रगति में योगदान कर सके। इस तरह राष्ट्रोत्थान ही शिक्षा का ध्येय है।

सर्वसाम्यविधानेन समाजोत्कर्षहेतवे ।
ज्ञानविज्ञानविद्यासु शिक्ष्यान् सम्यक् सुशिक्षयेत् ।।९।।

लोकतन्त्रस्य सिद्धान्ते नैतिकत्वे नये तथा ।
लोकज्ञाने समुद्योगे सर्वान् वै परिशिक्षयेत् ।।१०।।

प्रौढाय दीनहीनाय स्त्रियै च श्रमिकाय च ।
नूनं विशेषसौविध्यं शिक्षायाः संविधारयेत् ।।११।।

यथाशक्ति स्वभावश्च तथा शिक्षा फलिष्यति ।
ततो गुणैः स्वभावैश्च नृणां शिक्षां विधारयेत् ।।१२।।

सबके लिये समान विधान से समाज के उत्कर्ष के निमित्त विद्यार्थियों को ज्ञान-विज्ञान में अच्छी तौर पर शिक्षित किया जाय।।९।। प्रौढ़ों, दीनहीनों, स्त्रियों तथा श्रमिकों के लिये शिक्षा का विशेष प्रबन्ध राष्ट्र द्वारा ठीक तौर पर किया जाय।।१०।।

प्रौढ़ो के लिये सामाजिक शिक्षा का समुचित प्रबन्ध सामाजिक प्रगति के लिये बहुत आवश्यक है । जो समाज जितना प्रगतिशील होगा, जिसमें नये नये विचारों, आविष्कारों तथा अनुभवों का जितना अधिक समावेश होगा, उसमें प्रौढ़ों की सामाजिक शिक्षा की उतनी ही अधिक आवश्यकता होगी । जिस समाज में पुरानी पीढ़ी के व्यक्ति जितने अधिक अशिक्षित होंगे, उसमें उतनी ही अधिक प्रौढ़ों के लिये सामाजिक शिक्षा की आवश्यकता होगी । इसी तरह अर्धविकसित समाज के पूर्ण विकास के लिये स्त्रियों की शिक्षा पर भी विशेष ध्यान देना आवश्यक है । स्त्रियों को अशिक्षित रखकर समाज की समुचित सांस्कृतिक उन्नति असम्भव है । इसी तरह दीन-हीन तथा श्रमिकों की शिक्षा पर भी विशेष ध्यान देना सामाजिक प्रगति तथा समसमाज की स्थापना के लिये आवश्यक है ।

ठीक तौर पर लोकतन्त्र के सिद्धान्त, नैतिकता, नीति तथा लोकज्ञान में सबको शिक्षित किया जाय।।११।।

लोकतन्त्र में लोकतान्त्रिक नागरिकता के उत्तरदायित्व की साधना के निमित्त प्रत्येक नागरिक को इन बातों की जानकारी आवश्यक है। अत: सब बच्चों के लिये समान रूप से इसका प्रबन्ध आवश्यक है।

सहयोगात्मक क्रीड़ा, शील, न्याय, संयम, युक्त आहार विहार से विद्यार्थी अपने स्वास्थ्य को बढ़ायें।।१२।। स्वाध्याय, सहयोग, पुस्तक, गुरुशिक्षा तथा अपने व समाज

विद्वान् प्रशस्यते लोके विद्या सर्वत्र गौरवम् ।
विद्या सतां हिता पुंसां विद्या लाभः परो मतिः ।।१३।।

मौनं विवेकमार्यत्वं ज्ञानं कर्मसु कौशलम् ।
आत्मोत्कर्षं च सम्मानं विद्वान् समधिगच्छन्ति ।।१४।।

सुविद्या शीलमाधत्ते ज्ञानं च न्यायनिष्ठताम् ।
सौम्यत्वं सत्त्वसंशुद्धिं विवेकं विनयं व्रतम् ।।१५।।

ये दम्भालस्यनिर्मुक्ता ये च सत्यार्जवे स्थिताः ।
ये युक्ता लोकभावेन ते ज्ञानं प्राप्नुवन्ति वै ।।१६।।

व्रतश्रद्धासमायुक्तो धृत्युत्साहसमन्वितः ।
विवेकी कार्यकुशलः संयमी दृढ़निश्चयः ।।१७।।

सुवृत्तः शीलसम्पन्नोऽधीतिशीलः पराक्रमी ।
प्राज्ञो जिज्ञासुसत्यार्थी शिक्षार्थी परिकीर्तितः ।।१८।।

सुशिक्षार्थी शुभां विद्यां प्राप्नुयात् सत्प्रयत्नतः ।
वृत्तं यत्नेन संरक्षेत् कार्यशीलो भवेत्तथा ।।१९।।

विद्याविधिविहीनस्य जीवनं निष्प्रयोजनम् ।
विद्यया शस्यते लोके पूज्यते चोत्तमैः सदा ।।२०।।

विद्या सर्वाधिकारो वै नराणां भूषणं तथा ।
तस्मान्मानवमात्रस्य तत्सौविध्यं विधारयेत् ।।२१।।

के विकास की भावना से एवं समाज की सेवा, प्रयोगात्मक कार्य, उत्पादक श्रम, नवीन खोज और शोध तथा देशयात्रा से अच्छा विद्यार्थी अच्छे ज्ञान को यत्नपूर्वक प्राप्त करे । सदाचार की यत्नपूर्वक रक्षा करे और कार्यशील बने।।१३-१५।। विद्यार्थी अच्छी शिक्षा से सामाजिकता, मनुष्यता, समता में दृढ़ आस्था, नैतिकता, सदाचार, सेवा तथा कर्तव्य की संस्कृति, विवेक, देशबन्धुत्व, कर्मों में कौशल, लोकतान्त्रिक सौहार्द, सत्संकल्प, विश्वभावना, न्यायनिष्ठा, सर्वांगीण उत्कर्ष, मनुष्यों के हित में प्रेम, सौजन्य एवं भावनाओं की शुद्धि प्राप्त करे।।१६-१८।। विद्यार्थी अपने जीवन को मानवता से विभूषित कर बाधक जड़ता को छोड़कर साधक तत्त्व ग्रहण करता है और स्वयं को ज्ञान-विज्ञान और चरित्र से विभूषित कर अच्छे सांस्कृतिक ढंग से विवेक, उत्साह और साहस से सत्य को प्रतिष्ठित करता है, सदा झूठ का विरोध करता है और सारे संसार के हित के लिये निश्चित रूप से सत्कर्म का अनुष्ठान करता है।।१९-२१।। संस्कृति और स्नेह की वृद्धि

सर्वोत्कर्षः समानन्दो राष्ट्रध्येयमुदाहृतम्।
शिक्षायाः सुव्यवस्था वै समाजोद्देश्यसाधिनी ।।२२।।

जीवनेनेतिहासेन तद्व्यवस्था सुनिश्चिता।
जीवनं चेतिहासं वै प्रभावयति सा सदा ।।२३।।

या स्याद् विवेकसंयुक्ता व्यवहारगुणान्विता।
हितशीलसमायुक्ता सा सुशिक्षा प्रकीर्तिता ।।२४।।

यो दक्षो ज्ञानशीलश्च सत्ययोगपरायणः।
शिष्यार्थचिन्तकः प्राज्ञः स वै शिक्षक उच्यते ।।२५।।

अध्यापनं चाध्ययनं सत्ययोगपरायणम्।
शिक्षकैः सम्प्रकर्तव्यं सद्गुणैरनुशासनम् ।।२६।।

न्यायनिष्ठोऽनहंवादी कर्तव्ये निष्ठितो यमी।
समः सर्वेषु शिष्येषु शिक्षकः शिष्टसम्मतः ।।२७।।

के लिये विद्यार्थी सहयोग और विवेक से अच्छी व्यवस्थित संगोष्ठी स्थापित करे, विधान तथा उसकी मर्यादा का नियमानुसार पालन करे तथा रचनात्मक कार्यों से हित और गौरव को बढ़ाये।।२२-२३।। विद्यार्थी विद्यापीठ तथा राष्ट्र की मर्यादा, मान, गौरव एवं सम्पत्ति की रक्षा करे और उन्हें बढ़ाये।।२४।। व्रत तथा श्रद्धा से युक्त, धृति और उत्साह से सम्पन्न, विवेकी, कार्य में चतुर, संयमी, दृढ़ निष्ठावान्, सदाचारी, शीलसम्पन्न, पढ़ाई में संलग्न, पराक्रमी, समझदार, जिज्ञासु तथा सत्य का इच्छुक विद्यार्थी कहा जाता है, अर्थात् विद्यार्थी में इन गुणों का होना आवश्यक है।।२५-२६।। जो दम्भ तथा आलस्य से मुक्त हैं, सत्य और सरलता में स्थिर हैं और लोकभावना से युक्त हैं, वे विद्या को प्राप्त करते हैं। जो दक्ष, ज्ञानशील, सत्य में लीन, विद्यार्थियों के हित के चिन्तक और बुद्धिमान् हैं, वे ही शिक्षक हैं। शिक्षकों में इन गुणों की आवश्यकता है।।२७।। पढ़ना-पढ़ाना, सत्ययोग में संलग्नता, सद्गुणों द्वारा अनुशासन ये सब शिक्षकों द्वारा आचरणीय हैं, अर्थात् ये सब शिक्षकों के कर्तव्य हैं। जो न्यायनिष्ठ, निरहंकारी, कर्तव्यपरायण, संयमी तथा सब शिष्यों के साथ समता का व्यवहार करने वाला है, वही शिक्षक है। जो विवेक तथा शील और हित से सम्पन्न ज्ञान को पढ़ाता है, वह शिक्षक है। जिसका कर्म बुद्धि के अनुकूल है और जिसकी बुद्धि सत्य का अनुगमन करती है और जो व्यवहार सम्पन्न ज्ञान जानता है, वह शिक्षक है। जो समाज के स्नेह से सम्पन्न लोक संस्कृति का विस्तार करता है तथा जनकल्याण को बढ़ाता है, वह शिक्षक है। जो दम्भ, दर्प,

यो विवेकसमायुक्तं ज्ञानं शीलहितान्वितम् ।
अध्यापयति यत्नेन स वै शिक्षक उच्यते ।।२८।।

संस्कृतिः

प्रकृतिर्मानवश्चैव सुविकासगुणान्वितौ ।
प्रभावयति चान्योऽन्यं क्रियागतिसमन्वितौ ।।१।।

सम्पर्केण तयोरेव संस्कृतेरुद्भवो भवेत् ।
स्थितिरेव गतिश्चैव तस्या नैसर्गिकौ गुणौ ।।२।।

प्रभावयति चान्योऽन्यं पौरुषं संस्कृतिस्तथा ।
तयोरेव समायोगाद् राष्ट्रोत्कर्षः समृद्ध्यते ।।३।।

पुरुषार्थेन सम्पुष्टा संस्कृतिः सिद्धिसाधिनी ।
संस्कृतिश्च मनुष्यस्य गौरवं समुदाहृतम् ।।४।।

संस्कृतिः पौरुषेणैव विकसेदिति निश्चयः ।
सुसंस्कृतो मनुष्यो वै यशो ज्ञानं च विन्दति ।।५।।

इतिहासेन भावेन ज्ञानेन च बलेन च ।
व्यवस्थिता संस्कृतिस्तु नराणां दर्पणं स्मृतम् ।।६।।

अभिमान तथा पाखण्ड से रहित है तथा अपने और समाज के उत्कर्ष में संलग्न है, वही शिक्षक है। शीलसम्पन्न शिक्षक अपने शिष्यों के सहयोग से एवं अपने सांस्कृतिक सत्कार्यों से जनहित और संस्कृति को बढ़ाता है।।२८।।

शिक्षा के सम्बन्ध में "आचार्य नरेन्द्रदेव – जीवन और सिद्धान्त" अध्याय का अध्ययन लाभदायक होगा। इस छोटे से अध्याय में आचार्य नरेन्द्रदेव के शिक्षा सम्बन्धी विचारों की उन्हीं के शब्दों में व्याख्या की गयी है।

विकास के गुण तथा क्रिया एवं गति से सम्पन्न प्रकृति और मानव एक दूसरे को प्रभावित करता है।।१।। उन दोनों के सम्पर्क से संस्कृति जन्म लेती है। स्थिति और गति उसके स्वाभाविक गुण हैं।।२।। पौरुष और संस्कृति एक दूसरे को प्रभावित करते हैं, इन दोनों के मेल से राष्ट्र का उत्कर्ष समृद्ध होता है।।३।। संस्कृति पुरुषार्थ से ही विकास को प्राप्त होती है। पुरुषार्थ से पुष्ट संस्कृति सिद्धि का साधन है।।४।। संस्कृति मनुष्य का गौरव है। सुसंस्कृत मनुष्य निश्चय ही यश और ज्ञान को प्राप्त करता है।।५।। इतिहास, भावना, ज्ञान तथा शक्ति से व्यवस्थित संस्कृति पुरुषों का दर्पण है।।६।।

उत्थापिता जीवनेन समाजेनैव निर्मिता।
समाजं जीवनं चैव प्रभावयति संस्कृतिः ।।७।।

वृद्धिर्नैतिकमूल्यस्य सानन्दं जीवनं तथा।
समोत्कर्षश्च सर्वेषां तस्या ध्येयमुदाहृतम् ।।८।।

प्राज्ञो नैतिकमूल्येन संस्कृतिं हि परीक्षते।
सद्गुणैरेव सम्पन्ना कीर्त्यते हि सुसंस्कृतिः ।।९।।

मृदुता मुदिता मौनं समता सत्यसंयमौ।
सौम्यत्वं सत्त्वसंसुद्धिः कीर्त्यते हि सुसंस्कृतिः ।।१०।।

सद्भावश्चैव सद्वृत्तिः स्वातन्त्र्यं सहकारिता।
कर्तव्येऽभिरुचिश्चैव कीर्त्यते हि सुसंस्कृतिः ।।११।।

उदात्तचित्तं सद्बुद्धिरुदारचरितं तथा।
कलासौन्दर्यवृद्धिश्च कीर्त्यते हि सुसंस्कृतिः ।।१२।।

श्रमिकक्षेमसंवृद्धिर्मानवानां हिते रतिः।
रक्षणं निर्बलानां च कीर्त्यते हि सुसंस्कृतिः ।।१३।।

मानवं गौरवं न्यायः साहित्यं प्रगतिप्रियम्।
ज्ञानविज्ञानवृद्धिश्च कीर्त्यते हि सुसंस्कृतिः ।।१४।।

उल्लासः प्रीतिहर्षौ च कारुण्यमथ मङ्गलम्।
सहानुभूतिबन्धुत्वे कीर्त्यते हि सुसंस्कृतिः ।।१५।।

जीवन से प्रबुद्ध तथा समाज से निर्मित संस्कृति समाज तथा जीवन को प्रभावित करती है।।७।। नैतिक मूल्य की वृद्धि, आनन्दमय जीवन तथा सबका समोत्कर्ष उसका ध्येय है।।८।। लोकतन्त्र पर आश्रित राज्य, समता पर आश्रित व्यवस्था, लोककल्याण से सम्पन्न सार्वलौकिक जीवन, समतामूलक स्वतन्त्रता, अच्छे कार्यों में सहयोग, श्रमिकों के कल्याण की वृद्धि, मनुष्यों के हित में लगन, मनुष्यता, विश्वभावना से सम्पन्न देशबन्धुत्व, लोकन्याय पर आश्रित शौर्य निःसन्देह अच्छी संस्कृति कहलाती है।।९-११।। सामाजिकता, जनकल्याण सम्पन्न उदारता, सत्य पर आश्रित लोकसेवा से समन्वित सदाचार, नैतिकता से विभूषित उत्कृष्ट नागरिकता, सिद्धान्त पर आश्रित अच्छे कार्य, लोकहित-सम्पन्न सत्सङ्कल्प, विद्याचरण सम्पन्न प्रगतिशील जीवन, हितकारी पौरुष निःसन्देह अच्छी संस्कृति है।।१२-१४।। सौन्दर्य सम्पन्न कला, शील से विभूषित सौन्दर्य, सद्भावों से प्रेरित काव्य, प्रगतिशील संगीत, विवेक, विश्वकल्याण से सम्पन्न

स्वराज्यं समताराज्यं लोकार्थो लोकतन्त्रकम् ।
लोकनिष्ठा लोकशीलं कीर्त्यते हि सुसंस्कृतिः ।।१६।।

आर्जवं व्यवहारेषु विचारः प्रगतिप्रियः ।
तितिक्षा मतभेदेषु कीर्त्यते हि सुसंस्कृतिः ।।१७।।

लोभाधृतव्यवस्थातः संस्कृतिस्तु विनश्यति ।
[१]एको लोभो महाग्राहो लोभात् पापं प्रवर्तते।।१८।।

[२]लोभप्रभवमज्ञानं वृद्धं भूयः प्रवर्धते ।
[३]उभावेते समफलौ समदोषौ च निश्चितम् ।।१९।।

[४]लोभान्मोहश्च माया च मानः स्तम्भः परासुता ।
[५]कुलविद्यामदश्चैव रूपैश्वर्यमदस्तथा ।।२०।।

[६]सर्वभूतेष्वभिद्रोहः सर्वभूतेष्वसत्कृतिः ।
[७]हरणं परवित्तानां मिथ्यावेगश्च दुर्जयः ।।२१।।

[८]कुत्था विकत्था मात्सर्यं पापं दुष्करकारिता ।
[९]दम्भश्च मनसो वेगः सर्वभूतेष्वनार्जवम् ।।२२।।

ज्ञान एवं विज्ञान, विश्वास से सम्पन्न धैर्य, जनकल्याण से सम्पन्न सत्य, सौहार्द से सम्पन्न सौजन्य, कर्तव्य में दृढ़ निष्ठा, शील से सम्पन्न आमोद निःसन्देह अच्छी संस्कृति है।।१५-१७।। लोभ पर आश्रित संस्कृति समाज की उन्नति की घातक है। वह मानवता की भावना, नैतिकता तथा जगत् के हित को नष्ट करती है।।१८।। लोभ से अज्ञान प्रकट होता है तथा लोभ के बढ़ने से अज्ञान भी बढ़ता है। निश्चित ही लोभ और अज्ञान दोनों का एक फल और दोष हैं।।१९।। लोभ से क्रोध, अभिमान, उद्दण्डता, पराधीनता, कुल तथा विद्या का घमण्ड, रूप तथा ऐश्वर्य का मद, सबसे द्रोह, सबका तिरस्कार, दूसरों के धन का अपहरण, मिथ्यात्व का दुर्जय वेग, घृणा, बढ़-बढ़कर बात करना, ईर्ष्या, न करने योग्य कार्यों का करना तथा दम्भ, मन का वेग और सबके साथ कुटिलता का व्यवहार होता है।।२०-२२।। समता पर आश्रित, लोकहितकारी, मानवता के गुण

---

१. शान्ति. १५५.२२ २. शान्ति. १५९.१० ३. शान्ति. १५९.९
४. शान्ति. १५८.४ ५. शान्ति. १५८.६ ६. शान्ति. १५८.७
७. शान्ति. १५८.८, शान्ति. १५८.९ ८. शान्ति. १५८.१०
९. शान्ति. १५८.२५, शान्ति. १५८.८, शान्ति. १५८.९

साम्याधृता लोकहिता मानवत्वगुणान्विता।
स्वातन्त्र्यभावसंयुक्ता लोकन्यायसमन्विता।।२३।।

ज्ञानविज्ञानसम्पन्ना प्रगतिक्रान्तिदीपिता।
संस्कृतिश्चैव सर्वेषां समोत्कर्षविवर्धनी।।२४।।

साम्याधृता संस्कृतिर्हि जीवनोद्देश्यसाधिनी।
राष्ट्रोत्थानं समोत्कर्षमानन्दं च समर्धयेत्।।२५।।

साम्याधृता संस्कृतिर्हि लोकन्यायं समर्थयेत्।
प्रतिष्ठापयते साम्यं स्वातन्त्र्यं बन्धुतां तथा।।२६।।

साम्याधृता संस्कृतिर्हि हितं लोकस्य वर्धयेत्।
विकासयति मानुष्यमानन्दं च विवर्धयेत्।।२७।।

साम्याधृतां संस्कृतिं च पौरुषं लोकमङ्गलम्।
न्यायाधृतं चरित्रं च सम्भावयति संस्कृतः।।२८।।

परित्यज्य जडत्वं चान्यायं वैषम्यमेव च।
प्रतिष्ठापयते साम्यं प्रगतिं च सुसंस्कृतः।।३०।।

संस्कृतिः प्रगतिस्त्रोतो नैतिकत्वं समाधृतम्।
प्रतिष्ठाप्य मनुष्यत्वं जगद्धितविवर्धनम्।।३१।।

से युक्त, स्वतन्त्रता की भावना से युक्त, लोकन्याय से समन्वित, ज्ञान-विज्ञान से सम्पन्न, प्रगतिशील, क्रान्ति की भावना से देदीप्यमान संस्कृति ही समोत्कर्ष को बढ़ाने वाली है।।२३-२४।। समता पर आधारित संस्कृति ही जीवन के उद्देश्य को सिद्ध करने वाली है, राष्ट्र के उत्कर्ष, समोत्थान तथा आनन्द को बढ़ाती है।।२५।। समता पर आधारित संस्कृति ही लोकन्याय को समृद्ध करने वाली है। वही समता, स्वतन्त्रता और बन्धुता को प्रतिष्ठित करती है।।२६।। संस्कृति के अच्छे गुणों से युक्त समता पर आधारित संस्कृति मनुष्यता को विकसित करती तथा आनन्द बढ़ाती है।।२७।। सुसंस्कृत पुरुष समता पर आधारित संस्कृति, पुरुषार्थ, लोकमंगल, न्याय पर आधारित चरित्र को सम्भव बनाता है।।२८।। सुसंस्कृत जन जड़ता (आलस्य और अज्ञान), अन्याय तथा विषमता को छोड़ कर समता और प्रगति को प्रतिष्ठापित करता है।।२९।। प्रगतिशील संस्कृति तथा समता पर आधारित नैतिकता मनुष्यता को प्रतिष्ठापित कर जगत् के हित को बढ़ाने वाली है।।३०।।

नैतिकत्वम्

नैतिकत्वं संस्कृतिश्च समलक्ष्यगुणान्विते ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ।।१।।
समाजेन समारब्धं प्रतिष्ठितसमर्थितम् ।
नैतिकत्वं समाजं वै प्रभावयति नित्यशः ।।२।।
बुद्धिभावसमायुक्तं सहकार्येण निर्मितम् ।
अनुरूपं स्वभावस्य देशकालप्रभावितम् ।।३।।
आदर्शेन सुसम्पन्नं जीवनोद्देश्यसाधनम् ।
नैतिकत्वं समाजस्य नृणां च दर्पणं स्मृतम् ।।४।।
स्वार्थाधृत्तात्तु सिद्धान्तान्नूनं स्वार्थः समर्थ्यते ।
विवर्धते च वैषम्यमन्यायः शोषणं तथा ।।५।।
गतिशीला नैतिकता क्रान्तिप्रियसमाधृता ।
विनाशयति वैषम्यं दमनं शोषणं तथा ।।६।।
प्रतिष्ठापयते न्यायं स्वातन्त्र्यं समतां तथा ।
राष्ट्रोत्थानं मनुष्यत्वं बन्धुत्वं सहकारिताम् ।।७।।

नैतिकता और संस्कृति दोनों ही समान लक्ष्य से युक्त हैं। इनमें से एक को भी सम्यक् रूप से (ठीक तौर पर) कार्यान्वित करने वाला दोनों के फल को प्राप्त कर लेता है।।१।। समाज से समारब्ध, प्रतिष्ठित तथा समर्थित नैतिकता समाज को निश्चय ही नित्य प्रभावित करती है।।२।।

नैतिक जीवन का जन्म और विकास समाज में होता है और वह सामाजिक परिस्थिति तथा आदर्शों से प्रभावित होता है। समाज की नैतिक व्यवस्था से सामाजिक विकास के स्तर को पहचाना जा सकता है।

नैतिकता की व्यवस्था भाव, काल, एवं विचारों पर स्थित है। निःसन्देह उनके अच्छे सम्बन्धों से मूल्यों का विकास होता है।।३।। बुद्धि और भाव मनुष्यों के प्राकृतिक गुण हैं। वे दोनों आदर्शों का सृजन करते हैं और स्थिति को प्रभावित करते हैं। वे दोनों नित्य काल और परिस्थिति से प्रभावित होते हैं और उनकी सृजनशक्ति काल और स्थिति से नियन्त्रित है।।४-५।। विवेक से समर्थित नैतिकता के सिद्धान्त अपनी शक्ति से विकसित होते और जीवन को प्रकाशित करते हैं, पर इन सिद्धान्तों का विकास व्यवस्था और काल से नियन्त्रित है और वे समता पर आश्रित व्यवस्था में ही पूरी तौर से विकसित होते हैं।।६-७।।

नैतिकव्यवहारेण भावशुद्धिं च भद्रताम् ।
उत्तरोत्तरमुत्कर्षं श्रेयश्च लभते नरः ।।८।।

प्राज्ञो नैतिकमूल्येन न्यायवृत्तिं विधारयेत् ।
संवर्धयेच्च लोकार्थं संस्कृतिं च सुखं समम् ।।९।।

राष्ट्रे वैषम्यसम्पन्ने सर्वोत्कर्षस्य हेतवे ।
शोषणस्य विनाशाय न्यायसङ्घर्षमावहेत् ।।१०।।

मानवो न्यायसङ्घर्षादात्मोत्कर्षं समश्नुते ।
विनाशयति वैषम्यं वर्धयेच्च जगद्धितम् ।।११।।

क्रान्त्या मत्या प्रगत्या च सम्पन्नं लक्ष्यमेव हि ।
मनुष्याणां समाजस्य समोत्कर्षं विवर्धयेत् ।।१२।।

राष्ट्रे वैषम्यसम्पन्ने न्यायभावगुणान्वितः ।
क्रान्त्या गत्या प्रगत्या च सिद्धान्तैः सुसमन्वितः ।।१३।।

नैतिकता के विकास में स्थिति, विवेक और भावना सबका महत्त्वपूर्ण योगदान है। नैतिकता भावना पर आधारित है। भावनाविहीन नैतिकता कोरा पाण्डित्य है, पर नैतिक नियमों की व्यवस्था और परिशुद्धि के लिये विवेक का योग आवश्यक है। प्रत्येक समाज की नैतिक व्यवस्था पर देश की सामाजिक परिस्थिति की छाप होती है। जीवन के आदर्शों से नैतिकता का गहरा सम्बन्ध है, वह आदर्शों का भण्डार है, जीवन को उनसे अनुप्राणित करती है और स्वयं उस पर आधारित है। नैतिक सिद्धान्त अपनी आन्तरिक शक्तियों से किसी हद तक विकसित होते हैं, पर उनके विकास में काल और व्यवस्था का गहरा हाथ है। काल के अनुकूल व्यवस्था के बदलने पर नैतिक विधान में भी काल और व्यवस्था के अनुकूल परिवर्तन होता है।

बुद्धि और भावों से युक्त सहयोग से निर्मित, स्वभाव के अनुरूप, देश-काल से प्रभावित, आदर्श से सम्पन्न, जीवन के उद्देश्य को साधने वाली नैतिकता समाज और पुरुषों का दर्पण है, अर्थात् नैतिकता से आदर्शों और उद्देश्यों का तथा विकास की स्थिति का पता चल सकता है।।८-९।। स्वार्थ पर आश्रित सिद्धान्तों से स्वार्थ ही समर्थित होता है और विषमता, अन्याय, शोषण और भय बढ़ता है।।१०।। क्रान्ति, मति और प्रगति से सम्पन्न लक्ष्य ही मनुष्यों और समाज के सर्वांगीण विकास को बढ़ाता है।।११।। मनुष्यता और श्रम पर आधारित क्रान्ति अनैतिकता, विषमता, दमन, शोषण और भय को नष्ट करती है तथा न्याय, स्वतन्त्रता, समता, राष्ट्रोत्थान, मनुष्यता, बन्धुता और सहकारिता को प्रतिष्ठित करती है।।१२-१३।। स्वार्थ और विषमता से सम्पन्न समाज

संवर्धयेच्च स्वातन्त्र्यं राष्ट्रोत्थानं जगद्धितम्।
नैतिकोत्कर्षणं न्यायं समत्वमथ बन्धुताम्।।१४।।

क्रान्त्या गत्या प्रगत्या च सिद्धान्तैः सुकृतेन च।
कार्यनिष्ठः पोषयते चरित्रं जीवनं स्वयम्।।१५।।

नैतिके कर्मणि रतो लोकन्यायं समर्थयेत्।
स्थापयेल्लोकशीलं च सद्गुणान् विश्वबन्धुताम्।।१६।।

नैतिके कर्मणि रतो वर्धयेच्च जगद्धितम्।
समत्वं न्यायबन्धुत्वे कारुण्यमथ मङ्गलम्।।१७।।

नैतिके कर्मणि रताः सत्कार्यं कुर्वतेऽनिशम्।
आचरन्ति सदाचारं ते वै सत्पुरुषाः स्मृताः।।१८।।

नैतिके कर्मणि रतो लोकन्यायं समर्थयेत्।
स्थापयेल्लोकशीलं च सद्गुणान् विश्वबन्धुताम्।।१९।।

नैतिके कर्मणि रतो वर्धयेच्च जगद्धितम्।
समत्वं न्यायबन्धुत्वे कारुण्यमथ मङ्गलम्।।२०।।

नैतिके कर्मणि रताः सत्कार्यं कुर्वतेऽनिशम्।
आचरन्ति सदाचारं ते वै सत्पुरुषाः स्मृताः।।२१।।

में न्यायशील व्यक्ति शोषण के विनाश के लिये न्याय्य संघर्ष करे तथा स्वार्थ, विषमता से रहित व्यवस्था स्थापित करे एवं मनुष्यता और समता पर आश्रित सिद्धान्तों को परिपुष्ट करे।।१४-१५।। मनुष्य न्याय्य संघर्ष से आत्मोत्कर्ष प्राप्त करता है। अपने चरित्र तथा जनकल्याण-भावना को उच्च करता है।।१६।। नैतिक व्यवहार से मनुष्य भावों की शुद्धि, भद्रता, उत्तरोत्तर उत्कर्ष और श्रेय को प्राप्त करता है।।१७।। नैतिक कार्यों में संलग्न व्यक्ति जनता के मंगल का विस्तार करता है, राष्ट्र की स्वतन्त्रता और सम्यक् उन्नति को बढ़ाता है एवं सत्य, सद्गुण, विश्वबन्धुता, समता, शील, लोकहित तथा मनुष्यता पर आधृत संस्कृति को प्रतिष्ठित करता है।।१८-१९।। जो व्यक्ति नैतिकता से उत्कृष्ट, मनुष्यता तथा न्याय से सम्पन्न एवं विश्वकल्याण में संलग्न है, वह पुरुषों में उत्तम है।।२०।। बुद्धिमान् नैतिक मूल्य से न्याय्य वृत्ति को पुष्ट करे एवं लोकहित तथा समता पर आधारित संस्कृति की उन्नति करे।।२१।।

ज्ञानम्

जगच्च जीवनं चैव परिणामगुणान्विते ।
सम्पर्केन तयोरेव विचारस्योद्भवो भवेत् ।।१।।

विचारा गतिशीला वै क्रियाशक्तिसमन्विताः ।
प्रभावयन्ति सर्वेषां विकसन्ति च नित्यशः ।।२।।

साम्यप्रगतिसंयुक्तं व्यवहारगुणान्वितम् ।
समन्वितं जनहितैः सज्ज्ञानं परिकीर्तितम् ।।३।।

शब्दशास्त्रं महारण्यं सज्ज्ञानं परमं स्मृतम् ।
आत्मोद्देश्यसमायुक्तं सज्ज्ञानं साधयेत् सुधीः ।।४।।

जीवनोत्थापितं ज्ञानं समाजेन प्रभावितम् ।
समाजं जीवनं चैव प्रभावयति नित्यशः ।।५।।

सामर्थ्येन प्रवृत्तेश्च सुधीर्ज्ञानं परीक्षते ।
मन्तव्यस्य च संसिद्धिस्तस्य सद्गुण उच्यते ।।६।।

संसार और जीवन दोनों विकास के गुण से युक्त हैं। इन दोनों के सम्पर्क से विचार पैदा होते हैं।।१।।

कुछ विद्वानों की सम्मति है कि जीवनशक्ति ही विचारों का आधार है, बाह्य जगत् तो विचार की कल्पना है। कुछ विद्वानों की राय में विचार एकमात्र संसार की छाया है। इन दोनों विचारों के विपरीत कुछ विद्वानों की राय में जीवनशक्ति और बाह्य जगत् दोनों के सक्रिय योग से विचार पैदा होते हैं। इसी मत को यहाँ प्रतिपादित किया गया है।

विचार गतिशील हैं, वे क्रियाशक्ति से समन्वित हैं, सबको विकसित, प्रभावित करते हैं और नित्य विकसित होते हैं।।२।। समता, प्रगति तथा व्यावहारिकता एवं जगत् के हित से युक्त ज्ञान सज्ज्ञान कहा जाता है।।३।। शब्दशास्त्र एक बड़ा जंगल है, सज्ज्ञान श्रेष्ठ है। अतः बुद्धिमान् जीवन के उद्देश्य से सम्बन्धित सज्ज्ञान को साधे, अर्थात् उसे प्राप्त करे तथा कार्यान्वित करे।।४।। जीवन से प्रबुद्ध तथा समाज से प्रभावित ज्ञान समाज और जीवन दोनों को नित्य प्रभावित करता है।।५।। बुद्धिमान् सामर्थ्य, अर्थात् क्षमता तथा रुझान से ज्ञान की परीक्षा करे। मन्तव्य की सिद्धि ही उसका सद्‌गुण है, अर्थात् वही ज्ञान ठीक है, जिसमें जीवन के मन्तव्य की सिद्धि की क्षमता है और जिसका झुकाव मन्तव्य के अनुकूल है।।६।। ज्ञान और जीवन एक दूसरे पर आश्रित हैं, क्रिया

ज्ञानं च जीवनं चैव स्थितमन्योन्यसंश्रयात्।
प्रभावयति चान्योन्यं क्रियाशक्तिगुणान्वितम्।।७।।

तयोरेव समायोगाद् राष्ट्रोत्थानं विवर्धते।
आत्मोत्कर्षश्च सानन्दं जीवनं श्रेय उत्तमम्।।८।।

कर्मणा रहितं ज्ञानं पङ्गुना सदृशं भवेत्।
एवं ज्ञानेन हीनं यत् कर्मान्धेन समं कृतम्।।९।।

हतं ज्ञानं क्रियाहीनं हतश्चाज्ञानतो नरः।
न भावेन विना सिद्धिर्नास्त्यन्यायेन मङ्गलम्।।१०।।

ततः सम्यक् प्रयत्नेन सद्भावेन समन्वितः।
न्यायनिष्ठः कार्यशीलो ज्ञानवाँश्च भवेन्नरः।।११।।

[१]नहि ज्ञानेन सदृशं पवित्रमिह विद्यते।
ज्ञानं लब्ध्वा परां शान्तिं न्यायनिष्ठोऽधिगच्छति।।१२।।

ज्ञानेन पूयते शीलं वृत्तं ज्ञानेन वर्धते।
ततो ज्ञानं हि प्राप्तव्यमित्येव मुनिनोच्यते।।१३।।

आत्मोत्कर्षश्च कल्याणं शक्तिर्ज्ञानेन वर्धते।
ततः सर्वप्रयत्नेन ज्ञानं वै साधयेत् सुधीः।।१४।।

और शक्ति के गुणों से युक्त दोनों एक दूसरे को प्रभावित करते हैं। उन्हींके मेल से राष्ट्र का उत्थान, व्यक्तित्व का विकास, आनन्दमय जीवन और उत्तम श्रेय बढ़ता है।।७-८।। क्रियाहीन ज्ञान निरर्थक है, अज्ञान से पुरुष बद्ध है, भाव के बिना सिद्धि नहीं और अन्याय से मंगल नहीं। अतः मनुष्य समुचित प्रयत्न और सद्भावना से समन्वित कार्यशील न्यायनिष्ठ ज्ञानवान् बने।।९-१०।। इस संसार में ज्ञान के सदृश कोई पवित्र चीज नहीं है। न्यायनिष्ठ व्यक्ति ज्ञान को प्राप्त कर उच्चतर शान्ति प्राप्त करता है।।११।। ज्ञान से आत्मोत्कर्ष, कल्याण और शक्ति बढ़ती है। अतः सब प्रयत्नों से बुद्धिमान् ज्ञान को साधे, अर्थात् उसे प्राप्त करे तथा कार्यान्वित करे।।१२।। शोषण से समन्वित तथा विषमता से सम्पन्न राष्ट्र में वर्गाधिपत्य द्वारा सच्चा ज्ञान विकृत हो जाता है, विचार वर्गसंघर्ष से युक्त होकर विग्रह को प्राप्त होते हैं, स्थिर स्वार्थों से विकृत सिद्धान्त स्थितिलक्षण होता है, अर्थात् स्थिरता का समर्थन करता है। वह विषमता, पाखण्ड और शोषण को

---

१. गीता ४.३८

राष्ट्रे वैषम्यसम्पन्ने शोषणैश्च समन्विते ।
वर्गाधिप्येन सज्ज्ञानं विक्रियामधिगच्छति ।।१५।।

वर्गसङ्घर्षसंयुक्ता विचारा विग्रहं गताः ।
स्थितिलक्षणज्ञानं वै स्थिरस्वार्थं समर्थयेत् ।।१६।।

साम्यप्रगतिसम्पन्नं ज्ञानं क्रान्तिं समर्थयेत् ।
पोषयेद् दलितस्वार्थं जनकल्याणमावहेत् ।।१७।।

ज्ञानिनो निरहङ्कारा: समाः कार्येषु निष्ठिताः ।
न्यायशीला जनहिताः सिद्धा निष्कामकर्मसु ।।१८।।

जीविकामानपूजार्थं यो ज्ञानं प्रतिपद्यते ।
यतते न त्वनुष्ठाने ज्ञानबन्धुः स उच्यते ।।१९।।

पुष्ट करता है। सभ्यता तथा प्रगति से समन्वित ज्ञान से क्रान्ति का समर्थन होता है। वह दलितों के स्वार्थ को और जनकल्याण को बढ़ाता है।।१३-१५।।

यूं तो विचारों में विभिन्नता जीवन का लक्षण है, विचारों के संघर्ष और समन्वय द्वारा ही ज्ञान का विकास होता है। पर विषमता से सम्पन्न समाज में विचारों की विभिन्नता वर्गसंघर्ष का रूप धारण कर लेती है। स्थिर स्वार्थों के समर्थक विचारक पुरानी व्यवस्था का समर्थन करते हैं, दलित वर्गों की प्रेरणाओं तथा माँगों को विवेकहीन बताते हैं, सत्ताधारी वर्ग के अधिकारों को न्यायसंगत बताते हैं। उसके समर्थन में प्राचीन सांस्कृतिक परम्पराओं की दुहाई देते हैं। इनके विरोध में दूसरे विचारक प्रचलित व्यवस्था की कड़ी आलोचना करते हैं, उसे गतिहीन, विवेकशून्य तथा न्यायविरोधी बताते हैं और क्रान्तिकारी परिवर्तन का समर्थन करते हैं। नये विचारों, अनुभवों तथा भावनाओं द्वारा संचित ज्ञान का परिशोध प्रगति की प्रक्रिया है, उनके क्रियात्मक योग में ही सामाजिक ज्ञान का विकास निहित है।

ज्ञानी लोग निरहंकारी, कार्यनिष्ठ, समता का आचरण करने वाले, न्यायशील, विश्व का हित करने वाले तथा निष्काम कर्म का आचरण करते हैं।।१६।। जीविका तथा मान और पूजा प्राप्त करने के निमित्त जो पुरुष ज्ञान को प्रतिपादित करता है और उसके अनुष्ठान में यत्न नहीं करता, वह ज्ञानबन्धु कहलाता है।।१७।। विविध शास्त्रों का ज्ञाता बुद्धिमान् आचार्य कहलाता है, पर समत्व की भावना से रहित विद्वान् ज्ञानी नहीं कहलाते।।१८।। जो शास्त्रज्ञ लोक के ज्ञान को कम जानता है, वह मूर्ख के समान ही कहा जाता है। हितैषी पुरुष को लोकज्ञान प्राप्त करना ही चाहिये।।१९।। दम्भ और

प्राज्ञा विभिन्नशास्त्रज्ञा आचार्याः परिकीर्तिताः।
रहिताः साम्यभावेन ज्ञानिनस्ते न सम्मताः।।२०।।

शास्त्रज्ञो ह्यप्यलोकज्ञो मूर्खतुल्यः प्रकीर्तितः।
लोकज्ञानं तु प्राप्तव्यं पुरुषेण हितैषिणा।।२१।।

सत्यम्

सत्यं वै शाश्वतं लोके तस्य ज्ञानं तु दुष्करम्।
स्वानुभवेन तर्केण स्वल्पकं लभते सुधीः।।१।।

अहंकार से सम्पन्न तथा शील, चरित्र, लोककल्याण एवं क्रिया से शून्य पाण्डित्य हानिकारक है।।२०-२१।।

प्राचीन भारतीय विद्वानों ने शास्त्रज्ञ ज्ञान के महत्त्व को स्वीकार करते हुए लोक-ज्ञान को प्राप्त करना भी आवश्यक बताया है। देश और काल का समुचित ज्ञान प्राप्त करके ही मनुष्य सामाजिक कार्यों में सही योगदान कर सकता है। क्रियाहीन व्यक्ति तो गतिविहीन है। इसलिये कहा गया है—

पठकाः पाठकाश्चैव ये चान्ये शास्त्रचिन्तकाः ।
सर्वे व्यसनिनो मूर्खा यः क्रियावान् स पण्डितः ।।

(सूक्तिसुधाकर, पृ. २३७)

अर्थात् पढ़ने-पढ़ाने वाले तथा शास्त्रचिन्तन में लीन अन्य दूसरे व्यक्ति सब मूर्ख हैं। जो क्रियावान् है, वही वास्तव में पण्डित है।

प्राचीन ग्रन्थकारों ने ब्रह्मज्ञान की बड़े विस्तार से व्याख्या की है और बहुधा ज्ञान शब्द का प्रयोग ब्रह्मज्ञान के अर्थ में किया है। पर समाजशास्त्र की इस पुस्तक में ब्रह्मज्ञान की चर्चा या समीक्षा अप्रासंगिक होती, इसलिये उसकी कोई चर्चा यहाँ नहीं की गयी है, केवल मतिज्ञान तथा लोकज्ञान की व्याख्या ही की गयी है।

संसार में शाश्वत सत्य का ज्ञान दुष्कर है। बुद्धिमान् मनुष्य अनुभव और तर्क से थोड़ा ज्ञान ही प्राप्त कर पाता है।।१।।

शाश्वत ज्ञान है अथवा नहीं, इसके सम्बन्ध में विद्वानों में काफी मतभेद है। कुछ विद्वान् शाश्वत सत्य के अस्तित्व को स्वीकार करते हैं, कुछ दूसरे विचारक शाश्वत सत्य को अस्वीकार करते हुए, सापेक्ष सत्य को मानते हैं। शाश्वत सत्य को मानने वाले विद्वान् भी यह स्वीकार करते हैं कि उसका पूर्ण ज्ञान दुष्कर या असम्भव है।

इतिहासेन सम्पन्नं विभिन्नभावसंयुतम्।
अल्पज्ञानेन संयुक्तमाग्रहेण प्रभावितम्।।२।।

यत्सत्यं तन्निर्विकारं नित्यत्वं नाधिगच्छति।
अन्तर्विरोधसम्पन्नं सापेक्ष्यमधिगच्छति।।३।।

राष्ट्रे वैषम्यसम्पन्ने सत्यं विक्रियतां व्रजेत्।
सिद्धान्तो वै समाजस्य सापेक्ष्यमधिगच्छति।।४।।

सत्यं चैवानृतमुभे लोकानावृत्य निष्ठतः।
अनृतं तु परित्यज्य सत्यमेव समाचरेत्।।५।।

अज्ञानं लोममोहौ च प्रमादो मत्सरस्तथा।
आलस्यं स्तब्धता भीतिर्दम्भद्वेषमदादयः।।६।।

अत्याचारो दुराचारो दमनं शोषणं तथा।
एकाधिप्यं तथाऽन्यायमनृतं परिकीर्तितम्।।७।।

समत्वं न्यायबन्धुत्वे स्वातन्त्र्यं सहकारिता।
मनुष्यत्वं च कर्तव्यं नैतिकत्वं सुसंस्कृतिः।।८।।

सौम्यत्वं सत्त्वसंशुद्धिः सदाचारो जगद्धितम्।
विवेको विनयो ज्ञानं सत्याकाराः प्रकीर्तिताः।।९।।

सत्यं सतां हितं पुंसां सत्यमेवाश्रयः सताम्।
सत्यं च सर्वथा श्रेष्ठं सत्यं सर्वत्र गौरवम्।।१०।।

इतिहास तथा विभिन्न भावों से युक्त, आग्रह से प्रभावित तथा अल्प ज्ञान से सम्पन्न जो सत्य है, वह निर्विकार और नित्य नहीं है। वह अन्तर्विरोध से सम्पन्न है तथा सापेक्ष है।।२-३।। विषमता से सम्पन्न राष्ट्र में सत्य विकृत हो जाता है, समाज के सिद्धान्त भी सापेक्ष हो जाते हैं।।४।। सत्य और असत्य दोनों ही लोक पर छाये हुए हैं। झूठ को छोड़कर सत्य का आचरण करे।।५।। अज्ञान, लोभ, मोह, असावधानी, ईर्ष्या, आलस्य, जड़ता, भय, दम्भ, द्वेष, मद, तृष्णा, अत्याचार, दुराचार, दमन, शोषण तथा तानाशाही और अन्याय झूठ हैं।।६-७।। समता, न्याय, बन्धुता, स्वतन्त्रता, सहकारिता, लोकसेवा, मनुष्यता, नैतिकता, शुभ संस्कृति, कर्तव्य, स्वभाव की शुद्धि, सदाचार, विश्वहित, विवेक, विनय तथा ज्ञान सत्य के आकार कहे जाते हैं।।८-९।। सत्य सत्पुरुषों का हित है, सत्य ही उनका आश्रय है, सत्य सर्वथा श्रेष्ठ है, सत्य प्रत्येक स्थान और हर समय में गौरव प्रदान करता है।।१०।। सत्य के समान ज्ञान नहीं, सत्य

नास्ति सत्यसमं ज्ञानं नास्ति सत्यसमं बलम् ।
नास्ति सत्यसमं वृत्तं नास्ति सत्यसमं व्रतम् ।।११।।

सत्यं वै लोकन्यायश्च समलक्ष्यगुणान्वितौ ।
संस्थापनं च न्यायस्य सत्यस्य परमं कृतम् ।।१२।।

[१]सत्ययोगः परा निष्ठा सत्यं हि परमा गतिः ।
लोकात्मोत्कर्षकल्याणे सत्यस्य ध्येयमुच्यते ।।१३।।

सत्यस्याचरणं श्रेष्ठं मानवानां परं तपः ।
सत्यज्ञानसमायुक्त उत्कर्षं लभते ध्रुवम् ।।१४।।

सत्यस्य पौरुषं साधु न सत्याद् विद्यते परम् ।
तस्मात् सत्यं समाश्रित्य सर्वकर्माणि साधयेत् ।।१५।।

[२]सत्यस्य वचनं श्रेयः सत्यस्याराधनं शुभम् ।
यल्लोकहितमत्यन्तं तत्सत्यं मुनिनोच्यते ।।१६।।

[३]अभ्यावहति कल्याणं विविधं वाक्सुभाषितम् ।
तस्माद् मधुरवाक्येन तथ्यं पथ्यं वदेत् सदा ।।१७।।

[४]अप्रियस्यापि पथ्यस्य परिणामः सुखावहः ।
पथ्यमेव हि वक्तव्यं कर्तव्यं यत्नतोऽनिशम् ।।१८।।

के समान कोई शक्ति नहीं, तथा सत्य के समान आचार नहीं, सत्य के समान कोई संकल्प नहीं।।११।। निश्चय ही लोकन्याय और सत्य समान लक्ष्य के गुण से युक्त हैं, न्याय की स्थापना सत्य का श्रेष्ठतम कार्य है।।१२।। सत्य-योग बड़ी निष्ठा है, सत्य ही सर्वोत्तम गति है। अपना तथा लोक का उत्कर्ष ही सत्य का ध्येय कहा जाता है।।१३।। सत्य का आचरण श्रेष्ठ है, मनुष्यों का श्रेष्ठ तप है। सत्य-योग से सम्पन्न निश्चित ही उत्कर्ष प्राप्त करता है।।१४।। सत्य का पुरुषार्थ उत्तम है, सत्य से श्रेष्ठ कोई चीज विद्यमान नहीं है, अतः सत्य का आश्रय लेकर सब कर्मों को साधे।।१५।। सत्य-वचन आनन्दप्रद हैं, सत्य की आराधना शुभ है। जिससे अत्यन्त लोकहित हो वही सत्य है, ऐसा मुनियों ने कहा है।।१६।। मधुर शब्दों में कही बात अनेक प्रकार से कल्याण करती है, अतः मधुर वाक्य से सदा तथ्य और पथ्य बोले।।१७।। अप्रिय पथ्य का परिणाम भी सुख देने वाला होता है, अतः यत्नपूर्वक निरन्तर पथ्य बोलना ही कर्तव्य है।।१८।। बात

---

१. शान्ति. १६१.५ २. शान्ति. २८७.२० ३. विदुर. २.७७

४. हितो. सुहृदु. १३५

[1]वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम्।
[2]उपदेशो न दातव्यो यादृशे तादृशे जने।।१९।।
[3]नापृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः।
[4]न तत्परस्य सन्दध्यात् प्रतिकूलं यदात्मनः।।२०।।
[5]नहि प्रतिज्ञां कुर्वन्ति वितथां सत्यवादिनः।
निराशां तु समुत्सार्य प्रतिज्ञां साधयेत् सुधीः।।२१।।
[6]न श्रेष्ठा वै महागाथा याऽनर्थपदसंहिता।
एकं वै वचनं श्रेष्ठं यत् श्रुत्वा हितमावहेत्।।२२।।
[7]युक्तियुक्तमुपादेयं वचनं बालकादपि।
त्याज्यं युक्तविहीनं तु पण्डितैरपि पोषितम्।।२३।।

वहाँ कहनी चाहिये, जहाँ कहना फलदायक हो। जैसे तैसे लोगों को उपदेश नहीं देना चाहिये।।१९।। बिना पूछे किसी से कुछ न कहे, अन्याय से पूछने पर भी कुछ न कहे। जो अपने प्रतिकूल जान पड़े, वह दूसरे के प्रति भी न करे।।२०।। सत्यवादी लोग झूठी प्रतिज्ञा नहीं करते। निराशा को छोड़कर सुधी प्रतिज्ञा साधे, अर्थात् उसके अनुकूल आचरण करता हुआ उसे पूरा करे।।२१।। वह बड़ी गाथा श्रेष्ठ नहीं है, जो व्यर्थ श्लोकों का संग्रह है। वह एक वाक्य भी श्रेष्ठ है, जिसे सुनकर हित प्राप्त हो।।२२।। बालक से भी युक्तियुक्त वचन ले लेना चाहिये, युक्ति से विहीन वाक्यों को पण्डितों द्वारा पुष्ट किये जाने पर भी छोड़ देना चाहिये।।२३।।

मानवानां हिते प्रीतिर्मानवत्वमुदाहृतम् ।।३५।।

विश्वबन्धुत्वम्

भावना विश्वबन्धुत्वसमा नास्ति महीतले ।
विश्वसौहार्दयुक्ता सा विश्वशान्तिप्रसाधनम् ।।३६।।

सामाजिकता और मनुष्यता दोनों समान लक्ष्य से समन्वित होते हैं। सौहार्द, जीवन का उत्कर्ष, लोक कल्याण दोनों का लक्ष्य है।।३०।।सामाजिक मनुष्यता मानव के उत्कर्ष का साधन है। वह सौहार्द, समता, सेवा, शान्ति और कल्याण को बढ़ाने वाली है।।३१।। सामाजिकता से सम्पन्न मानवता श्रेष्ठ है। वह समाज और व्यक्ति के सामंजस्य की जननी तथा जीवन का अमृत है।।३२।। मनुष्यों में भेद नहीं, वे सब मानुष्यमूलक हैं (मूलतः मनुष्य हैं), विद्वान् सभी मनुष्यों में मनुष्यता की भावना रखता है।।३३।। जैसे अपने में वैसे ही सबमें मनुष्यता स्थित है, इसे जानकर सबके प्रति समभावना रखते हुए पण्डित आचरण करते हैं।।३४।। करुणा, विश्वबन्धुता, समता, न्याय-निष्ठा, मनुष्यों के हित में प्रेम मानवता है, अर्थात् यही मानवता के लक्षण हैं।।३५।।

इस संसार में विश्वबन्धुता के समान कोई भावना नहीं है। यह भावना विश्व-सौहार्द से युक्त तथा विश्व-शान्ति का साधन है।।३६।। जो मनुष्य सब मनुष्यों के साहचर्य और

यो नरः परिपुष्णाति सर्वमानवसङ्गतिम्।
विधत्ते विश्वकल्याणं विश्वबन्धुः स उच्यते।।३७।।

विश्वनिष्ठा हि मन्यन्ते वसुधैव कुटुम्बकम्।
विश्वशान्तिहिते न्यायं बन्धुत्वं वर्धयन्ति ते।।३८।।

तप्यन्ते विश्वतापेन विश्वाराधनतत्पराः।
विश्वं विमोचयन्त्येव ह्याधिपत्याच्च सर्वथा।।३९।।

विश्वसेवासमायुक्तो विश्वबन्धुत्वभूषितः।
व्यवहारः समुत्कृष्टो विद्वद्भिः परिकीर्त्यते।।४०।।

सहयोगेन सर्वेषां विश्वनिष्ठः प्रयत्नतः।
विश्वशान्तिं विश्वसङ्घं विश्वोत्कर्षं प्रसाधयेत्।।४१।।

समत्वम्

मानवत्वं समत्वं च ह्यन्योन्यस्य गुणोत्तमम्।
तयोः सह विकासो वै जीवनोत्कर्षलक्षणम्।।४२।।

समत्वे दृढविश्वास आस्तिक्यं परिकीर्तितम्।
समत्वाचरणं श्रेयो मानवत्वप्रसाधनम्।।४३।।

समभावसमायुक्तः सर्वेषां हितचिन्तकः।
निर्द्वन्द्वो यश्च निर्वैरः स समः परिकीर्तितः।।४४।।

मेल को पुष्ट करता है, विश्वकल्याण को बढ़ाता है वह विश्वबन्धु है।।३७।। विश्व के प्रति निष्ठावान् सारे विश्व को निश्चय ही कुटुम्ब मानते हैं। वे विश्वशान्ति, विश्वहित, न्याय, बन्धुता को बढ़ाते हैं।।३८।। विश्व की आराधना, अर्थात् सेवा में तत्पर विश्व के तापों के ताप से तापित होते हैं और वे विश्व को आधिपत्य से निश्चय ही मुक्त कराते हैं।।३९।। विश्वसेवा से सम्पन्न, विश्वबन्धुता से भूषित व्यवहार विद्वानों द्वारा उत्कृष्ट कहा जाता है।।४०।। विश्वनिष्ठ सबके सहयोग से यत्नपूर्वक विश्वशान्ति, विश्वसंघ और विश्व के उत्कर्ष को प्रतिष्ठित करे।।४१।।

मानवता और समता एक दूसरे के पूरक गुण हैं, उन दोनों का साथ-साथ विकास निःसन्देह जीवन के उत्कर्ष का लक्षण है।।४२।। समता में दृढ़ विश्वास आस्तिकता है। समता का आचरण सर्वोत्तम है, मानवता का साधन है।।४३।। जो पुरुष समभाव से युक्त, सबका हितचिन्तक, निर्द्वन्द्व और निर्वैर है, वही सम है।।४४।। आत्मतुल्य

आत्मतुल्यो मनुष्यत्व-सत्य-सौहार्दसम्भृतः ।
निष्पक्षो व्यवहारो वै समत्वं परिलक्ष्यते ।।४५।।

क्रौर्य-शोषण-निर्मुक्त-राष्ट्रनिर्माणतत्परः ।
संलग्नो दीनसेवायां मैत्रीभावेन निष्ठया ।।४६।।

रतः सिद्धौ समत्वस्य समाजे व्यक्तिजीवने ।
विश्वकल्याणसन्निष्ठः समत्वार्थी प्रकीर्तितः ।।४७।।

कर्मयोग

समत्वं वै परा निष्ठा तस्य सिद्धिः सुदुष्करा ।
कर्मयोगेन संसिद्धिं सत्यनिष्ठोऽधिगच्छति ।।४८।।

अभ्यासेनैव लोकार्थी संयमी दृढनिश्चयः ।
न्यायनिष्ठोऽनहंवादी कर्मयोगाय कल्पते ।।४९।।

निष्ठया परया तप्तं निष्कामत्वसमन्वितम् ।
कर्तव्येन कृतं कर्म योगयुक्तं प्रकीर्तितम् ।।५०।।

क्रियासु युक्तचेष्टो वै साम्ययोगपरायणः ।
निःस्पृहः सर्वकामेभ्यो योगयुक्तः प्रकीर्तितः ।।५१।।

समता-सत्य-निष्कामनिष्ठा-मानुष्यमण्डितः ।
रतो लोकहिते नित्यं कर्मयोगी प्रकीर्तितः ।।५२।।

तथा मनुष्यता, सत्य, सौहार्द से सम्पन्न निष्पक्ष व्यवहार ही समभाव का उत्तम गुण है।।४५।। क्रूरता और शोषण से निर्मुक्त, राष्ट्र के निर्माण में तत्पर, मैत्रीभाव और निष्ठा से दीनों की सेवा में संलग्न, समाज और व्यक्ति के जीवन में समता की सिद्धि में रत एवं मानव-कल्याण में निष्ठावान् समत्वार्थी कहलाता है।।४६-४७।।

समता निश्चय ही उत्तम निष्ठा है, इसकी सिद्धि कठिन है। कर्मयोग के द्वारा सत्यनिष्ठ पुरुष ही इस सिद्धि को प्राप्त कर सकता है।।४८।। अभ्यास द्वारा लोकार्थी, संयमी, दृढ़ निश्चयवान्, न्यायनिष्ठ और अहंवाद से रहित पुरुष ही कर्मयोग के लिए सशक्त है।।४९।। परमनिष्ठा से तप्त, निष्काम भावना से समन्वित तथा कर्तव्य से किया कर्म ही योगयुक्त कहलाता है।।५०।। क्रिया में संलग्न, समत्व योग में लीन, सब कामनाओं से निस्पृह (निस्वार्थ) पुरुष ही योगयुक्त है।।५१।। समता, सत्य, निष्काम निष्ठा तथा मनुष्यता से अलंकृत, नित्य लोकहित में संलग्न कर्मयोगी कहलाता है।।५२।। कार्यशीलता,

कार्यशीलं लोकहितं समत्वं न्यायनिष्ठता ।
निष्कामकर्माभिरतिः कर्मयोगः प्रशस्यते ।।५३।।

कार्यकर्माभिरमणं व्यवहारान्वितं व्रतम् ।
ज्ञानं कर्मसु कौशल्यं कार्यशीलं प्रशस्यते ।।५४।।

सदुद्देश्यसमायुक्तं स्वार्थाहङ्कारनिर्गतम् ।
लोकार्थाय कृतं कर्म निष्कामं कर्म वै स्मृतम् ।।५५।।

समाजः

सुधीः समत्वसंसिद्ध्यै समाजोत्कर्षहेतवे ।
रहितं वर्गसङ्घर्षात् समाजं स्थापयेत् समम् ।।५६।।

स्वराज्यं समताराज्यं श्रम-श्रमिक-गौरवम् ।
लोकार्थो लोकतन्त्रं च समाजः सम उच्यते ।।५७।।

दमनाधिप्यनिर्मुक्तं श्रमिक-क्षेमशासनम् ।
वृत्तेः समाजीकरणं व्यवस्था लोकतान्त्रिकी ।।५८।।

लोककल्याणसंसृष्टा उद्योगाः सार्वलौकिकाः ।
सर्वेभ्यो वृत्तिसौलभ्यं जीवनानन्दसाधनम् ।।५९।।

संस्कृतिः समतामूला वर्गवैषम्यनिर्गता ।
रक्षा सर्वाधिकाराणां साम्यराज्यगुणाः स्मृताः ।।६०।।

लोककल्याण, समता, न्याय के प्रति निष्ठा तथा निष्काम कर्मों में रुचि कर्मयोग कहलाता है।।५३।। कर्तव्य कर्मों में लगन, व्यवहार से समन्वित संकल्प, ज्ञान, कार्यों में कौशल कार्यशील कहलाता है।।५४।। अच्छे उद्देश्य से सम्पन्न, स्वार्थ और अहंकार से रहित तथा लोककल्याण के निमित्त किया गया कर्म निःसन्देह निष्काम कर्म है।।५५।।

बुद्धिमान् समता की सिद्धि तथा समाज के उत्कर्ष के हेतु वर्गसंघर्ष से रहित समसमाज को स्थापित करे।।५६।। स्वराज्य, समता राज्य, श्रम और श्रमिकों का गौरव, लोक-कल्याण और लोकतन्त्र समसमाज कहलाता है, अर्थात् ये सब उसके प्रमुख सद्‌गुण या लक्षण हैं।।५७।। दमन और आधिपत्य से रहित, श्रमिकों का कल्याणकारी शासन, उद्योगों का समाजीकरण, लोकतान्त्रिक व्यवस्था, लोककल्याण पर निर्मित सार्वलौकिक उद्योग, सबके लिए व्यवसाय, रोजगार की सुगमता तथा जीवनानन्द के साधन, वर्ग-विषमता से रहित तथा समता पर आश्रित संस्कृति, सबके अधिकारों की रक्षा समता-राज्य के सद्‌गुण हैं।।५८-६०।। समसमाज में अच्छे पुरुष स्वभावतः समता, सबका

समे समाजे सुजनाः सेवन्ते सहजं समम्।
सर्वोत्थानं समोत्कर्षं सौभ्रात्रं सहकारिताम्।।६१।।
जातिवंशपदानां ते दर्पाहङ्कारनिर्गताः।
वर्गसङ्घर्षनिर्मुक्ताः समाः सर्वोपकारकाः।।६२।।
सर्वक्षेत्रेषु सन्न्यायं लोकतन्त्रं नृगौरवम्।
कल्याणोत्कर्षसौविध्यं यत्नतो वर्धयन्ति ते।।६३।।
साम्याधृतव्यवस्थायां श्रम-व्यक्तित्व-गौरवम्।
स्वातन्त्र्यं समतामूलं सहकार्यसमन्वितम्।।६४।।
आधिपत्याद् विनिर्मुक्तिं शोषणादभिरक्षणम्।
सौविध्यं लोकयात्रायै समोत्कर्षाय साधनम्।।६५।।
प्रबन्धे ह्यधिकारं च वर्तनं मानवोचितम्।
सर्वस्थितौ लोकरक्षां लभन्ते श्रमिका जनाः।।६६।।
समाजहितसंवृद्ध्यै समता-न्यायसिद्धये।
व्यापारोद्योगलाभाः स्यू राज्यादेशनियन्त्रिताः।।६७।।
श्रमिक-क्षेम-सम्पन्नं समत्वेन समन्वितम्।
भूषितं जनकल्याणैः समाजोत्कर्षसंयुतम्।।६८।।
प्रेरितं लोकभावेन शोषणाधिप्यनिर्गतम्।
आर्थिकं संविधानं हि सर्वश्रेष्ठमुदाहृतम्।।६९।।

उत्थान, सर्वांगीण विकास, बन्धुता और सहकारिता का अनुष्ठान करते हैं। जाति, वंश और पद के अहंकार से रहित, वर्गसंघर्ष से निर्मुक्त तथा सबके उपकारी होते हैं एवं सबके प्रति समभाव रखते हैं। वे सब क्षेत्रों में न्याय, लोकतन्त्र, मानव-गौरव, तथा जनकल्याण और उत्कर्ष की सुविधा यत्नपूर्वक बढ़ाते हैं।।६१-६२।। समता पर आश्रित व्यवस्था में श्रम और व्यक्तित्व का गौरव, सहकार्य से समन्वित समतामूलक स्वतन्त्रता, आधिपत्य से रिहाई, शोषण से रक्षा, जीवन-निर्वाह की सुविधा, सर्वांगीण उत्कर्ष के लिए साधन, प्रबन्ध में अधिकार तथा मानवोचित रोजगार और रोजी एवं सभी स्थितियों में लोकरक्षा श्रमिक लोग प्राप्त करते हैं।।६३-६६।। समाजहित की वृद्धि तथा समता और न्याय की सिद्धि के लिए व्यापार, उद्योग और लाभ आदि राज्य के आदेश द्वारा नियन्त्रित हों।।६७।। श्रमिकों के कल्याण से सम्पन्न, समता से समन्वित, जनकल्याण से भूषित, सामाजिक उत्कर्ष से सम्पन्न, लोकभावना से प्रेरित एवं शोषण और आधिपत्य से निर्मुक्त आर्थिक व्यवस्था ही सर्वश्रेष्ठ है।।६८-६९।। समाज के उत्कर्ष की सिद्धि

समाजोत्कर्ष-संसिद्ध्यै जनकल्याणवृद्धये ।
उद्योगानां महाङ्गानां समाजीकरणं चरेत् ।।७०।।

सुव्यवस्थितराष्ट्रे वै समाजीकृतसम्पदः ।
विनाशयति वैषम्यं वर्गसङ्घर्षशोषणे ।।७१।।

प्रतिष्ठापयते न्यायं श्रमिकाणां च गौरवम् ।
संवर्धयति सौभ्रात्रं राष्ट्रोत्कर्षं नृमङ्गलम् ।।७२।।

सम्पदं लोकयात्रार्थं लोकः सर्वः समर्जयेत् ।
अधिकं यदि सामर्थ्यं तल्लोकार्थं समर्पयेत् ।।७३।।

लोकतन्त्र-समायुक्ते समाजे समतास्थिते ।
लोकसेवासमोत्कर्षः स्वातन्त्र्यं सहकारिता ।।७४।।

लोकन्यायसुसम्पुष्टिः सौजन्यं साम्यसंयमौ ।
लोकार्थस्य सुसंवृद्धिः संस्कृतिः समुदाहृता ।।७५।।

व्यक्तित्वं समतासिद्धं समष्टेर्भावविभूषितम् ।
मानवत्व-समायुक्तं लोकात्मोत्कर्षतत्परम् ।।७६।।

लोकज्ञानेन सम्पन्नं शील-साहस-संयुतम् ।
समे समाजे सुजनैः श्रेष्ठव्यक्तित्वमुच्यते ।।७७।।

तथा जनकल्याण की वृद्धि के लिए बड़े-बड़े उद्योगों का समाजीकरण किया जाय।।७०।। सुव्यवस्थित राष्ट्र में समाजीकृत व्यवसाय विषमता, वर्गसंघर्ष और वर्गशोषण को नष्ट करते हैं, न्याय और श्रमिकों के गौरण को प्रतिष्ठित करते हैं एवं बन्धुता, राष्ट्र का उत्कर्ष तथा मानव-मंगल को बढ़ाते हैं।।७१-७२।। लोकयात्रा, अर्थात् जीवन-निर्वाह के निमित्त सभी लोग सम्पत्ति को, धन को अर्जित करें, यदि उनका अधिक सामर्थ्य हो, तो उसे लोक-कल्याण के निमित्त अर्पित करें।।७३।। लोकतन्त्र से सम्पन्न, समता पर आश्रित समाज में लोक-सेवा, सर्वांगीण उत्कर्ष, स्वतन्त्रता, सहकारिता, लोकन्याय की पुष्टि, सौजन्य, समता, संयम, लोक-कल्याण की वृद्धि संस्कृति कहलाती है, अर्थात् उस संस्कृति के ये लक्षण हैं।।७४-७५।। समता से सिद्ध, समष्टि की भावना से विभूषित, मानवता से सम्पन्न, संसार तथा अपने उत्कर्ष में तत्पर, लोकज्ञान से युक्त, शील और साहस से सम्पन्न व्यक्तित्व समसमाज में सज्जनों द्वारा श्रेष्ठ व्यक्तित्व कहा जाता है।।७६-७७।।

लोकतन्त्रम्

स्वातन्त्र्यं जीवनप्राणाः सर्वमानवगौरवम् ।
प्रबुद्धं लोकतन्त्रं वै तस्योत्कृष्टप्रसाधनम् ।।७८।।

सर्वेषु संविधानेषु श्रेष्ठं वै लोकतान्त्रिकम् ।
सर्वे वै राष्ट्रिका यस्मिन् सर्वसत्तासमन्विताः ।।७९।।

समतासहितं न्यायं स्वातन्त्र्यमधिकारकम् ।
मानवं गौरवं ज्ञानमैश्वर्यं प्राप्नुवन्ति ते ।।८०।।

स्वातन्त्र्यं देशबन्धुत्वं समत्वं सहकारिता ।
न्यायो नराधिकारश्च लोकतन्त्रं प्रशस्यते ।।८१।।

समत्वं लोकतन्त्रस्य गुणो नैसर्गिकः स्मृतः ।
सर्वक्षेत्रेषु तद्वृद्धिस्तन्त्रस्य ध्येयमुच्यते ।।८२।।

जनशक्तिः समाजस्य शक्तेर्हि मूलकारणम् ।
जनशक्त्या धृतं राज्यं लोकतान्त्रिकमुच्यते ।।८३।।

जनशक्त्यभिवृद्धिर्हि जनकल्याणसाधनम् ।
तस्मात् सर्वप्रयत्नेन जनशक्तिं विवर्धयेत् ।।८४।।

तितिक्षुर्लोकसन्निष्ठः कार्यशीलः पराक्रमी ।
समत्वार्थी सदादर्शः सौम्यः सर्वोपकारकः ।।८५।।

स्वतन्त्रता जीवन का प्राण है, सब मनुष्यों का गौरव है। सजग और ज्ञान-सम्पन्न लोकतन्त्र ही उसका उत्कृष्ट साधन है।।७८।। सब संविधानों में लोकतान्त्रिक संविधान ही श्रेष्ठ है। इसमें ही सभी नागरिक (राष्ट्रिक) सर्वसत्ता से समन्वित होते हैं, अर्थात् राज्य की सब शक्ति उनमें निहित होती है। वे समतासम्पन्न न्याय, स्वतन्त्रता, अधिकार, मानव-गौरव, ज्ञान और ऐश्वर्य को प्राप्त करते हैं।।७९-८०।। स्वतन्त्रता, देशबन्धुता, समता, सहकारिता, न्याय और मानव अधिकार लोकतन्त्र कहलाते हैं, अर्थात् ये ही लोकतन्त्र के प्रमुख लक्षण हैं।।८१।। समता लोकतन्त्र का स्वाभाविक गुण है । सब क्षेत्रों में उसकी वृद्धि लोकतन्त्र का लक्ष्य है।।८२।। जनता की शक्ति ही समाज की शक्ति का मूल कारण है। जनशक्ति पर निर्मित राज्य ही लोकतान्त्रिक कहा जाता है।।८३।। जनशक्ति की वृद्धि ही जनकल्याण का साधन है, इसलिए शुभ यत्नों द्वारा जन-शक्ति बढ़ायी जाय।।८४।। सहनशील, लोकनिष्ठ, कार्यशील, पराक्रमी, समता के लिए प्रयत्नशील, उत्तम आदर्श से सम्पन्न, सौम्य (कोमल, दूसरों का हितैषी), सबका उपकारक, देशभक्त, सदाचारी, न्याय

देशभक्तः सदाचारी न्यायस्वातन्त्र्यनिष्ठितः ।
सहकार्ये राष्ट्रहिते रतो वै लोकतान्त्रिकः ।।८६।।

नराधिकारसम्माने ये नराः सर्वमानवम् ।
आत्मतुल्यं हि मन्यन्ते ते वै सन्नागराः स्मृताः ।।८७।।

लोकतान्त्रिकभावेन सम्भृतो दृढनिष्ठया ।
समाजोत्कर्षसंलग्नो यः स सन्नागरः स्मृतः ।।८८।।

कर्मण्यो राजनीतिज्ञः समाजोन्नतिहेतवे ।
प्रसाधयेत् प्रयत्नेन विधानं लोकतान्त्रिकम् ।।८९।।

पोषयेत् तस्य सम्मानं नीतिसिद्धान्तमान्यताः ।
शोधयेत् तस्य वैकल्यं सद्गुणांश्च प्रसारयेत् ।।९०।।

शिक्षयेज्जनतां तस्य लक्ष्यपद्धतिनीतिषु ।
सार्वलौकिककर्तव्ये समाजस्य परिस्थितौ ।।९१।।

मताधिकारसम्पन्ना जनता राष्ट्रनिष्ठया ।
सेनावर्गदलाधिप्यं नृपतन्त्रं विरोधयेत् ।।९२।।

कुर्याल्लोकसभासभ्यान् वृत्तशीलगुणान्वितान् ।
देशबन्धुत्वसन्निष्ठान् कर्तव्यन्यायनिष्ठितान् ।।९३।।

और स्वतन्त्रता के प्रति निष्ठावान्, सहकार्य और राष्ट्रहित में संलग्न व्यक्ति ही लोकतान्त्रिक है, अर्थात् लोकतान्त्रिक व्यक्ति के यही सद्गुण हैं।।८५-८६।। जो लोग मानव अधिकार और सम्मान में सब मनुष्यों को अपने समान ही मानते हैं, वे ही अच्छे नागरिक हैं।।८७।। जो लोकतान्त्रिक भावना से सम्पन्न तथा दृढ़ निष्ठा से समाज के उत्कर्ष में संलग्न हैं, वे ही अच्छे नागरिक हैं।।८८।। सक्रिय, निपुण राजनीतिज्ञ समाज की उन्नति के हेतु प्रयत्न-पूर्वक लोकतान्त्रिक संविधान को कार्यान्वित करे, उसके सम्मान, सिद्धान्त, रीति और मान्यताओं को पुष्ट करे, उसकी त्रुटियों और कमियों को सुधारे, उसके गुणों को प्रसारित करे और उसके लक्ष्य, पद्धति और नीतियों एवं सार्वलौकिक कर्तव्य और सामाजिक परिस्थितियों से जनता को शिक्षित करे।।८९-९१।। मताधिकार से सम्पन्न जनता राष्ट्रनिष्ठा से सेना, वर्ग और दल के आधिपत्य का बलपूर्वक विरोध करे, शील और आचार के गुणों से सम्पन्न एवं देशबन्धुता, कर्तव्य और न्याय के प्रति निष्ठावान् सज्जनों को लोकसभा का सदस्य बनाए, क्रूरता एवं रूढ़ि को बाहर निकाल कर लोकन्याय को पुष्ट

क्रौर्यं रूढिं निराकृत्य लोकन्यायं प्रपोषयेत्।
लोककल्याणसम्पन्ने नीतिं रीतिं समर्थयेत्।।९४।।

सभ्यो लोकसभामध्ये लोकसेवाव्रतान्वितः।
लोकतन्त्रस्य मर्यादां पद्धतिं परिपालयेत्।।९५।।

सभाध्यक्षस्य सम्मानं लोकन्यायं प्रपोषयेत्।
साहसेन विवेकेन भ्रष्टाचारं विरोधयेत्।।९६।।

रचनात्मकसङ्घर्षैरन्यायं प्रतिरोधयेत्।
वर्धयेल्लोककल्याणं स्वातन्त्र्यं साम्यबन्धुताम्।।९७।।

जनविश्वाससम्पन्ना मन्त्रिणो न्यायनिष्ठिताः।
तत्परा जनसेवायां स्वार्थाहङ्कारनिर्गताः।।९८।।

न्यायिताभाव-चारित्र्यविवेकोत्साहसाहसैः।
भजेयुर्जनकल्याणं राष्ट्रोत्कर्षं जगद्धितम्।।९९।।

मायादम्भेन्द्रजालानि परित्यज्य प्रयत्नतः।
निष्पक्षमतिभावाभ्यां शासको न्यायमाचरेत्।।१००।।

लोककल्याणराज्यम्

कुरुते जनकल्याणं सुराज्यं प्रगतिप्रियम्।
रक्षणं रञ्जनं सेवा प्रजायास्तस्य लक्षणम्।।१०१।।

करे तथा लोककल्याण से सम्पन्न नीति-रीति का समर्थन करे।।९२-९४।। लोकसभा के सदस्य लोकसेवा के संकल्प से युक्त हो लोकसभा में लोकतन्त्र की मर्यादा और पद्धति का पालन करें, सभाध्यक्ष के सम्मान तथा लोकन्याय को पुष्ट करें, साहस और विवेक के साथ भ्रष्टाचार का विरोध करें, रचनात्मक संघर्ष द्वारा अन्याय को रोकें तथा लोककल्याण, स्वतन्त्रता, समता और बन्धुता को बढ़ायें। जनता के विश्वास-प्राप्त, न्यायनिष्ठ, लोकसेवा में तत्पर, स्वार्थ और अहंकार से रहित मन्त्री लोकन्यासिता की भावना, चरित्र, विवेक, उत्साह और साहस के साथ जनता का कल्याण, राष्ट्र का उत्कर्ष, जगत् का हित निष्पन्न करें।।९८-९९।। माया (धोखा, जालसाजी), दम्भ (घमण्ड, पाखण्ड, दुष्टता), इन्द्रजाल (दाँव-पेंच, छल-कपट) को यत्नपूर्वक छोड़ कर निष्पक्ष विचारों और भावों द्वारा शासक न्याय का आचरण करें, उसे कार्य रूप में परिणत करें।।१००।।

प्रगतिशील अच्छा राज्य जनकल्याण करता है, प्रजा की रक्षा, रंजन और सेवा उसका लक्षण है।।१०१।। राष्ट्र के कल्याण की वृद्धि, दीनों का पालन, सार्वलौकिक

राष्ट्रकल्याणसंवृद्धिर्दीनानां परिपालनम् ।
सार्वलौकिककल्याणविस्तरः परिपोषणम् ।।१०२।।

लोकजीवननिर्माणं दुराचारस्य शोधनम् ।
लोककल्याणराज्यस्य सद्‌गुणाः समुदाहृताः ।।१०३।।

उद्योगानां समुत्थानं कृषिवाणिज्यवर्धनम् ।
सर्वेभ्यः श्रमसौलभ्यं वेतनं जीवनोचितम् ।।१०४।।

श्रमिकाणामधीकारा गौरवक्षमतोन्नतिः ।
लोककल्याणराज्यस्य सद्‌गुणाः समुदाहृताः ।।१०५।।

लोकसंस्कृतिसम्पुष्टिर्ज्ञानविज्ञानविस्तृतिः ।
विदुषां चैव सम्मानः कलाकौशलसम्भृतिः ।।१०६।।

विकलाङ्गस्य शुश्रूषा दौर्गत्येषु सहायता ।
लोककल्याणराज्यस्य सद्‌गुणाः समुदाहृताः ।।१०७।।

राष्ट्रियत्वम्

सर्वेषां जातिधर्माणां देशबन्धुषु सङ्गतिः ।
देशभक्तिसमायुक्ता राष्ट्रियत्वं प्रकीर्तितम् ।।१०८।।

स्वातन्त्र्यं देशबन्धुत्वं समत्वेन समन्विते ।
लोकतन्त्रं देशभक्ती राष्ट्रियत्वगुणाः स्मृताः ।।१०९।।

लोके मानवमात्रस्य स्वातन्त्र्यं क्षेमवर्धनम् ।
स्वातन्त्र्यरहितं राष्ट्रं विश्वकल्याणघातकम् ।।११०।।

कार्यों का विस्तार और पोषण, लोकजीवन का निर्माण, दुराचार का सुधार कल्याण-राज्य के सद्‌गुण हैं।।१०२-१०३।। उद्योगों का विकास, कृषि और वाणिज्य की वृद्धि, सबके लिए रोजगार की सुगमता तथा जीवनोचित वेतन, मजदूरों के अधिकार गौरव और क्षमता की उन्नति, लोककल्याण राज्य के सद्‌गुण हैं।।१०४-१०५।। लोकसंस्कृति की पुष्टि, ज्ञानविज्ञान का विस्तार, विद्वानों का सम्मान, कलाकौशल की सम्पन्नता, विकलांग की सेवा, दुर्गति में सहायता लोककल्याण राज्य के सद्‌गुण हैं।।१०६-१०७।।

सब सम्प्रदायों और जातियों के देशबन्धुओं में देशभक्ति से सम्पन्न साहचर्य राष्ट्रीयता कहलाती है।।१०८।। समता से युक्त स्वतन्त्रता और देशबन्धुता, लोकतन्त्र और देशभक्ति राष्ट्रीयता के गुण हैं।।१०९।। संसार में मानवमात्र की स्वतन्त्रता कल्याण को बढ़ाने वाली है। स्वतन्त्रता से रहित राष्ट्र विश्वकल्याण का घातक है।।११०।।

देशबन्धुत्वसंसृष्टं राष्ट्रियत्वं विवर्धयेत् ।
समाजोत्कर्षकल्याणं स्वातन्त्र्यं लोकसङ्गतिम् ।।१११।।

समता श्रमिकक्षेमं लोकतन्त्रं मनुष्यता ।
भावनां राष्ट्रियत्वस्य शोभयन्ति हि सद्गुणैः ।।११२।।

देशबन्धुत्वसंसृष्टं स्वातन्त्र्यसमतायुतम् ।
श्रमिक-क्षेमसम्पन्नं राष्ट्रियत्वं प्रपोषयेत् ।।११३।।

देशभक्तिसमायुक्तैर्मानवत्वविभूषितैः ।
हिते मानवमात्रस्य कार्या देशसमुन्नतिः ।।११४।।

अन्ताराष्ट्रियभावेन सम्भृतो राष्ट्रनिष्ठितः ।
राष्ट्रविश्वहितार्थाय लोकनीतिं विधारयेत् ।।११५।।

अन्ताराष्ट्रिय-सौहार्दं मानुष्य-समताश्रितम् ।
विधत्ते विश्वसन्धान-सहयोगौ जगद्धितम् ।।११६।।

लोकनेता

सिद्धान्ते दृढविश्वासो विचारः प्रगतिप्रदः ।
तितिक्षा मतभेदेषु कर्तव्यन्यायनिष्ठता ।।११७।।

भावना लोकसेवाया धैर्य-साहस-भद्रताः ।
लोकतान्त्रिक-नेतृत्वसद्गुणाः समुदाहृताः ।।११८।।

देशबन्धुत्व पर निर्मित राष्ट्रीयता समाज के उत्कर्ष और कल्याण को एवं स्वतन्त्रता और लोक-साहचर्य को बढ़ाती है।।१११।। समता, श्रमिकों का कल्याण, लोकतन्त्र और मनुष्यता निश्चय ही राष्ट्रीयता की भावना को सद्गुणों से अलंकृत करती है।।११२।। देशबन्धुता पर निर्मित, स्वतन्त्रता और समता से युक्त तथा श्रमिकों के कल्याण से सम्पन्न राष्ट्रीयता को पुष्ट किया जाय।।११३।। देशभक्ति से सम्पन्न, मानवता से विभूषित सज्जनों द्वारा मानवमात्र के हित में देश की उन्नति की जाय।।११४।। अन्तर्राष्ट्रीय भावना से सम्पन्न राष्ट्रनिष्ठ व्यक्ति राष्ट्र और विश्व के हित के लिए लोकनीति का विधान करे।।११५।। मनुष्यता और समता पर आश्रित अन्तर्राष्ट्रीय सौहार्द विश्व में मेल और सहयोग को तथा जगत् के हित को बढ़ाता है।।११६।।

सिद्धान्त पर दृढ़ विश्वास, प्रगतिशील विचार, मतभेदों में सहनशीलता, कर्तव्य और न्याय के प्रति निष्ठा, लोकसेवा की भावना, धैर्य, साहस और भद्रता लोकतान्त्रिक नेतृत्व के सद्गुण हैं।।११७-११८।। लोकनेता जनता के अधीन, सेवक और

लोकनेता जनाधीनः सेवको मार्गदर्शकः ।
जनविश्वाससम्पन्नो भजते जनमङ्गलम् ।।११९।।

देशभक्तियुतो नेता लोकाराधनतत्परः ।
विधत्ते त्रस्तदीनानां क्षेमोत्कर्षौ विशेषतः ।।१२०।।

आशानुप्राणितो नेता समताऽऽदर्शसंयुतः ।
साहसोत्साहसंयुक्तो विरोधेनाऽपराजितः ।।१२१।।

रचना-क्रान्ति-सङ्घर्षैः समाजोत्कर्षहेतवे ।
स्थापनाय समत्वस्य प्रयत्नं कुरुतेऽनिशम् ।।१२२।।

निर्माणार्थं समाजस्य लोकनेता दृढव्रतः ।
सार्वलौकिकमर्यादां न्यायेन परिशोधयेत् ।।१२३।।

पोषयेज्जनकल्याणं श्रम-व्यक्तित्वगौरवम् ।
रचनात्मकसामर्थ्यं लोककल्याणभावनाम् ।।१२४।।

राष्ट्रकल्याणपुष्ट्यर्थं राष्ट्रिका दृढनिश्चयाः ।
नेतॄणां सर्वकार्याणां समीक्षां कुर्वतेऽनिशम् ।।१२५।।

नेतृत्वाद् हि निराकृत्य नेतारं गुणवर्जितम् ।
समर्थयन्ति नेतारं गुणवन्तं हि राष्ट्रिकाः ।।१२६।।

मार्गदर्शक है, उसे जनता का विश्वास प्राप्त है, वह जनता के मंगल का अनुष्ठान करता है।।११९।। देशभक्ति से सम्पन्न समाज की आराधना, अर्थात् सेवा में तत्पर नेता त्रस्त और दीनों का कल्याण और उत्कर्ष विशेष रूप से बढ़ाता है।।१२०।। आशा से अनुप्राणित, समता के आदर्श से सम्पन्न, साहस और उत्साह से संयुक्त नेता विरोध से पराजित हुए बिना रचना, क्रान्ति और संघर्ष के द्वारा समाज के उत्कर्ष के निमित्त समता की स्थापना के लिए निरन्तर प्रयत्न करता है।।१२१-१२२।। समाज के निर्माण के लिए दृढ़ संकल्पी लोकनेता सार्वलौकिक मर्यादाओं का न्याय से शोधन करे तथा जनकल्याण, श्रम और व्यक्तित्व का गौरव, रचनात्मक सामर्थ्य या शक्ति, लोक-कल्याण की भावना को पुष्ट करे।।१२३-१२४।। राष्ट्र के कल्याण की पुष्टि के लिए दृढ़निश्चयी राष्ट्रिक (नागरिक) नेताओं के सब कार्यों की नित्य समीक्षा करते हैं।।१२५।। गुणविहीन नेता को नेतृत्व से हटाकर गुणवान् नेता का ही राष्ट्रिक समर्थन करते हैं।।१२६।।

प्रगतिः

संसारे नैतिकादर्शो मानव-संस्कृति-स्थितिः ।
व्यवस्था-न्याय-मर्यादाः परिणामगुणान्विताः ।।१२७।।
सर्वे विकाससम्भूताः प्रगतेः क्षमतायुताः ।
प्रभावयन्ति चान्योन्यं विकसन्ति यथाक्रमम् ।।१२८।।
मानवः स्थितियोगेन सङ्घात-बल-पौरुषैः ।
ज्ञान-चारित्र्य-सेवाभिर्विधत्ते प्रगतिं शुभाम् ।।१२९।।
प्रगत्यर्थी प्रपुष्णाति सङ्गतिं समतान्विताम् ।
लोकन्यायं सदादर्शं विधानं लोकतान्त्रिकम् ।।१३०।।
विरुन्धेत् शोषणं क्रौर्यं दमनं मत्सरं भयम् ।
संस्थापयति सौभ्रात्रं समाजं समताश्रितम् ।।१३१।।
नारीणां सर्वकार्येषु ह्यधिकारः समः स्मृतः ।
तासां समः समोत्कर्षः लोकप्रगतिहेतुकः ।।१३२।।
रचना-क्रान्ति-सङ्घर्षैर्दीनानां हितमाचरेत् ।
तेषामुत्कर्षकल्याणं समाजोन्नतिलक्षणम् ।।१३३।।
सङ्घशक्तिर्महाशक्तिर्निर्बलानां परं बलम् ।
कर्मण्यः सङ्घयोगेन नाशयेत् शोषणं भयम् ।।१३४।।

संसार में नैतिक आदर्श, संस्कृति, परिस्थिति, व्यवस्था, न्याय और मर्यादायें परिवर्तन के गुण से सम्पन्न हैं, अर्थात् ये सभी परिवर्तनशील हैं।।१२७।। विकास द्वारा उद्भूत (उत्पन्न) तथा प्रगति की क्षमता से युक्त ये सब एक दूसरे को प्रभावित करते हैं तथा क्रमानुकूल विकसित होते हैं।।१२८।। मनुष्य परिस्थितियों के सम्पर्क और मेल से सहयोग, ज्ञान और पौरुष एवं रचना, क्रान्ति, संघर्ष द्वारा शुभ प्रगति को बढ़ाता है।।१२९।। प्रगति का इच्छुक समता पर आश्रित साहचर्य, लोकन्याय, अच्छे आदर्श, लोकतान्त्रिक व्यवस्था को पुष्ट करता है। शोषण, क्रूरता, दमन, मत्सर (डाह, घमण्ड, लोभ) और भय का विरोध करता है तथा बन्धुता और समता पर आश्रित समाज को प्रतिष्ठित करता है।।१३०-१३१।। सब कामों में स्त्रियों का अधिकार निश्चय ही समान है, उनका समान सर्वांगीण उत्कर्ष समाज की प्रगति का उपकरण है।।१३२।। रचना, क्रान्ति और संघर्ष द्वारा दीनों का हित करे, उनका उत्कर्ष और कल्याण समाज की उन्नति का लक्षण है।।१३३।। संघशक्ति बड़ी शक्ति है, निर्बलों का बड़ा बल है। कर्मण्य संघ प्रक्रिया द्वारा शोषण और भय नष्ट करे।।१३४।। वर्गचैतन्य श्रमिक वर्ग-संघ द्वारा

श्रमिको वर्गचैतन्यो वर्णसङ्घेन यत्नतः ।
पोषयेद् वर्गसङ्घर्षं वर्गाधिप्यं विनाशयेत् ।।१३५।।

व्यक्तिवादमहंवादं यत्नतः प्रतिरोधयेत् ।
जनजागर्तिकल्याणे जनानन्दं विवर्धयेत् ।।१३६।।

श्रमिकोत्थानसम्मानं समानोत्कर्षमुद्वहेत् ।
स्थापयेल्लोकतन्त्रं च समाजं समतास्थितम् ।।१३७।।

रचनात्मकसङ्घर्षो राष्ट्रप्रगतिहेतुकः ।
नितरां रचनाहीनः सङ्घर्षो नाशकारकः ।।१३८।।

नरः स्वमतिचारित्र्यभावकर्माणि शोधयेत् ।
मानवोचितमार्गेण शुभं साध्यं प्रसाधयेत् ।।१३९।।

नैतिकत्वम्

मानुष्यं सामुदायित्वं समत्वं न्यायनिष्ठता ।
स्वैच्छिका लोकसेवा च नैतिकत्वस्य सद्गुणाः ।।१४०।।

आदर्शो नैतिकत्वस्य सद्भिः सामाजिकः स्मृतः ।
सङ्गतिप्रेरणाबद्धः समाजक्षेममूलकः ।।१४१।।

यत्नपूर्वक वर्ग-संघर्ष को पुष्ट करे, वर्गाधिपत्य को नष्ट करे, व्यक्तिवाद और अहंवाद को यत्नपूर्वक रोके, जनता की जागृति और कल्याण एवं जनता का आनन्द बढ़ाये, श्रमिकों का उत्थान और कल्याण एवं समाजोत्कर्ष ऊंचा उठाये तथा लोकतन्त्र और समता पर आश्रित समाज स्थापित करे।।१३५-१३७।। रचना, क्रान्ति और संघर्ष का यथोचित उपयोग (अनुष्ठान) किया जाना चाहिये। उनके समुचित मेल से जगत् के हित को बढ़ाना चाहिये। रचनात्मक संघर्ष राष्ट्र की प्रगति का साधन है, सर्वथा रचनाहीन संघर्ष नाशकारक है।।१३८।।

रचना ही संघर्ष का लक्ष्य है।

मनुष्य अपने विचार, चरित्र, भाव और कर्मों को सुधारे, मानवोचित मार्ग से शुभ साध्य को साधित करे, अर्थात् प्रगति के लिये समाज-सुधार के साथ-साथ व्यक्ति का सुधार तथा शुभ साधनों का प्रयोग आवश्यक है।।१३९।।

मनुष्यता, सामाजिकता, समता, न्यायनिष्ठा और अपनी इच्छा से की गई लोकसेवा नैतिकता के सद्गुण हैं।।१४०।। नैतिकता के आदर्श सज्जनों द्वारा सामाजिक बताये गये हैं। वे साहचर्य की प्रेरणा से सम्बद्ध तथा समाज-कल्याण-मूलक हैं, अर्थात् समाज-कल्याण और सौहार्द की वृद्धि ही नैतिकता के लक्ष्य हैं।।१४१।। नैतिकता गतिशील

नैतिकत्वं गतिस्त्रोतः प्रगतिस्तस्य सद्गुणः ।
प्रगतिक्षेमसामर्थ्यं परीक्षा तस्य वै स्मृता ।।१४२।।

व्यापकं सर्वकार्येषु सर्वकल्याणसम्भृतम् ।
कर्तव्यसमतायुक्तं नैतिकत्वं परं शुभम् ।।१४३।।

स्वेच्छया प्रेरितं कर्म जनकल्याणभूषितम् ।
निःस्वार्थभावसम्पन्नं समताबुद्धिशोभितम् ।।१४४।।

सदन्तः क्षमतायुक्तं शुभसाधनसम्भृतम् ।
सच्चारित्र्यसमायुक्तं नैतिकं सद्भिरुच्यते ।।१४५।।

अन्धविश्वासनिर्मुक्तिर्मानुष्यं न्यायनिष्ठता ।
लोककल्याणलग्नत्वं नैतिकोत्कर्षसाधनम् ।।१४६।।

चित्तशुद्धिः सदाचारो भावना स्नेहसङ्गतेः ।
औदार्यं स्वार्थनिर्मुक्तं नैतिकोत्कर्षसाधनम् ।।१४७।।

भावना नैतिकत्वस्य स्थितिकालप्रभाविता ।
स्थितौ वैषम्ययुक्तायां विक्रियामधिगच्छति ।।१४८।।

ततस्तस्य विकासार्थं नीतिनिष्ठः प्रयत्नतः ।
व्यवस्थां स्थापयेद्राष्ट्रे कल्याणसमताश्रिताम् ।।१४९।।

है, प्रगति उसका सद्गुण है। प्रगति और कल्याण का सामर्थ्य ही नैतिकता की परीक्षा है।।१४२।। सभी कार्यों में व्यापक, सत्य और कल्याण से सम्पन्न, कर्तव्य और समता से युक्त नैतिकता बहुत शुभ है।।१४३।। अपनी इच्छा से प्रेरित जनकल्याण से विभूषित, निःस्वार्थ भाव से सम्पन्न, समष्टि तथा समता से शोभित, अच्छे अन्त की क्षमता से युक्त, अच्छे साधनों से सम्पन्न अच्छे चरित्र से युक्त कर्म ही सज्जनों द्वारा नैतिक कहा गया है, ये सब नैतिक कर्म के आवश्यक लक्षण हैं।।१४४-१४५।। अन्ध-विश्वास से छुटकारा, मनुष्यता और न्याय के प्रति निष्ठा, लोककल्याण में लगन नैतिक उत्कर्ष के साधन हैं।।१४६।। चित्तशुद्धि, सदाचार, स्नेह और साहचर्य की भावना, स्वार्थहीन उदारता नैतिक उत्कर्ष के साधन हैं।।१४७।। नैतिकता की भावना परिस्थिति और काल से प्रभावित है। वह विषमता से युक्त स्थिति में विकृत हो जाती है। इसलिए उसके विकास के निमित्त नीतिनिष्ठ, अर्थात् नैतिकता में अनुरक्त राष्ट्र में कल्याण और समता पर आश्रित व्यवस्था यत्नपूर्वक स्थापित करें।।१४८-१४९।। नीतिनिष्ठ स्वार्थ और विषमता से

स्वार्थ-वैषम्य-सम्पन्ने समाजे नीतिनिष्ठितः ।
शोषणस्य विनाशाय न्यायसङ्घर्षमुद्वहेत् ।।१५०।।

क्रान्तिशीला नैतिकता मानुष्यसमताधृता ।
विनाशयति वैषम्यं दमनं शोषणं भयम् ।।१५१।।

प्रतिष्ठापयते न्यायं स्वातन्त्र्यं समतां तथा ।
राष्ट्रोत्थानं मनुष्यत्वं वन्धुतां सहकारिताम् ।।१५२।।

संस्कृतिः समतामूला वर्गवैषम्यनिर्गता ।
लोकन्यायसमायुक्ता मानवत्वेन मण्डिता ।।१५३।।

भद्रताज्ञानसम्पन्ना क्षेमोत्कर्षगुणान्विता ।
भूषिता लोकतन्त्रेण विद्वद्भिर्नैतिकी स्मृता ।।१५४।।

कर्तव्यम्

न्यायः कल्याणमुत्कर्षो नूनं सत्कर्मलक्षणम् ।
एतैः समन्वितं कर्म कर्तव्यं समुदाहृतम् ।।१५५।।

कल्याणार्थाय जीवानां समाजोत्कर्षहेतवे ।
स्वातन्त्र्याय समत्वय संस्कृतेरभिवृद्धये ।।१५६।।

आत्मोत्थानाय सेवायै सत्यस्थापनहेतवे ।
लोकन्याययुतं कार्यं कर्तव्यं समुदाहृतम् ।।१५७।।

सम्पन्न समाज में शोषण के विनाश के लिए न्याय-संघर्ष का संचालन करें।।१५०।। मनुष्यता और समता पर आश्रित क्रान्तिशीला नैतिकता विषमता, दमन, शोषण और भय नष्ट करती है तथा न्याय, स्वतन्त्रता, समता, राष्ट्रोत्थान, मनुष्यता, बन्धुत्व, सहकारिता प्रतिष्ठित करती है।।१५१-१५२।। समतामूलक, वर्गविषमता से रहित, लोकन्याय से युक्त, मानवता से अलंकृत, भद्रता और ज्ञान से सम्पन्न, कल्याण और उत्कर्ष के गुणों से युक्त लोकतन्त्र से भूषित संस्कृति विद्वानों द्वारा नैतिक बतायी गयी है।।१५३-१५४।।

न्याय, कल्याण और उत्कर्ष निःसन्देह सत्कर्म के लक्षण हैं। इनसे युक्त कर्म कर्तव्य है, अर्थात् हमें वही काम करना चाहिये, जिससे न्याय की पुष्टि, कल्याण की वृद्धि तथा जीवन और समाज का उत्कर्ष हो।।१५५।। जीवों के कल्याण के लिए, समाज के उत्कर्ष के हेतु, स्वतन्त्रता, समता, संस्कृति की अभिवृद्धि के लिए, अपने उत्थान तथा सेवा के लिए तथा सत्य की स्थापना के हेतु लोकन्याय से युक्त कार्य कर्तव्य कहा गया है।।१५६-१५७।। न्याय पर निर्मित, कल्याण की क्षमता से युक्त, युग के आदर्शों

कर्तव्यं न्यायसंसृष्टं कल्याणक्षमतायुतम्।
युगादर्शगुणैर्युक्तं जीवनोत्कर्षसाधनम्।।१५८।।

अन्यायप्रतिरोधो वै कर्तव्यं परमं स्मृतम्।
कर्तव्ये निरतो वीरो दुराचारं विरोधयेत्।।१५९।।

दमनस्य विनाशाय निग्रहार्याय दुष्कृताम्।
लोककल्याणसंसिद्ध्यै कार्यं कर्म समाचरेत्।।१६०।।

अधिकार:

स्वातन्त्र्यं समतामूलं कर्तव्येन समन्वितम्।
समष्टेर्हितसम्पन्नमधिकारो नृणां स्मृतः।।१६१।।

अधिकारा मनुष्याणां कर्तव्येन समर्थिताः।
वर्धयन्ति जनोत्कर्षं समाजोन्नतिगौरवम्।।१६२।।

कर्तव्यरहिता ह्येते जीवनोन्नतिघातकाः।
परिपुष्यन्ति पाखण्डमाधिक्यमभिमानताम्।।१६३।।

नूनमुत्तरदायित्वमधिकारस्य लक्षणम्।
लोककल्याणसंवृद्धिस्तस्य कर्तव्यमुच्यते।।१६४।।

से सम्पन्न कर्तव्य जीवन के उत्कर्ष का साधन है।।१५८।। अन्याय का प्रतिरोध निःसन्देह श्रेष्ठ कर्तव्य है। कर्तव्य में संलग्न वीर दुराचार का विरोध करे।।१५९।। दमन के विनाश के लिए, दुष्टों के निग्रह, अर्थात् नियन्त्रण के निमित्त तथा लोककल्याण की सिद्धि के लिए कर्तव्य कर्म किये जाँय।।१६०।।

कर्तव्य से युक्त, समष्टि के हित से सम्पन्न, समतामूलक स्वतन्त्रता ही मनुष्यों का अधिकार है।।१६१।।

कर्तव्य, समाज-कल्याण और समता अधिकार के आवश्यक गुण हैं। इनसे विरहित स्वतन्त्रता नैतिक दृष्टि से अधिकार नहीं समझी जा सकती, उसे नैतिकता-विहीन आधिपत्य ही समझा जा सकता है।

कर्तव्य से समर्थित मनुष्यों के अधिकार जनता का उत्कर्ष तथा समाज की उन्नति और गौरव को बढ़ाते हैं, पर कर्तव्य से रहित अधिकार जीवन की उन्नति के लिए घातक हैं। वे पाखण्ड, आधिपत्य और अभिमान को पुष्ट करते हैं।।१६२-१६३।। निःसन्देह उत्तरदायित्व अधिकार का लक्षण है, लोककल्याण की संवृद्धि उसका कर्तव्य है।।१६४।।

समतासहितो न्यायो जीवनस्याभिरक्षणम् ।
स्वातन्त्र्यं सहयोगस्य विचारस्य च संस्कृतेः ।।१६५।।

सौविध्यं लोकयात्रायै समोत्कर्षाय साधनम् ।
श्रमव्यक्तित्वसम्मानो ह्यधिकारा नृणां स्मृताः ।।१६६।।

अधिकारान् मानवानां कर्तव्यानि च यत्नतः ।
राष्ट्रियो ज्ञानसम्पन्नः संरक्षेत् परिपालयेत् ।।१६७।।

लोकन्यायः

विवेकनिश्चितं सत्यं समभाव-गुणान्वितम् ।
लोकधारणसामर्थ्यं लोकरक्षा-बलान्वितम् ।।१६८।।

भूषितं जनकल्याणैः समष्टेर्हितसंयुतम् ।
तटस्थं वैरनिर्मुक्तं लोकन्यायः प्रकीर्तितः ।।१६९।।

व्यवस्था समता शान्तिः स्वातन्त्र्यं सहकारिता ।
कल्याणोत्कर्षसौहार्दं लोकन्यायगुणाः स्मृताः ।।१७०।।

आधिपत्यपराभूतं क्रौर्यशोषणसंयुतम् ।
विधिमन्यायमूलं च दमनं तस्य शोषणम् ।।१७१।।

समतासहित न्याय, जीवन की समुचित रक्षा, सहयोग तथा विचार और संस्कृति की स्वतन्त्रता, लोकयात्रा, अर्थात् जीवन-निर्वाह की सुविधा, सर्वांगीण उत्कर्ष के साधन, श्रम और व्यक्तित्व का सम्मान निश्चय ही मनुष्य के अधिकार हैं।।१६५-१६६।। ज्ञान-सम्पन्न नागरिक मनुष्यों के अधिकारों और कर्तव्यों की रक्षा यत्नपूर्वक करे और उनका पालन करे, अर्थात् उत्कर्ष और कल्याण के लिए अधिकार और कर्तव्य दोनों की रक्षा और पालन जरूरी है।।१६७।।

विवेक द्वारा निश्चित, समता की भावना से युक्त, लोक को सम्भाले रखने की योग्यता तथा लोकरक्षा की शक्ति से सम्पन्न, जनकल्याण से भूषित, समाज के हित से युक्त, तटस्थ, वैररहित सत्य लोकन्याय कहलाता है। ये सभी लोकन्याय के आवश्यक तत्त्व हैं।।१६८-१६९।। व्यवस्था, समता, शान्ति, स्वतन्त्रता, सहकारिता, कल्याण, उत्कर्ष और सौहार्द लोकन्याय के गुण हैं, अर्थात् इनकी संवृद्धि लोकन्याय है।।१७०।। आधिपत्य से पराभूत, क्रूरता और शोषण से युक्त, अन्यायमूलक कानून तथा उसके दमन और शोषण को कर्तव्यनिष्ठ क्रान्ति तथा लोकतान्त्रिक तरीके से हृदय की दुर्बलता

कर्तव्यनिष्ठितः क्रान्त्या लोकतन्त्रपथेन च ।
त्यक्त्वा हृदयदौर्बल्यं यत्नतः प्रतिशोधयेत् ।।१७२।।

लोकन्यायविशेषज्ञो विधिस्थितिविशारदः ।
शोधयेद् विधिवैकल्यं दोषपूर्णपरम्पराम् ।।१७३।।

संवर्धयेत् सदादर्शं मानुष्यसमतायुतम् ।
काशयेन्नीतिसिद्धान्तान् प्रगतिक्षेमसम्भृतान् ।।१७४।।

ज्ञानम्

ज्ञानं न्यायसमायुक्तं समताक्षेमसम्भृतम् ।
चारित्र्योत्कर्षशक्तिभ्यां युतं सज्ज्ञानमुच्यते ।।१७५।।

शब्दशास्त्रं महारण्यं सज्ज्ञानं परमं स्मृतम् ।
कल्याणोत्कर्षसंसिद्ध्यै सज्ज्ञानं साधयेत् सुधीः ।।१७६।।

अन्धविश्वासनिर्मुक्तिः समता सत्यनिष्ठता ।
मानुष्ये दृढविश्वासो ज्ञानोत्कर्षप्रसाधनम् ।।१७७।।

सत्यस्याचरणं श्रेष्ठं मानवानां परं तपः ।
सत्यं वै लोककल्याणं मानुष्यं समदर्शनम् ।।१७८।।

संवर्धिष्णु हि सत्यं स्यात् सर्वलोकहितात्मकम् ।
काशयेन्नयतत्त्वानि कल्याणार्थं न च स्थितौ ।।१७९।।

को छोड़कर यत्नपूर्वक अवरुद्ध करे, रोके, अर्थात् लोकन्याय के बजाय दमन और शोषण को पुष्ट करने वाले कानूनों का डट कर विरोध किया जाय।।१७१-१७२।। लोकन्याय का विशेषज्ञ, कानून और स्थिति का जानकार कानून की त्रुटियों और कमियों तथा दोषपूर्ण परम्पराओं का सुधार करे, मनुष्यता और समता से सम्पन्न अच्छे आदर्श को बढ़ाये, एवं प्रगति और कल्याण से सम्पन्न नीति और सिद्धान्तों को उद्घोषित करे।।१७३-१७४।।

न्याय, समता और कल्याण से सम्पन्न तथा चरित्र और उत्कर्ष की शक्तियों से युक्त ज्ञान सज्ज्ञान कहलाता है।।१७५।। शब्दशास्त्र बड़ा जंगल है, सज्ज्ञान ही श्रेष्ठ है। बुद्धिमान् कल्याण और उत्कर्ष की सिद्धि के लिए सज्ज्ञान की साधना करे।।१७६।। अन्धविश्वास से छुटकारा, समता और सत्य पर श्रद्धा, मनुष्यता पर दृढ़ विश्वास ज्ञान के उत्कर्ष के साधन हैं।।१७७।। सत्य का आचरण श्रेष्ठ है, मनुष्य का बड़ा तप है। लोककल्याण, मनुष्यता, समदर्शन ही सत्य है।।१७८।। सर्वलोक का हितकारी सत्य निःसन्देह विकासशील है। वह नई परिस्थिति में कल्याण के निमित्त नये तथ्यों को उद्घोषित

नयादानप्रदाने च विश्वज्ञानसमन्वयः ।
प्रपुष्यन्ति विचारस्य स्वातन्त्र्यं विश्वसङ्गतिम् ।।१८०।।

प्रगतिं सर्वविश्वस्य जनताहितमङ्गलम् ।
ज्ञानविज्ञानसंवृद्धिं विश्वविद्वत्सु भद्रताम् ।।१८१।।

नानादेशसमुत्पन्नाः पण्डिताः प्रतिभायुताः ।
ज्ञानविज्ञानशोभाभिर्मण्डयन्ति महीतलम् ।।१८२।।

ज्ञानार्थी निरहङ्कारो मानयेत् सर्वपण्डितान् ।
विवेकेन शुभं ज्ञानं सर्वतश्च समाप्नुयात् ।।१८३।।

राष्ट्रस्य संस्कृतिं ज्ञानमाचारमनुशीलयेत् ।
प्रगतिप्रदतत्त्वानि समारक्षेच्च वर्धयेत् ।।१८४।।

विश्वस्य सञ्चितं ज्ञानं विज्ञानमनुशीलयेत् ।
तयोः प्रगतिदं तत्त्वं निवेशयेत् स्वसंस्कृतौ ।।१८५।।

नवीनस्थितिसन्दर्भे प्रगतिक्षेममहेतवे ।
ज्ञानस्य नवतत्त्वानि पण्डितः प्रतिपादयेत् ।।१८६।।

शिक्षा

सर्वाधिकारो विद्यायां सा वै सर्वस्य गौरवम् ।
तस्याः सर्वस्य सौविध्यं कल्याणोत्कर्षसाधनम् ।।१८७।।

करे।।१७९।। सिद्धान्तों का आदान-प्रदान तथा विश्वज्ञान का समन्वय विचारों की स्वतन्त्रता तथा विश्व के साहचर्य को, सम्पूर्ण संसार की प्रगति को, जनता के हित-मंगल को, ज्ञान-विज्ञान की वृद्धि को और संसार के विद्वानों में भद्रता को पुष्ट करते हैं।।१८०-१८१।। विभिन्न देशों में उत्पन्न प्रतिभासम्पन्न पण्डित ज्ञान और विज्ञान की शोभा से संसार को अलंकृत करते हैं।।१८२।। ज्ञान का इच्छुक निरहंकार हो सभी पण्डितों का सम्मान करे तथा विवेक के साथ अच्छे ज्ञान को सब जगह से प्राप्त करे।।१८३।। राष्ट्र की संस्कृति, ज्ञान और आचार का अध्ययन किया जाय तथा प्रगतिशील तत्त्वों की ठीक प्रकार से रक्षा की जाय और उन्हें बढ़ाया जाय।।१८४।। संसार के संचित ज्ञान और विज्ञान का अध्ययन किया जाय, उनके प्रगतिशील तत्त्वों को अपनी संस्कृति में समाविष्ट किया जाय।।१८५।। नवीन स्थिति के सन्दर्भ में प्रगति और कल्याण के निमित ज्ञान के नये तत्त्वों को पण्डित प्रतिपादित करे।।१८६।।

विद्या पर सबका अधिकार है, वह सबका गौरव है। सबके लिए उसकी सुविधा कल्याण और उत्कर्ष का साधन है।।१८७।। सर्वसंमत विधान से व्यक्ति और राष्ट्र के

सर्वसाम्यविधानेन व्यक्तिराष्ट्राभिवृद्धये ।
ज्ञानविज्ञानशिल्पेषु सर्वान् सम्यक् सुशिक्षयेत् ।।१८८।।
प्रौढाय दीनतप्ताभ्यां स्त्रियै च श्रमिकाय च ।
राज्यं विशेषसौविध्यं शिक्षायाः सम्प्रसाधयेत् ।।१८९।।
लोकतान्त्रिकचारित्र्य-नीतिसिद्धान्तसंस्कृतौ ।
लोकतन्त्रयुतं राज्यं शिक्षयेत् सर्वराष्ट्रिकान् ।।१९०।।
राज्यं कल्याणसङ्कल्पं क्षमताक्षेमवृद्धये ।
सर्ववर्गेषु यत्नेन जनशिक्षां प्रसारयेत् ।।१९१।।
वैज्ञानिकप्रयोगेण तथ्यं ज्ञानं परीक्षयेत् ।
सत्यं विज्ञानसंसिद्धं क्षेमयुक्तं प्रसारयेत् ।।१९२।।
प्रयोगानुभवेनैव तर्कपूर्णानुमानतः ।
सिद्धं ज्ञानं हि विद्वद्भिर्वैज्ञानिकमुदाहृतम् ।।१९३।।
चिन्तनं युक्तिसम्पन्नं प्रयोगानुभवाश्रितम् ।
वस्तुस्थितिषु संसृष्टं सद्भिर्वैज्ञानिकं स्मृतम् ।।१९४।।
शिक्षको दम्भपाखण्डे जडत्वं मोहमुत्सृजेत् ।
युक्तियुक्तविचारेण सज्ज्ञानं प्रतिपादयेत् ।।१९५।।
समः सर्वेषु शिष्येषु शिक्षको ज्ञानसम्भृतः ।
ज्ञानचारित्र्यसद्भावैः सर्वशिष्यान् सुशिक्षयेत् ।।१९६।।

कल्याण के निमित्त सबको ठीक प्रकार से ज्ञान-विज्ञान, कला-कौशल में शिक्षित किया जाय।।१८८।। प्रौढ़, दीन, पीडित, स्त्री और श्रमिक के लिए राज्य शिक्षा की विशेष सुविधा ठीक तौर पर निष्पन्न करे।।१८९।। लोकतान्त्रिक चरित्र, नीति, सिद्धान्त और संस्कृति में लोकतान्त्रिक राज्य सब नागरिकों को शिक्षित करे।।१९०।। कल्याण-संकल्प राज्य क्षमता और कल्याण की वृद्धि के निमित्त सभी वर्गों में यत्नपूर्वक जनशिक्षा को प्रसारित करे।।१९१।। वैज्ञानिक प्रयोग से तथ्य (वास्तविकता) और ज्ञान की परीक्षा की जाय, तथा विज्ञान से सिद्ध, कल्याण से युक्त सत्य प्रसारित किया जाय।।१९२।। प्रयोग और अनुभव तथा तर्कपूर्ण अनुमान से सिद्ध ज्ञान ही विद्वानों द्वारा वैज्ञानिक कहा जाता है।।१९३।। युक्तियुक्त प्रयोग और अनुभव पर आश्रित, वास्तविक स्थितियों पर निर्मित चिन्तन ही सज्जनों द्वारा वैज्ञानिक कहलाता है।।१९४।। शिक्षक दम्भ, पाखण्ड, जड़ता और मोह को छोड़ युक्तियुक्त विचार द्वारा सज्ज्ञान को प्रतिपादित करे।।१९५।। ज्ञानसम्पन्न शिक्षक सब शिष्यों में समभाव रखते हुए ज्ञान, चरित्र और सद्भावना द्वारा

यो विवेकसमायुक्तं ज्ञानं शीलहितान्वितम् ।
अध्यापयति यत्नेन स स्मृतः शिक्षकोत्तमः ।।१९७।।

विद्यार्थी जडतां त्यक्त्वा ज्ञानविज्ञानमाप्नुयात् ।
भावबुद्धिशरीराणां क्षमतामभिवर्धयेत् ।।१९८।।

न्याय-मानुष्य-सन्निष्ठा ज्ञानविज्ञानसञ्चयः ।
स्वातन्त्र्यं भद्रतायुक्तं सहकार्यं नयान्वितम् ।।१९९।।

शीलचारित्र्यसम्पुष्टिर्देशबन्धुत्वभावना ।
प्रेरणा लोकसेवायाः सङ्गोष्ठी ज्ञानवृद्धये ।।२००।।

सहपाठिषु सौहार्दं गुरुगौरवरक्षणम् ।
सौजन्यं व्यवहारे वै छात्राणां सद्गुणाः स्मृताः ।।२०१।।

मनोयोगविवेकाभ्यां विद्यार्थी सत्यनिष्ठितः ।
ज्ञानस्य नवतत्त्वानि लोकक्षेमं प्रसारयेत् ।।२०२।।

सम्यग् राष्ट्रहितज्ञाने जनतां परिशिक्षयेत् ।
वैज्ञानिकप्रयोगेण कृष्युद्योगौ प्रवर्धयेत् ।।२०३।।

जीवनं यो विजानाति कल्याणानन्दसाधनम् ।
संवर्धयति कल्याणमानन्दं वितनोति सः ।।२०४।।

सब शिष्यों को शिक्षित करे।।१९६।। जो विवेक से सम्पन्न, शील और कल्याण से युक्त ज्ञान यत्नपूर्वक पढ़ाता है, वह उत्तम शिक्षक है।।१९७।। विद्यार्थी जड़ता को छोड़कर ज्ञान-विज्ञान को प्राप्त करे, भाव, बुद्धि और शरीर की क्षमता बढ़ाये।।१९८।। न्याय और मनुष्यता के प्रति श्रद्धा, ज्ञानविज्ञान का संचय, भद्रता-युक्त स्वतन्त्रता, नैतिकता-युक्त सहकार्य, शील और चरित्र की पुष्टि, देशबन्धुत्व की भावना, लोकसेवा की प्रेरणा, ज्ञान की वृद्धि के लिए गोष्ठी, सहपाठियों में सौहार्द, गुरु के गौरव की रक्षा, व्यवहार में सौजन्य विद्यार्थियों के सद्गुण हैं।।१९९-२०१।। सत्यनिष्ठ विद्यार्थी दत्तचित्तता और विवेक से ज्ञान के नवीन तत्त्वों तथा लोककल्याण को प्रसारित करे, जनता को ठीक प्रकार राष्ट्रहितकारी ज्ञान में शिक्षित करे तथा वैज्ञानिक प्रयोगों से कृषि-उद्योग की वृद्धि करे।।२०२-२०३।। जो व्यक्ति जीवन को कल्याण और आनन्द का साधन जानता है, वह कल्याण की वृद्धि तथा आनन्द का विस्तार करता है।।२०४।।

जीवनं योऽभिजानाति सर्वलोकहितात्मकम् ।
स सेवासाम्ययोगाभ्यां वितनोति जगद्धितम् ।।२०५।।

लोकशीलम्

मृदुता मुदिता मैत्री मानवत्वं मनीषिका ।
सौजन्यं समतास्त्रोतः सेवा सौहार्दसम्भृता ।।२०६।।

सामाजिकत्वसंवित्तिर्वैदुष्यं विनयान्वितम् ।
गुणग्राहकगाम्भीर्यं लोकशीलं प्रशस्यते ।।२०७।।

लोकप्राणितचारित्र्यं स्वातन्त्र्यं शिष्टतान्वितम् ।
राष्ट्रकर्तव्यनिर्वाहः शौर्यं मानुष्यमण्डितम् ।।२०८।।

प्रातिवेशिकसौभ्रात्रं सौहृद्यं देशबन्धुषु ।
श्रमव्यक्तित्वसम्मानो लोकशीलं प्रशस्यते ।।२०९।।

सत्याधृतसदाचारः सत्कार्ये सहकारिता ।
व्यवहारान्वितं ज्ञानं कल्याणोत्कर्षवर्धनम् ।।२१०।।

कारुण्यं स्वार्थनिर्मुक्तं समता क्षेत्रसंश्रिता ।
लोककल्याणलग्नत्वं लोकशीलं प्रशस्यते ।।२११।।

सद्बुत्तिरुद्यमोत्साहौ विवेकान्वितसाहसम् ।
सौम्यत्वं भावसंशुद्धिर्जीवनादर्शरक्षणम् ।।२१२।।

जो व्यक्ति जीवन को सम्पूर्ण लोक का हितकारी समझता है, वह सेवा और समता के योग के द्वारा संसार के हित का विस्तार करता है।।२०५।।

कोमलता, प्रसन्नता, मैत्री, मानवता, सूझ (प्रज्ञा), समतास्त्रोत सौजन्य, सौहार्दपूर्ण सेवा, सामाजिकता की संवित्ति (ज्ञान, चेतना, भावना), विनय युक्त विद्वत्ता, गुणों को ग्रहण करने वाली गम्भीरता, लोकशील कहलाती है।।२०६-२०७।। लोकभावना से अनुप्राणित चरित्र, शिष्टता से युक्त स्वतन्त्रता, राष्ट्रकर्तव्य का निर्वाह (पालन), मनुष्यता से अलंकृत शौर्य, पड़ोसियों में बन्धुता, देश-बन्धुओं में सौहार्द, श्रम और व्यक्तित्व का सम्मान लोकशील कहलाता है।।२०८-२०९।। सत्य पर आश्रित सदाचार, सत्कार्य में सहयोग, कल्याण और उत्कर्ष को बढ़ाने वाला व्यवहार-सम्पन्न ज्ञान, स्वार्थ से निर्मुक्त करुणा, कल्याण से समन्वित समता, लोककल्याण में लगन लोकशील कहलाता है।।२१०-२११।। सभा में कल्याण के प्रति मानसिक दृढ़ता, सद्बुद्धि, भद्रता, आत्म-नियन्त्रण, समाजकल्याण की पुष्टि, लोकन्याय का दृढ़तापूर्ण आचरण, प्रस्ताव (विषय)

केलिक्रीडाप्रमोदेषु शीलस्य परिपालनम् ।
संयमो भोगतृष्णासु लोकशीलं प्रशस्यते ।।२१३।।

सत्पुरुषः

लोकस्य संग्रहार्थं यः समो भूत्वा फलं त्यजन् ।
सत्कार्यं कुरुते नित्यं महाकर्ता स उच्यते ।।२१४।।

आशा-शील-प्रमायुक्तो धृत्युत्साहक्षमायुतः ।
लोकात्मोत्कर्षसंलग्नो न्यायशीलो दृढव्रतः ।।२१५।।

सत्यः प्राज्ञः प्रगत्यर्थी मानुष्य-समतायुतः ।
सिद्ध्यसिद्ध्योर्निर्विकारो नरः सात्त्विक उच्यते ।।२१६।।

समतासत्यसम्पन्नो विद्यावृत्तव्रतान्वितः ।
शोभितः शौर्यशीलाभ्यां भावभूषणभूषितः ।।२१७।।

निर्भीको निरहङ्कारो निष्कामो न्यायनिष्ठितः ।
मण्डितो मानवत्वेन मानवो मानितो मतः ।।२१८।।

से सम्बन्धित युक्तियुक्त, कल्याण और नय (नैतिकता, सिद्धान्त, आदर्श) से समन्वित वाक्य, मतभेद में सहनशीलता लोकशील कहलाता है।।२१२।। सद्वृत्ति (शुद्ध आचार, व्यवहार, व्यवसाय), परिश्रम, उत्साह, विवेकयुक्त साहस, सौम्यता (कोमलता, निषिद्ध विषयों के चिन्तन का परित्याग, दूसरों के हित की कामना), भावों की शुद्धि (दुर्भावनाओं का परित्याग, सद्भावनाओं की पुष्टि, दूसरों के साथ कपट-रहित व्यवहार), जीवन के आदर्शों की रक्षा, खेल तथा क्रीड़ा और विनोद में शील का पालन, भोगतृष्णा में संयम लोकशील कहलाता है।।२१३।।

लोकसंग्रह (लोककल्याण) के निमित्त जो व्यक्ति फल का परित्याग कर समभाव रखते हुए सत्कार्य करता है, वह महाकर्ता है।।२१४।। आशा, शील, प्रत्यक्ष ज्ञान से युक्त, धृति, उत्साह और क्षमा से युक्त, संसार और अपने उत्कर्ष में संलग्न, न्यायशील, दृढ़व्रती, सत्यवादी, बुद्धिमान्, प्रगतिशील, मनुष्यता और समता से सम्पन्न, सिद्धि तथा असिद्धि में निर्विकार व्यक्ति सात्त्विक पुरुष कहलाता है।।२१५-२१६।। समता तथा सत्य से सम्पन्न, विद्या, आचरण तथा व्रत (मानसिक दृढ़ता) से युक्त, शौर्य तथा शील से शोभित, सद्भावना के भूषणों से विभूषित, निर्भीक, निरहंकारी, निष्काम (निजी कामनाओं के प्रति निस्पृह), न्यायनिष्ठ, मानवता से अलंकृत व्यक्ति सम्मानित मानव माना जाता है।।२१७-२१८।।

शुभकामना

सर्वः प्राप्नोतु मानुष्यं नैतिकत्वं सुसंस्कृतिम् ।
सज्ज्ञानं सद्विवेकं च सद्वृत्तिं प्रगतिं यशः ।।२१९।।

सर्वो भवतु कर्मण्यः सत्यार्थी विश्वनिष्ठितः ।
देशभक्तः समत्वार्थी लोकार्थी लोकतान्त्रिकः ।।२२०।।

सर्वो भजतु कल्याणं बन्धुत्वं सहकारिताम् ।
लोकन्यायं सदादर्शं स्वातन्त्र्यं जगतो हितम् ।।२२१।।

सर्वः पश्यतु भद्राणि सर्वो गच्छतु सत्पथे ।
सर्वोऽत्र शान्तिमाप्नोतु सर्वः सर्वत्र नन्दतु ।।२२२।।

सर्वे संघाः स्वसत्कृत्यैर्वर्धयन्तु जगद्धितम् ।
प्रगतिं सर्वसौहार्दं समत्वं सहकारिताम् ।।२२३।।

प्रतिभाशीलसम्पन्ना मण्डयन्तु महाशयाः ।
सङ्गोष्ठीं भद्रतायुक्तां सदादर्श-समन्विताम् ।।२२४।।

❀ ❀ ❀

सभी मानव मनुष्यता, नैतिकता, अच्छी संस्कृति, सज्ज्ञान, विवेक, सद्वृत्ति (अच्छा आचरण, व्यवहार, व्यवसाय) प्रगति और यश प्राप्त करें।।२१९।। सभी कर्मण्य (सक्रिय, निपुण), सत्यार्थी, विश्वनिष्ठ, देशभक्त, समत्वार्थी, लोकार्थी तथा लोकतान्त्रिक हों।।२२०।। सभी कल्याण, बन्धुता, सहकारिता, लोकन्याय, अच्छे आदर्श, स्वतन्त्रता और जनता के हित की आराधना करें।।२२१।। सभी कल्याण देखें, सत्पथ पर चलें, शान्ति प्राप्त करें, सर्वत्र आनन्दित हों।।२२२।। सभी संघ अपने अच्छे कामों द्वारा जगत् का हित, प्रगति, सबके साथ सौहार्द, समता और सहकारिता की वृद्धि करें।।२२३।। प्रतिभा और शील से सम्पन्न व्यक्ति उच्चतम कीर्ति द्वारा भद्रता से युक्त तथा अच्छे आदर्शों से सम्पन्न गोष्ठी को अलंकृत करें।।२२४।।

❀ ❀ ❀

ग्रन्थ-ग्रन्थकार (प्राचीन) अनुक्रमणी

अत्रिसंहिता २४
अर्थशास्त्र ६२,७१,७३,९८
ऐतरेय ब्राह्मण १०
कथासरित्सागर १२,१३५,
कौटल्य ७१,७३,९८
कामन्दक नीतिसार ८,१४,२७
६९,७०,७२,७३,१३५
१४१,१५४
चरकसंहिता ५
चाणक्य १०,२६,३७,
१०३,१३५,१३६
ज्ञानार्णव १३,१७७
धम्मपद १४,१२१,१३४,१४०
नीतिशतक (भर्तृहरि) ९,२६,१३५
पंचतन्त्र १०,७२,९६,१२१
भगवद्गीता २,३,७,९-१४,
१६-२०,२४,८१,८२,
११६,१२५,१३२,१४५,
१४६,१६०,१६१
भागवत महापुराण ३,६,९,१८
२१-२४,९४-९६,१३६,
१४७,१५३,१६२
भीष्म ७०,७१
मनुस्मृति ६,७,९,११,३४-३६,
६२,७१,७२,७४,९५,१२१
१२६,१३६,१३९,१४४,
१४५,१४७,१६०,१७७
महाभारत ७३
महाभारत अनुशासनपर्व १६१
महाभारत भीष्मपर्व १५९
महाभारत वनपर्व १५९
महाभारत शान्तिपर्व ४,५,७-१५,
२१,२३,२४,२७,३५-३७,
४८,५१,५७,६३,६९,
७१-७३,८२,८३,९५,९६,
११०,१२०,१३४,१३५,
१३७,१४४-१४६,१४९,
१५३,१५५,१५९-१६२,
१६७,१६८,१७७
महेश्वरानन्द १२७
मुक्तिकोपनिषत् १४
योगवासिष्ठ ४,६,९,११-१४
२६,१२१,१५४
रश्मिमाला ५१,१३६,१३८
लघुविष्णुस्मृति १४७
वसिष्ठ ४९

वाल्मीकि रामायण १०,१२,१२१
विक्रमाङ्कदेवचरित १३८
विदुरनीति ११,७४,१२०,१२१,
१२६,१३८,१४०,१४१
विष्णुपुराण १३,१६१
वेदव्यास १०
शार्ङ्गधर १२६
शुक्रनीति ११,१४,२१,२४,
६२,६९,७०-७२,९५,
१३२,१४०
सूक्तिसुधाकर ११८,१४६
हितोपदेश ७२,७३,७९,
१२०,१४१

❀ ❀ ❀

ग्रन्थ-ग्रन्थकार (नवीन) अनुक्रमणी

(मौलाना) अबुलकलाम आजाद १८२

आचार्य नरेन्द्रदेव : युग और नेतृत्व २२ ३०,४३,५८,७९,१०८

आनन्दशंकर बापुभाई ध्रुव २४

कालविन १८८

गुम्लोविकज १८८

ग्रामर आफ पालिटिक्स ४६,४७

(पण्डित) जवाहरलाल नेहरू ५७,१८२

जान लाक ४६,४७,१६३

जिना (कायदे आजम) १८१

जेन आस्टिन ४६,४७

जोसेफ मेत्सनी ५७

ड्यूटीज आफ मैन ५८

(स्वामी) दयानन्द १४७

(आचार्य) नरेन्द्रदेव ३०,४३, ५७,१५७,१७३,१७५, १८२,१८८,१८९

पेटरो १८८

(लोकमान्य) बालगंगाधर तिलक २०, १९१

भगवद्गीता-टीका (गीतारहस्य) २०

(महामना) मदनमोहन मालवीय ५६, ५७,६२,७७,१५९,१८२, १८३

मार्क्स १८८

मुसोलिनी १८५

मेक्सवेवर १८८

मेजनी १८१,१८५

(महात्मा) मो. क. गाँधी १८,५७ १२९,१५७,१७०,१७१, १७३,१७४,१७६,१७८, १८१,१८२,१८५,१८८, १८९,१९१-१९३,१९५

(स्वामी) रामतीर्थ ९५,१२९

रामहृदय (ग्रन्थ) ९५,१२९

रूसो ४६

रोजा लुकजम्बर्ग १७३

(स्वामी) विवेकानन्द ४३,१२९

सावरकर १८१

(प्रो. एल.टी.) हाव हाउस ४६,५०, १६३,१६५

हिटलर १८१,१८५

(प्रो.) हेरल्ड लास्की ४६,४७,१६३

❀ ❀ ❀